# NOTICES

OF

# SANSKRIT MSS.

## SECOND SERIES

BY

MAHĀMAHOPĀDHYĀYA HARAPRASĀDA ŚĀSTRĪ, M.A.
*Honorary Joint Philological Secretary, Asiatic Society of Bengal.*

PUBLISHED

**UNDER ORDERS OF THE GOVERNMENT OF**

BENGAL

VOLUME III. PART I.

CALCUTTA
BAPTIST MISSION PRESS.
1904.

# NOTICES OF SANSKRIT MSS. 1894.

**No. 1.** अङ्कचूड़ामणिः By वराहमिहिराचार्य्यः. Substance Tarct leaves, $8 \times 1\frac{1}{2}$ inches. Folia 47. Lines 5, on a page. Extent 225 çlokas. Character Bengali. Date, Sk. 1572. Place of deposit, Zilla Medinīpura, Post Office Garvetā, grāma Khunverā, Late Pandit Rāmatāraṇa Çiromaṇi. Appearance old. Generally Añkas. Correct.

**Beginning.** ॐनमः श्रीसूर्य्याय ।

प्रणम्य भानोः पदपङ्कजातं विलोक्य शास्त्रं निखिलं तदुक्तं ।
श्रीमद्वराहेण वितन्यतेऽमावङ्कस्य चूड़ामणिरङ्कलेशैः ॥
प्रयोजनमुखोद्देशमुखेन × × × × × × माद ।
विनष्टकोष्ठाद्धरणप्रवृत्तः श्रुत्वा शकं मासमपि क्रमेण ।
कुम्भादिपट् खेचरभं × × × × × × × ॥ इत्यादि ।

**End.** वा । ४ । ४ । ४ । २ । २ । २ । १ । २ । २ । १ । २ । १ । २ । श्रीः ।
इति वराहमिहिराचार्य्य विरचिताङ्कचुड़ामणिः समाप्तः ।
चुड़ामणिमिमं दिव्यमङ्कसूत्रेण गुम्फितं
कण्ठेऽर्पयत यत्नेन सुधियोऽमत्सराः स्वयं ॥
शुभमस्तु शकाब्दाः १५७२ ।

विषयः । नष्टकोष्ठाद्धार विषयकोऽयं ग्रन्थः ॥ क्रमेण मासादीनां गणनं ॥

---

**No. 2.** अद्वयतारकोपनिषत्. Substance country-made paper, $10 \times 3$ inches. Folia 2. Lines 12 on a page. Extent 50 çlokas. Character Nāgara. Date ? Place of deposit, Benares, Govinda Bhatta. Appearance old. Prose. Correct.

**Beginning.** अथातोऽद्वयतारकोपनिषदं व्याख्यास्यामः यतये जितेन्द्रिया यन्नामादिषड्-गुणपरिपूर्णाय चित्स्वरूपोऽहमिति सदा भावयन् । सम्यक् निमीलिताचः किञ्चिदुन्मीलिताचोवान्तर्दृष्ट्या भ्रू ... दुपरि सच्चिदानन्दतेजः कूटरूपं परं ब्रह्मावलोकयन् । इत्यादि

End. यः सकृदुच्चारयति, तस्य संसारमोचनं भवति, सर्व्वजन्मकृतं पापं तत्क्षणादेव नश्यति, सर्व्वान् कामानवाप्नोति, सर्व्वपुरुषार्थसिद्धिर्भवति य एवं वेदेत्युपनिषत् ।

Colophon. × × × ×

विषयः । योगेनात्मसाक्षात्कारप्रकारकथनम् ।

---

**No. 3.** अध्यात्मबहोतरी. Substance country-made paper, 10 × 4½ inches. Folia 11. Lines 26 on a page. Extent 330 çlokas. Character Nāgara. Date, Sm. 1871. Place of deposit, Benares City, Dikmaṇḍalācāryya Mahārāja Bāla Candra Sūri. Appearance old. Verse. Correct.

Beginning. राग वेला उल ।

क्या सोवे उठि जाग बाउरे अञ्जल जल ज्यु आयु घटत है देत पोहरिया घरिय घाउरे ।

End. आनन्दघन प्रभु तु म्हारे मिलनकुँ जाय कयवत लुँ कासी । इति पदम् ।

Colophon. इति श्रीआनन्दघनजीकृत अध्यात्मबहोतरी समाप्ता ।

सम्वत् १८७१ । फाल्गुण सुदि

विषयः । जैनानां आत्मविचार कथनम् ।

---

**No. 4.** अन्त्येष्टिप्रयोगः. Substance country-made paper, 8 × 2 inches. Folia 107. Lines 7 on a page. Extent 1498 çlokas. Character Nāgara. Date, Sm. 1919. Place of deposit, Benares, Pandit Vāmanācāryya. Appearance new. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

अथ अस्थ्यभावे पालाशविधिर्लिख्यते । स्नानं मद्द × × वस्त्रपरिधानम्, आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्यापसव्यं गोचस्य प्रेतस्य प्रेतत्वमुक्तये उत्तमलोकप्राप्तये अस्थ्यभावे पालाशविधिना और्द्ध्वदेहिककर्माहं करिष्ये ।

End. गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।

यस्मात्तस्माच्छिवं मे स्यादिहलोके परत्र च ॥

Colophon. इति प्रयोगदर्पणे उत्तरकर्म्म समाप्तः । सम्वत् १९१९ ॥

विषयः यजुर्वेदीयानां और्द्ध्वदेहिकपद्धतिः ।

---

No. 5. अन्त्येष्टिप्रकाशः By दिवाकरः. Substance country-made paper, 10×3 inches. Folia 25. Lines 11 on a page. Extent 600 çlokas. Character Nāgara. Date ? Place of deposit, Benares, Pandit Vāmanācāryya. Appearance old. Prose. Correct.

**Beginning.** श्रीगणेशाय नमः, श्रीहरिः ॥
अथ वह्वृचानां अनाहिताग्निना निर्देशेण मृतानामौर्द्धदैहिकप्रयोगः, क्षीणावस्थायां सर्व्वप्रायश्चित्तविधिनाम + भूतः शक्तौ सत्यां पूर्व्वोक्तानि भूम्यश्वादीनि दानानि दत्त्वोत्क्रान्तिधेनुं दद्यात् ।

**End.** विलोक्य मेतत्सर्व्वं × येन तुष्यन्ति सुहृदं, तेषां निष्ठा नचैवेह नचामुत्रापि दृश्यते ।

**Colophon.** इति श्रीभारद्वाजदिवाकरविरचिते अन्त्येष्टिप्रकाशः समाप्तः ।

विषयः आश्वलायनशाखीयानां अन्त्येष्टिविधिः ।

---

No. 6. अपत्नीकाधानाग्निहोत्रादिनिर्णयः By शङ्करभट्टः. Substance country-made paper, 8×3 inches. Folia 2. Lines 14 on a page. Extent 60 çlokas. Character Nāgara. Date ? Place of deposit, Benares, Pandit Vāmanācāryya. Appearance old. Prose. Incorrect.

**Beginning.** श्रीगणेशाय नमः ।
आहिताग्नेर्ज्येष्ठसवर्णपत्नी मृता श्रौताग्निभिर्दग्धव्या आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चेत्यग्नियज्ञपात्रकरणकदाहेनाहिताग्निशरीरसंस्कारविधा वाहिता-ग्निपदे लिङ्गस्याविवक्षितत्वात् स्त्रिया अप्याहिताग्निपदेनोक्तेः ।

**End.** तद्वदेव पत्न्यङ्गत्वपक्षपरमेव भवति । भारद्वाजस्तत्वन्तु पत्नीप्राधान्यपक्षपर-मिति सर्व्वं निरवद्यम् ।

**Colophon.** इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीण-मीमांसाद्वैतसाम्राज्यधुरंधर श्रीभट्टनारायणात्मज भट्टशंकरकृते द्वैतनिर्णये अपत्नीकाधानाग्निहोत्रादि निर्णयः ।

विषयः पत्न्यभावे अग्न्याधानं किमुपायेन कर्त्तव्यं तन्निर्णयः ।

---

**No. 7.** **अपथ्यशमनम् .** Substance country-made paper, 6×4 inches. Folia 3. Lines 15 on a page. Extent 43 çlokas. Character Nāgara. Date ? Place of deposit, Benares, Govinda Bhatta. Appearance old. Verse. Incorrect.

**Beginning.** अथातोऽपथ्यशमनं व्याख्यास्यामः

अपथ्यशमनं वक्ष्ये रोगिणां च परं हितम् ।
सुखेन पच्यते येन लाघवं चोपजायते ॥
गोप्यतां वैद्यसर्व्वे ... न प्रकाश्यं कथंचन ।
शाकं फलं इन्नकृतामत्स्य माहिषमोदनम् ॥
सर्पिर्वसातैल मथोष्णशीतं चाराम्लमद्यासवपायसञ्च ।
एतेषां परिपाकं च यथा भवति रोगिणाम् ॥

**End.** उष्णेन पच्यते शीतं शीतेनोष्णं विपच्यते ।
एतत्ते कथितं सम्यक् अपथ्यशमनं स्मृतं ।
हिताय च गदार्त्तानां भिषजां जीवनाय च ।
कौतूहलं नरेन्द्राणां अपथ्यशमनं स्मृतं ॥

**Colophon.** इति श्रीवैद्यवैशेषिके श्रीमद्भोजनकौतूहलं अपथ्यशमनं समाप्तम् ।

विषयः । अपाकस्य परिपाकोपायकथनम् ।

---

**No. 8.** **अपराजितास्तुतिः (त्रैलोक्यविजयानाम्नी) विष्णुधर्म्मोत्तरीया.** Substance country-made paper 11×3 inches. Folia 4. Lines 7 on a page. Extent 90 çlokas. Character Bengali. Date Sk. 1753. Place of deposit, Zilla Medinīpura, Post Office Garvetā, grāma Khunverā, Late Pandit Rāmatāraṇa S'iromani. Appearance fresh. Prose and verse. Generally correct.

**Beginning.** ॐ नमोऽपराजितायै ।

ॐ नीलोत्पलनिभां देवीं निद्रामुद्रितलोचनाम् ।
नीलकुञ्चितकेशाग्रां निम्ननाभिं वलित्रयाम् ॥
नानाभरणसंयुक्तां चक्रवाकैश्च वेष्टिताम् ।
वराभयकराम्भोजां प्रणतार्त्तिविनाशिनीम् ॥
पादयोः शृंखलापूर्णां वह्निच्छेदनदेवताम् ।
स्फीतां पीताम्बरोपेतां × × × सम्विलेपनाम् ॥

पीठमन्त्याद्दतां देवीं परसैन्यप्रभञ्जिनीम् ।
शङ्खचक्रगदाहेतिभिन्नहस्तां त्रिलोचनाम् ।
ध्यायेदपराजितां देवीं सर्व्वकामफलप्रदाम् ॥ इत्यादि ।

**End.** ॐ भूः स्वाहा । ॐ भुवः स्वाहा । ॐ स्वः स्वाहा । ॐ भूर्भुवः स्वः स्वाहा । यत एवागतं पापं तत्रैव गच्छतु स्वाहा । ॐ बले स्वाहा । ॐ अबले स्वाहा ॥ ॐ अजिते स्वाहा । ॐ अपराजिते स्वाहा । ॐ असिद्धसाधनीं स्वाहा ।

**Colophon.** इति विष्णुधर्म्मोत्तरे तृतीयकाण्डे त्रैलोक्यविजयाऽपराजिता समाप्ता । ॐ तत्सत् । शकाब्दाः १७५३ । ४ । २९ ।

**विषयः ।** अपराजितायाः स्तुतिकथनं प्रयोगश्च ॥

---

**No. 9.** **अमरकोष टीका (नामलिङ्गकौमुदी)** By **रामकृष्ण .** Substance Palm-leaves, 13 × 2 inches. Folia 116. Lines 5 on a page. Extent 2000 çlokas. Character Bengali. Date Sk. 1644. Place of deposit, Dināјapura, Babu Giriçacandra Cakravartti (Vakil). Appearance old. Prose. Correct.

**Beginning.** ॐ नमो लिपिलम्बोदराय ॥
प्रणम्य नन्दतनयं वाच्यं सकलनामभिः ।
तन्यते रामकृष्णेन नामलिङ्गाख्यकौमुदी ।
ग्रन्थारम्भसमये विघ्ननाशाय मङ्गलमाचरति । यस्येति यस्य सिन्धोर्गुणा अनघा दोषासमुन्निताः, स भगवान् सेव्यतां अर्थादस्माभिः । सेवा भक्तिस्तदाशंसा एव मङ्गलं प्रकृते च अस्माकं तत्र भवत्विति यावत् ॥

**End.** "प्रतिशोग्यप्रसिद्धात् प्रसिद्धं नच वाक्यान्तरे ग्रन्थोपयुक्तत्वाभावः स इति वाच्यं ग्रन्थः समाप्त इत्यत्रान्वयापत्तेः । उच्यते प्रकृते समाप्तिव्यक्ति स्तदुपयुक्तयावद्वाक्यकत्वं इति नान्वयः ॥ समाप्तसामान्यलक्षणन्तु निष्पन्नं यावत् घटकत्वं यथा यागसमाप्तिः । महाभारतश्रवणं समाप्तं इति ।

**Colophon.** इति श्रीतर्कपञ्चानन भट्टाचार्य्यविरचिता नामलिङ्गाख्यकौमुदी समाप्ता । शाके वेदतर्कर्त्तुचन्द्रमिते ... ... ... ... लिलेख ॥ १६४४ शक ॥

**विषयः ।** अमरकोषस्य व्याख्यानं ॥

---

**No. 10.** अमरकोषपञ्जिका (पदचन्द्रिका) By बृहस्पतिः. Substance country-made paper, 10×4 inches. Folia 220. Lines 12 on a page Extent 5000 çlokas. Character Bengali. Date ? Place of deposit, Dinājapura. Babu Giriça Candra Cakravartti Vakil. Appearance old. Prose. Generally correct.

**Beginning.** नमो भगवते वासुदेवाय ॥

अध्यास्ते यः सर्व्वं ध्रुवं (ईदृग् इत्यगवरो वचसः), अहमिति संविद्विषयः पुरुषः स परं पुरातनो जयति। अभीष्टदेवतानमस्काराद्युपनीतमदृष्टं हि विघ्नापरनामकसाध्यप्रतिबन्धकाधर्मतिरोधानद्वारा प्रारिप्सितं परिसमापयति इति प्रामाणिकमतो निष्प्रत्यूहप्रारिप्सितपरिसमाप्तिहेतु-मिष्टदेवतासङ्कीर्त्तनादिशिष्टाचारं सम्पिपादयिषुः ग्रन्थकारः प्रथमं पद्यं निबबन्ध यस्येति। हे धीराः स भगवान् सेव्यतामाराध्यतां इत्यादि ॥

**End.** नैऋतो राक्षसः द्वावकमपि सुमनन्तं क्लीव इत्यस्य विषयः। इदमोजः इदं यशः इतोभयं प्राप्नोति इदं रक्षः परत्वात् क्लीवं शेषमिति। इह ग्रन्थविस्तरभयात् यल्लिङ्गं नामत्वेनोक्तं तच्छिष्टानां पूर्व्वाचार्य्याणां महाकवीनाञ्च प्रयोगात् ज्ञेयं, यथा गोधा पुंस्यपि स्त्री पोटा नपुंसकेऽपि स्त्रीत्यादिकमूहनीयमिति ॥

**Colophon.** इति महिन्तापनीय कविचक्रवर्त्ति राजपण्डित पण्डितसार्वभौम कवि पण्डितचूडामणि महाचार्य्य रायमुकुटमणि श्रीमद्बृहस्पतिकृतायाममरकोषपञ्जिकायां पदचन्द्रिकायां लिङ्गादिसंग्रहवर्गविवरणं समाप्तम् ॥ समाप्तेयं अमरपञ्जिकेति ॥०

विषयः। अमरकोषस्य व्याख्यानम् ॥

---

**No. 11.** अमरसेन वैरसेनकथा. Substance country-made paper, $10 \times 2\frac{1}{2}$ inches. Folia 7. Lines 12 on a page. Extent 280 çlokas. Character Nāgara. Date ? Place of deposit, Benares, Dikmaṇḍalācārya Bālacandra Sūri. Appearance old. Prose. Incorrect.

**Beginning.** अथ अमरसेन वयरसेनयोः कथा जिनपूजा उपरि प्रारभ्यते मया यतो जाय इसुपत्तदानं भोगानं कारणं शिवफलं च जह × × भायाणं सुयाण मिव सुरसेनस्स।

End. तत्र देवलोकसौख्यमनुभूय ततः श्रुत्वा मनुष्यसौख्यानि भुक्त्वा क्रमेण षष्ठभवे सिद्धिं यास्यतः ।

Colophon. इति श्री अमरसेनवयरसेनकथानकं सम्पूर्णम् ।

विषयः जैनधर्ममाहात्म्यकथनप्रसङ्गे अनयोः कथा ।

---

No. 12. अयोध्याखण्डम् (स्कन्दपुराणीयम्). Substance country-made paper, 14 × 5 inches. Folia 30. Lines 9 on a page. Extent 1000 çlokas. Character Bengali. Date ? Place of deposit, Dinājapura Rājavāṭi. Appearance fresh. Verse. Incorrect.

Beginning. ॐ नमो भगवते वासुदेवाय ॥
हिमवद्वासिनः सर्व्वे मुनयो वेदपारगाः ।
त्रिकालज्ञा महात्मानो नैमिषारण्यवासिनः ॥
एतचान्यच बहवः सशिष्या बहवो मताः ।
कुरुक्षेत्रे महाक्षेत्रे तत्र द्वादशवार्षिके ।
प्रवर्त्तमाने रामस्य क्षितीशस्य महात्मनः ॥
इत्यादि ॥

End. पुत्रार्थी लभते पुत्रं धनार्थी धनमाप्नुयात् ।
मोक्षार्थी मोक्षमाप्नोति ( भक्तियदि लिख्यते )
... ... ... सर्व्वभोगांश्च भुक्त्वा ॥

Colophon. इति श्रीस्कन्दपुराणे अयोध्याखण्डे दशमोऽध्यायः ॥ ॐ ॥

विषयः । १ अध्याये विष्णुहरिप्रभावादि कथनम् ॥ १, २ अध्याययोः स्वर्गद्वारमहिमादि-कथनम् ॥ ४ अध्याये चन्द्रद्वारमहिमादि कथनम् ॥ ५ — १० अध्यायेषु अयोध्यामाहात्म्यादि कथनम् ॥

---

No. 13 अवधूताश्रमः. Substance country-made paper, 12 × 3 inches. Folia 4. Lines 7 on a page. Extent 110 çlokas. Character Bengali. Date ? Place of deposit, Upalatā grāma, Post Office Mehar, Zilla Comilla, Pandit Jagadbandhu Tarkavāgīça. Appearance fresh. Verse. Correct.

Beginning. अवधूतानां दशधा संज्ञा इत्युच्छङ्करविजये ।
तीर्थाश्रमवनारण्यगिरिपर्व्वतसागराः ।
सरस्वती भारती च पुरीति दश कीर्त्तिताः ॥
त्रिवेणीसङ्गमे तीर्थे तत्त्वमस्यादिलक्षणे ।
यः स्नायात् तत्त्वभावेन तीर्थनामा स उच्यते ॥
आश्रमे ग्रहणे प्रौढ़ आशापाशविवर्जितः ।
यातायातविनिर्मुक्त एतदाश्रमलक्षणम् ॥
सुरम्ये निर्ज्जने देशे वने वासं करोति यः ।
आशापाशविनिर्मुक्तो वननामा स उच्यते ॥ इत्यादि ।

End. कुलावधूतस्तत्त्वज्ञो जीवन्मुक्तो नराकृतिः ।
साक्षान्नारायणं मत्वा गृहस्थस्तं प्रपूजयेत् ॥
यतेर्दर्शनमात्रेण विमुक्तः सर्व्वपातकात् ।
तीर्थव्रततपोदानसर्वयज्ञफलं लभेत् ॥

Colophon. इत्यवधूताश्रमः ।

विषयः । अवधूताश्रमलक्षणकथनं अवधूतानां कर्त्तव्यनिरूपणञ्च ।

---

**No. 14.** अवधूतोपनिषत् . Substance country-made paper, 10 × 4 inches. Folia 1. Lines 11 on a page. Extent 25 çlokas. Character Nāgara. Date ? Place of deposit, Benares, Govinda Bhatta. Appearance old. Prose. Correct.

Beginning. अथ तुरीयातीतावधूतानां कोऽयं मार्गस्तेषां का स्थितिरिति पितामहो भगवन्तं पितरमादिनारायणं परिसमेत्योवाच तमाह भगवन्नारायणो योऽयमवधूतमार्गस्थो लोके दुर्लभतरो न तु बाहुल्यो यद्येको भवति ।

End. असंभाषण परस्वरूपध्यानेन निरालम्बमवलम्ब्य स्वात्मनिष्ठानुकूलेन सर्व्वं विस्मृत्य तुरीयातीतोऽवधूतवेषेणाद्वैतनिष्ठापरः प्रणवात्मकत्वेन देहत्यागं करोति यः सोऽवधूतः स कृतकृत्यो भवतीत्युपनिषत् ।

Colophon. इति तुरीयातीतावधूतोपनिषत् समाप्ता ॥

विषयः । तुरीयातीतावधूतस्वरूपकथनम् ॥

---

**No. 15.** **अशौचनिर्णयः** By **श्रीनिवासतर्कवागीश भट्टाचार्य्य**. Substance country-made paper, 12×2½ inches. Folia 17. Lines 6 on a page. Extent 350 çlokas. Character Bengali. Date ? Place of deposit, District Dacca, Sonārgā̃ Kṛṣṇapura. Pandit Çarat Candra Bhattācāryya. Appearance old. Prose and verse. Correct.

**Beginning.** ॐ नमो गणेशाय ।

प्रणम्य पुण्डरीकाक्षं शुद्धये द्विजशूद्रयोः ।
श्री श्रीनिवासधीरेण क्रियतेऽशौचनिर्णयः ॥
अथ जननाशौचं । तत्रादौ ब्राह्मणशूद्रयोरेवाशौचं वक्तव्यं अधुना अन्येषां प्रचाराभावात् । ब्राह्मणस्याङ्गिरसो यथा ।
गर्भाधानादिसंस्कारैर्युक्तश्च नियतव्रतैः ।
नाध्यापयति नाधीते स ज्ञेयो ब्राह्मणब्रुवः ॥
मनुः—शुद्धेद्विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्धति ।
रजककैवर्त्तादीनामपि शूद्रतुल्यमशौचं यतः शूद्रवर्णसङ्करा इति वचनात् ॥
इत्यादि ।

**End.** अथ दंष्ट्रादिहताशौचं । शस्त्रघातस्तस्य यदि तृतीयदिनाभ्यन्तरे मरणं तदा त्रिरात्र मशौचं यदि त्र्यहादूर्द्ध्वं म्रियते तदा सम्पूर्णाशौचं सर्व्वेषां तादृशी व्यवस्था सर्व्ववर्णविषया तथाच गोतमः ।
शस्त्रघाते त्र्यहादूर्द्ध्वं यदि स्यान्मरणं क्वचित् ।
सम्पूर्णं तत्र कर्त्तव्यं सर्ववर्णेषु नित्यशः ॥
... ... ... ... ... ... ... ... ... ...
तथाच व्यासः । दंष्ट्रिणा च हतो यस्तु तस्याशौचं ... ... ।
आसन्नमात् त्रिरात्रं स्यात् दशरात्र मतः परं ॥
एतेन व्याघ्रसर्पकुक्कुरादीनां ग्रहणं बोद्धव्यम् ।

**Colophon.** इति श्रीयुततर्कवागीशभट्टाचार्य्यश्रीश्रीनिवासरचिताशौचनिर्णयः समाप्तः ॥

विषयः । ब्राह्मणशूद्रयोर्जन्ममरणाद्यशौचनिरूपणम् ।

---

**No. 16.** अशौचनिर्णयः By भट्टोजीदीक्षितः. Substance country made paper, 9 × 2½ inches. Folia 7. Lines 10 on a page. Extent 200 çlokas. Character Nāgara. Date ? Place of deposit, Benares, Vāmanācāryya. Appearance old. Prose. Correct.

**Beginning.** श्री गणेशाय नमः ।

पराशरः ।

आचतुर्थात् भवेत् स्रावः पातः पञ्चमषष्ठयोः ।

अत ऊर्द्ध्वं प्रसूतिः स्यादिति । तत्र स्रावे + य मासत्रये मातु स्त्रिरात्रं, आषष्ठं माससमसंख्यादिनमाशौचं । चतुर्थे चत्वारि, पञ्चमे पञ्च, षष्ठे षड् इत्यर्थः ।

**End.** प्रक्रान्तप्रायश्चित्तानां आशौचं नास्ति, प्रवृत्तचौलोपनयनादिसंस्कारेषु यज्ञदेवताप्रतिष्ठारामाद्युत्सर्गादिष्वप्येवमिति ।

**Colophon.** इति पदवाक्यप्रमाणज्ञ श्रीलक्ष्मीधरसूरेः सूनुना भट्टोजिदीक्षितेन विरचिताशौचनिर्णयः समाप्तः ।

विषयः । जननमरणाद्यशौच निर्णयः ॥

---

**No. 17.** अशौचनिर्णयः By जीवदेवः. Substance country-made paper, 8 × 2 inches. Folia 18. Lines 10 on a page. Extent 380 çlokas. Character Nāgara. Date Sm. 1793. Place of deposit, Benares, Pandit Vāmanācāryya. Appearance old. Prose and verse. Correct.

**Beginning.** श्रीगणेशाय नमः ।

... श्रीकृष्णं ढुण्ढिराजञ्च प्रणम्याशौचनिर्णयः ।
क्रियते जीवदेवेन यथामति समासतः ॥
जीर्णान्नवीनानाशौचग्रन्थानालोच्य सर्व्वशः ।
संग्रहोऽत्र कृतः सद्भिर्द्दृष्टव्योऽयं प्रयत्नतः ॥

**End.** तत्सद्मानलवर्त्ति — पण्डितजनालङ्कारचूडामणि
र्गोदातीरजनि र्गुणोच्चयमणि र्नाम्नापदेवोऽग्रणीः ।
तत्सूनोरिह जीवदेवकृतिनः सद्धर्मशास्त्रे कृता
वाशौचस्य विनिर्णयोऽयमभवत् श्रीकृष्णसंतुष्टये ॥

**Colophon.** इति श्रीमत्सकलभूमण्डलमण्डनायमानश्रीमद्विद्वद्वर्य्यापदेवसुतजीवदेवकृते स्मृतिकौस्तुभे आशौचदीधितिः समाप्तः ।
सम्वत् १७९२ । पौष शुक्लनवमी ।

विषयः । जननमरणाद्याशौच निर्णयः ।

---

**No. 18.** असगोत्रपुत्रपरिग्रहपरीक्षा By अहोबल शास्त्री. Substance country-made paper, 12 × 3 inches. Folia 5. Lines 9 on a page. Extent 90 çlokas. Character Nāgara. Date ? Place of deposit, Benares, Pandit Vāmanācāryya. Appearance old. Prose. Correct.

**Beginning.** श्रीगणेशाय नमः ।

ऋग्वेदे पञ्चमाष्टके द्वितीयप्रपाठके परिषद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम । न शेषो अग्ने अन्यजात + स्त्यचितानस्य मापथो विदुक्षः ।

**End.** अत्यन्तसंदिग्धगोत्रसंकरसंभावकासगोत्रपुत्रपरिग्रहोपेक्षापक्ष एव श्रेयान् नित्याङ्कः । इति वीतमत्सराः सुधियो विदांकुर्व्वन्तु ।

**Colophon.** इत्यसगोत्रपुत्रपरिग्रहपरीक्षा । अहोबलशास्त्रिविरचितेषा ।

विषयः । वेदप्रमाणेन दत्तकविचारः ।

---

**No. 19.** असुरखण्डम् (स्कन्दपुराणीयम्). Substance country-made paper, 14 × 5 inches. Folia 19. Lines 10 on a page. Extent 600 çlokas. Character Bengali. Date ? Place of deposit, Dinājapura. Rājavāti. Appearance fresh. Verse. Generally correct.

**Beginning.** ॐनमो गणेशाय ।

श्रीश्रीशिवप्रियं देवं देवानामधिदैवतम् ।
भजेऽहं विघ्नराजं तं विघ्नहन्तारमव्ययम् ।
ऋषय ऊचुः ॥
भगवन् सूत सर्व्वज्ञ पुराणार्थविशारद ।
शूरस्य सिंहवक्त्रस्य तारकस्य महौजसः ।
अन्येषामपि दैत्यानां उत्पत्तिञ्च तथा क्रियाम् ।
विस्तरेण वदाद्य त्वं शुश्रूषा महती च नः ॥ इत्यादि ।

End. ष्क्रूरेण सिंहवक्त्रेण तारकेण तदात्मजैः ।
बाधिताः पापिभिः सर्व्वे दिवारात्रमतन्द्रितैः ।
इति गदितमशेषं षण्मुखायासुराणाम्
निखिल उदित इन्द्रे देवपूज्येषु सम्यक् ।
तदिदमिदमिदानीमानुपूर्व्वाच्चरित्रम्
व्यपगतकलुषाणां वोऽवदं भूसुरेन्द्राः ॥

Colophon. इति श्रीस्कन्दपुराणे शङ्करसंहितायां असुरखण्डे पञ्चदशोऽध्यायः ॥
समाप्तं असुरकाण्डम् ॥ ॐ तत्सत् ॥

विषयः । तारकासुरादीनामुत्पत्त्यादि वर्णनम् ॥

---

**No. 20.** आचाररत्नम् . By लक्ष्मणः Substance country-made paper, 20 × 8 inches. Folia 166. Lines 11 on a page. Extent 4,980 çlokas. Character Nāgara. Date ? Place of deposit, Benares, Pandit Vāmanācāryya. Appearance old. Verse. Correct.

Beginning. सिन्दूरारुणगण्डं विघ्नौघतिमिरमार्त्तण्डम् ।
नतितन्तुण्डदण्डं सिद्धीशं गणपतिं वन्दे ॥ १ ॥
अतिमिरजगदुद्योतद्युमणेर्वंशांकुरः श्रीमत् ।
तज्जपति रामनाम रजनीचराणां + + + धाम ॥ २ ॥
नारायणं राजभिरर्च्चितांघ्रिं नमामि हंसीव यदीयकीर्त्तिः ।
तेजोऽन्तरान्तं महसां विभेदं स्वस्यापि कीर्त्यन्तरतश्चमाह ॥ ३ ॥
विद्याप्रद्योतनोद्योतखद्योतीकृतवादिनम् ।
पितरं रामकृष्णाख्यं वन्दे स्नेहभरान्वितम् ॥ ४ ॥
स्पर्द्धामग्निनिवेशात् उमया प्राप्तामुमासमाख्यातः ।
द्युनदीनिर्मलचित्तां मातरमेकां सतीं सदा वन्दे ॥ ५ ॥
येनोद्धृता स्वस्य कुलप्रतिष्ठा महावराहेण महीव तोयात् ।
मग्नेव निष्ठाभिससार यस्या दिवाकरं नौमि तमग्रजाख्यम् ॥ ६ ॥
अधीत्य लक्ष्मणाख्येन कमलाकरसोदरात् ।
आचाररत्नं सुधिया यथामति वितन्यते ॥ ७ ॥
तत्र परिभाषा । इत्यादि ॥

End. प्राच्यानुदीच्यानथ दाक्षिणात्यान्
ज्ञात्वा प्रतीच्यान् महतो निबन्धान् ।

आचाररत्नं सुधिया व्यधायि
श्रीरामकृष्णात्मजलक्ष्मणेन ॥
निगदितमिह साध्वसाधु वा
यदनुमतिना प्रविचार्य्य लक्ष्मणेन ।
तदखिलमपहाय दोषदृष्टिं
चिरमवलोक्य विशोधयन्तु सन्तः ॥

Colophon. इत्याचाररत्नं समाप्तिमगमत् ।

विषयः । परिभाषाप्रकरणम् । मूत्रपुरीषोत्सर्गप्रकरणम् । शौचप्रकरणम् । आचमनप्रकरणम् । दन्तधावनप्रकरणम् । गर्भादिप्रकरणम् । प्रातःस्नानप्रकरणम् । स्नानोत्तरकृत्यतिलकप्रकरणम् । सन्ध्याप्रकरणम् । होमप्रकरणम् । होमोत्तरकर्मस्नानप्रकरणम् । ब्रह्मयज्ञतर्पणप्रकरणम् । देवपूजाप्रकरणम् । वैश्वदेवप्रकरणम् । नित्यश्राद्धप्रकरणम् । भोजनप्रकरणम् । भोजनोत्तरकृत्यशयनप्रकरणम् । दुःस्वप्नशान्तिः । अशौचे कार्य्याकार्य्यनिर्णयश्चेति ।

स्मृतिसंग्रहोऽयं ॥

---

**No. 21.** आत्मप्रबोध छत्तीसी. Substance country-made paper, 14×6 inches. Folia 2. Lines 16 on a page. Extent 80 çlokas. Character Nāgara. Date ? Place of deposit, Benares, Dikmaṇḍalācāryya Mahārāja Bālacandrasūri. Appearance new. Prose. Correct.

**Beginning.** अथ जिनमताश्रित आत्मप्रबोधवत्तीसी लिख्यते । मङ्गलकथन दोहरा । श्रीपरमात्म परमपद रहे अनन्त समाय, ताकौं हौं वन्दन करौ हाथ जोर सिर नाय । अथ शुद्धात्मा वर्णनं यथा ।

**End.** दोहा कोय कहै सब आपणौ मतकी करै प्रशंस + + + मताविण सुध वचनरस पाठे नही निरस । श्रावक आग्रह सौकरे दोहादिक् षट् तीस् ज्ञानसार दधिसारलौ ए आतम वत्तीस् ।

**Colophon.** इति आत्मप्रबोध छत्तीसी सम्पूर्णम् ।

विषयः । जैन आत्मोपदेश कथनम् ।

---

**No. 22.** आनन्दरी सिन्धुः. Substance country-made paper, 15×7 inches. Folia 22. Lines 9 on a page. Extent 352 çlokas. Character Nāgara. Date ? Place of deposit, Benares, Dikmaṇḍalācāryya Mahārāja Bālacandrasūri. Appearance new. Verse. Correct.

Beginning. ॐनमः अथ आनन्दरी सिन्धुर्लिख्यते ।
बरधमान जिनवर नमु नमनानन्तनिध होय, संभ करु आनन्दतनीसान्त लाभ्यो सङ कोय । ढाल पहिली । तिनकाल तिनसने जी नयरी चम्पानाम जम्बुखामी पूजियो जी भाष सुधरमा साम ।

End. रतन हरष वाचक गुरुमाहरो हेमनन्द सुखकार, हेमकीरत गुरु वन्ध वनै कहे × × भनौ सुन श्री सार ।

Colophon. इति आनन्दरी सिन्धु सम्पूर्णम् ।

विषयः । भाषा जिनस्तुतिः ।

---

**No. 23.** **आथर्वणोपनिषद्भाष्यम्.** By **आनन्दतीर्थः.** Substance country-made paper, 8 × 2 inches. Folia 6. Lines 10 on a page. Extent 130 çlokas. Character Nāgara. Date ? Place of deposit, Benares City, Pandit Vāmanācāryya. Appearance old. Verse. Incorrect.

Beginning. श्रीवेदव्यासाय नमः, हरिः ओम् ।
आनन्दमजरं नित्यमजमक्षयमच्युतम् ।
अनन्तशक्तिसर्व्वज्ञं नमस्ये पुरुषोत्तमम् ॥

End. प्रीयतां भगवान् मह्यं प्रेष्ठप्रेष्ठतमः सदा ।
मम नित्यं नमाम्येनं परमोदारसद्गुणम् ॥

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादाचार्य्यविरचितं आथर्वणोपनिषद्भाष्यं समाप्तम् ।

विषयः । माधवमते आथर्व्वणोपनिषद्व्याख्या ।

---

**No. 24.** **आनन्दलहरीदीपिका.** By **रघुनन्दनचक्रवर्त्ती.** Substance country-made paper, 8 × $3\frac{1}{2}$ inches. Folia 57. Lines 5 on a page. Extent 600 çlokas. Character Bengali. Date ? Place of deposit, Dinājapura, Pandit Kṛṣṇadāsa Smṛtibhuṣaṇa. Appearance fresh. Prose incorrect.

Beginning. ॐ नमो गणेशाय ।
उत्थायाम्बुनिधेर्निरीक्ष्य परितः पुंसि प्रतापोद्भटा-
न्नावीक्षपधरस्य कैटभरिपोः सान्निध्यमथागता ।

अग्रेसरः सकलशास्त्रविशारदानां
श्रीचन्द्रमौलिरवदभूद्द्विजवंशमौलिः ।
यस्यैव कण्ठपदवीमलम्ब्य वाणी
स्वायातिमान महिमान मुरीकरोति ॥
श्रीचन्द्रमौलितनयः कविचक्रवर्त्ती
वाणीविनोदरसिको रघुनन्दनोऽयम् ।
श्रीशङ्करप्रतिकृतेरिह शङ्करस्य
काव्ये दुरूहविषये विदधाति टीकाम् ॥
... ... शिव इत्यादि । तत्र निर्गुणः सगुणश्चेति शिवो ज्ञेयः सनातनः
इत्यादि ।

**End.** यथा मञ्जीरशोभीति विशेषेण विग्रहवतीति व्यज्यते मन्त्रस्याक्षररूपा च उभयोरपि ध्यानतः साधकाभीष्टलाभो भवतीति सूचितम् ॥

**Colophon.** इति महामहोपाध्याय श्रीमच्चन्द्रमौलिवादीन्द्रतर्काचार्य्यात्मज श्रीरघुनन्दन-चक्रवर्त्तिरचितानन्दलहरीदीपिका समाप्ता ॥

विषयः । शङ्कराचार्य्यकृतानन्दलहर्य्या व्याख्यानम् ।

---

**No. 25.** **आपस्तम्बगृह्यकारिका.** Substance country-made paper, 12 × 5 inches. Folia 30. Lines 12 on a page. Extent 900 çlokas. Character Nāgara. Date ? Place of deposit, Benares, Pandit Vāmanācāryya. Appearance old. Verse. Correct.

**Beginning.** श्रीमहागणपतये नमः ।
हरेः पादाम्बुजं नत्वा कपर्द्यादिभिरीरितम् ।
आपस्तम्ब-गार्ह्यकर्म-प्रयोगः प्रवितन्यते ॥

**End.** स्वत्योरन्तर्द्धानभूतमश्मनि निदधाति हि ।
न तस्य चालसं कुर्य्यात् आत्मनः शुभमिच्छता ॥

**Colophon.** — — — — — — ।

विषयः । आपस्तम्बीयानां गृह्यकर्मकथनम् ।

---

**No. 26.** **आपस्तम्बगृह्यसारः.** By **योपनभट्टः** Substance country-made paper, 12 × 5 inches. Folia 31. Lines 10 on a page. Extent 930 çlokas. Character Nāgara. Date ? Place of deposit, Benares, Pandit Vāmanācāryya. Appearance old. Prose incorrect.

**Beginning.** श्रीगणेशाय नमः ।

ॐ अथ गार्ह्याणि कर्माण्युद्यापनपूर्वपश्चादः पुण्याहेषु कार्य्याणि यज्ञोपवीती दक्षिणाङ्गाचार्य कुर्य्यात् ।

**End.** आपस्तम्बमुनिप्रणीतमखिलं संगृह्य गृह्यं तथा

रुद्रस्वामि कपर्द्दि × × × प्रोक्ता मया कारिका ।

तत्र स्थानामटति × × तां सुखकरः सर्व्वप्रयोगकृति

श्रीयोपनसूरिविदूषा संगृह्य सारः कृतः ।

**Colophon.** इति श्रीमद्रामभट्टोपाध्यायश्रीमदा‸न्त्र योपनभट्टविदुषा रचितो गृह्यसारः समाप्तः ।

विषयः । संक्षेपेणापस्तम्बसूत्रोक्तगृह्यकर्म्मकथनम् ।

---

**No. 27.** **आपस्तम्बसूत्रप्रयोगवृत्तिः.** By **तालवृन्तनिवासी** Substance country-made paper, 12 × 5 inches. Folia 43. Lines 10 on a page. Extent 890 çlokas. Character Nāgara. Date Sm. 1776. Place of deposit, Benares, Pandit Govinda Bhaṭṭa. Appearance old. Prose. Correct.

**Beginning.** उक्थ्यः षोडशतिरात्राग्नोर्यामश्च । उक्थ्यग्रहः तृतीयसवनेऽयत्र गृह्यत इत्युक्थ्यः । तस्य कर्म सर्व्वमग्निष्टोमवत् । सोमेन यक्ष्ये ज्योतिष्टोमेनोक्थ्येन इहत्सामा द्वादशशतदक्षिणेन पशुमान् भूयासमिति । नित्य इति केचित् ।

**End.** देवता सर्व्वप्रायश्चित्तं च प्रजापतिर्द्देवता तत्र श्लोकौ ।

शालामुखीयोत्तरवेदिवक्त्रौ मध्ये रथादे गमने तु पूर्व्वम् ।

उद्गाय पश्चान्नयनं प्रदिष्टम् ।

इदं शिष्टानलमध्ययाने,

शान्तेरथाद्योत्तरवेदिका तु रथादियाने पथिमद्गुणेष्टिः ।

शान्तस्य चाग्नीध्रगतस्य योनिः ।

**Colophon.** इत्यापस्तम्बसूत्रप्रयोगवृत्त्यां तालवृन्तनिवासिकृतायां सोमप्रायश्चित्तानि समाप्तानि । समाप्तः पञ्चदशप्रश्नः दशमः पटलः । सम्वत् १७७६ । श्रावण कृष्णगुरौ ।

विषयः । आपस्तम्ब उक्थ्यप्रश्नव्याख्या ।

---

**No. 28.** आपस्तम्बाह्निकम् . By गोवर्द्धनभट्टः Substance country-made paper, 12 × 5 inches. Folia 65. Lines 12 on a page. Extent 1,536 çlokas. Character Nāgara. Date Sm. 1837. Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance old. Prose. Correct.

**Beginning.** ( अस्य प्रथमपत्रं नास्ति )

उत्तिष्ठन् गुरोः समीपे यज्ञशर्म्माहं भो इति ब्रुवन् इत्युज्ज्वलाव्याख्यानं दक्षिणं बाहुं श्रोत्रसमं कृत्वा प्रसार्य्य ब्राह्मणोऽभिवादयेत् । इति गुरुराचार्य्यः ।

**End.** अग्न्यगारे गवां गोष्ठे ब्राह्मणानां च सन्निधौ ।
आहारे जपकाले च पादुके परिवर्ज्जयेत् ॥

**Colophon.** इति कविमण्डन-गोवर्द्धनभट्टकृतापस्तम्बाह्निकं समाप्तम् । सम्वत् १८३७ । वैशाख शुक्लः ।

विषयः । आपस्तम्बमतानुयायिनी दैनिकक्रिया ।

---

**No. 29.** आपस्तम्बधर्म्मसूत्रभाष्यम् . Substance country-made paper, 15 × 5 inches. Folia 169. Lines 10 on a page. Extent 3,056 çlokas. Character Nāgara. Date ? Place of deposit, Benares, Paṇḍit Govinda Bhaṭṭa. Appearance old. Verse. Correct.

**Beginning.** प्रणिपत्य महादेवं हरदत्तेन धीमता ।
धर्माख्य-प्रश्नयोरेषा क्रियते वृत्तिरुज्ज्वला ॥

अथातः सामयाचारिकान् धर्मान् व्याख्यास्यामः । अथशब्द आनन्तर्य्ये वर्त्तते । अतः शब्दो हेतौ । उक्तानि श्रौतानि, गार्ह्याणि च कर्माणि तानि च वक्ष्यमाणस्यादधर्मानपेक्षन्ते ।

**End.** सर्व्वजनेष्वेकान्तसमाहितमार्य्याणां वृत्तं स्वधर्मनिरतानां सम्यग्विनीतानां वृद्धानां आत्मवतां अलोलुपानां अदाम्भिकानां वृत्तसादृश्यं उ......त्वसुभौ लोकावभिजयति । सर्व्वजनपदेष्वित्यादि अभिजयति इत्यन्तं गतं स्तोभ्यः (अग्रे किञ्चिदस्ति तत्तु कीटदष्टत्वेनातिशयास्पष्टत्वान्न लिखितम्) ।

**Colophon.** इति श्रीहरदत्तमिश्रविरचितं धर्मप्रश्नव्याख्यानं समाप्तम् ।

विषयः । आपस्तम्बधर्मसूत्रव्याख्या ।

---

**No. 30.** **आपस्तम्बसूत्रोक्तसंस्कारप्रयोगः.** By **सिंहभट्ट.** Substance country-made paper, 13×4½ inches. Folia 59. Lines 13 on a page. Extent 1,536 çlokas. Character Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance old. Prose. Incorrect.

**Beginning.** श्रीहरिः शरणम् ।

महादेवमहं वन्दे गुरुतात महर्निशम् ।
सहायं महतां शश्वद्हार्य्यदुहितुः पतिम् ॥
पञ्चलिङ्गवाश्योहं नत्वा वाणीं हरिं विधिम् ।
प्रयोगपद्धतिं वक्ष्ये सूत्रभाष्यानुसारतः ॥

**End.** अस्मिन्नर्थे त्रिकाण्डीकारिका,—
लौकिकाग्नावितरोद्वाहाखण्टह्यानलद्वयम् ।
यद्गस्वामिमतेनाथ तत्संसर्गविधिं वदेत् ॥ (इतो नास्ति)

विषयः । आपस्तम्बीयानां संस्कारविधिः ।

---

**No. 31.** **आयुःप्रबोधिनी.** By **राधाकृष्ण.** Substance country-made paper, 13×3 inches. Folia 7. Lines 5 on a page. Extent 110 çlokas. Character Bengali. Date ? Place of deposit, Zilla Medinīpura, Post Office Garvetā, Grāma Khunverā, Late Paṇḍit Rāmatāraṇa Çiromaṇi. Appearance old. Verse. Correct.

**Beginning.** ॐ नमो रामाय ।

गुरुं रघुपतिं नत्वा परात्महितहेतवे ।
राधाकृष्णो द्विजस्तक्रे या × नायुः प्रबोधिनीम् ॥
तिष्ठन्ति तुङ्गे परमे स्वकीये
विरोचनाद्या यदि सप्त खेटाः ।
तदा प्रदद्युः क्रमतो यथा ते ॥
पिण्डायुरब्दान्न + + + + + ॥
वाणेन्नणे पञ्चदशद्विचन्द्रौ
+ + + + + + + ।
स्थिताः सुनीते यदि ते प्रदद्यु
स्तदा हि पूर्व्वादितवत्सराद्धं ॥ इत्यादि ।

End. नाक्षत्रं सावनंवायुः पृथक् कृत्वा विचक्षणः ।
एवं प्रत्यं नगैर्हृत्वा लब्धं ततो द्विधार्पयेत् ॥
षष्ट्यप्तब्ध्यैं रथैकस्मिन्नब्द्युक्ता परेण तु ।
तदायुरपरं क्षीनं सौरं वर्षादिकं भवेत् ॥

Colophon. इत्यायुः प्रबोधिन्यामन्तर्दशाध्यायश्चतुर्थः । समाप्तश्चायं ग्रन्थः ।

विषयः । पिण्डायुर्दायाध्यायः प्रथमः । अंशायुर्दायाध्यायो द्वितीयः । दशपंक्त्याध्यायस्तृतीयः । अन्तर्दशाध्यायश्चतुर्थः ।

---

No. 32. आर्य्यवसुधारा. Substance country-made paper, 10 × 3½ inches. Folia 5. Lines 13 on a page. Extent 150 çlokas. Character Nāgara. Date ? Place of deposit, Benares, Paṇḍit Dikmaṇḍalācāryya Mahārāja Bālacandrasūri Appearance new. Verse. Correct.

Beginning. ऍं नमः ।
संसारद्वयदैन्यस्य प्रत्यहं विदिनावहे ।
वसुधारे सुधाधारे नमस्तुभ्यं कृपामये ॥
एवं मया श्रुतमेकस्मिन् भगवान् कौशाम्ब्यां महानगर्य्यां विहरति स्म ।

End. आयुष्मानानन्दस्ते च भिक्षवस्ते च बोधिसत्त्वाः सा च सर्व्वावती पर्षत्
सदेवमानुषासुरगन्धर्वश्च लोको भगवतोभाषित मभ्यनन्दन्निति ।

Colophon. इति आर्य्यवसुधारास्तोत्रं सम्पूर्णम् ।

विषयः । बौद्धवसुधारामाहात्म्यम् ।

---

No. 33. आर्य्यासप्तशतीटीका "व्यङ्ग्यार्थदीपनम्". Substance country-made paper, 12 × 4 inches. Folia 96. Line 8 on a page. Extent 2,016 çlokas. Character Nāgara. Date ? Place of deposit, Benares city, Govinda Bhatta. Appearance old. Prose. Correct.

Beginning. श्रीरामः शरणं मम
सर्वे साधुजनाः सदायतहृदा सत्सम्प्रदायादलम्
यद्ज्ञानाय कणादगौतममतान्यालोच्य गलार्थदान् ।
वेदान्तं परिशीलयन्ति रहसि स्वानन्दकन्दाकरम्
वन्दे तं जगदीश्वरं दयितया सानन्दयालिङ्गितम् ॥

यत्पादाम्बुजमज्ञभूप्रभृतयो देवाः सदैवान्तरे
ध्यायन्ति प्रलपयन्ति दुःखनिवहं लीलामनुष्याकृतिम् ।
फुल्लेन्दीवरभिन्ननेत्रमतसीपुष्पावभासं लस-
च्छ्रीरामं कलयामि चेतसि चिरं चैतन्यमात्रात्मकम् ॥

End. नेत्रत्रिभागमात्रेण कटाक्षमात्रेण न निरूपितोऽसि न विलोकितोऽसि ।
एकान्तः करणेन सा लभ्यत्यन्तमनुराग(इतो नास्ति) ।

विषयः । गोदावरीपरिसरालङ्कृतपुण्यस्तम्भस्थितिविराजमान-नीलकण्ठपण्डिततनूजबाल-पण्डितात्मज-तिमाजिपण्डिताङ्गजानन्तपण्डितकृतगोवर्द्धनसप्तशती व्याख्यानं ।

( असम्पूर्णोयं ग्रन्थः । )

---

**No. 34.** आश्वलायनगृह्यकारिका. Substance country-made paper, 8 × 3 inches. Folia 41. Lines 9 on a page. Extent 875 çlokas. Character Nāgara. Date, Sm. 1787. Place of deposit Benares, Paṇḍita Vāmanācārrya. Appearance, old. Verse. Correct.

Beginning. श्रीमन्महागणपतये नमः ।

आश्वलायनमाचार्य्यं नत्वा तद्गृह्यकर्मणाम् ।
प्रयोगं वच्मि केषांचिद् वृत्तिकारादिभाषितम् ॥

End. विलोक्य सर्वसूत्राणि नानाऋषिमतानि च ।
ज्ञानार्थं याज्ञिकानान्तु मयोक्ता गृह्यकारिका ॥

× × × × ×

उक्तान्यत्र च कर्माणि शाकल्यवचनोऽब्रवीत् ।

Colophon. इत्याश्वलायनगृह्यकारिकायां चतुर्थोध्यायः । सम्वत् १७८७ ।

विषयः । संक्षेपेण आश्वलायनगृह्यसूत्राणां व्याख्यानम् ।

---

**No. 35.** आश्वलायन स्मृतिः. Substance country-made paper, 12 × 5 inches. Folia 42. Lines 14 on a page. Extent 1260 çlokas. Character Nāgara. Date ? Place of deposit Benares, Paṇḍit Vāmanācāryya. Appearance old. Verse. Correct.

Beginning. आश्वलायनमाचार्य्यं नत्वापृच्छन् मुनीश्वराः ।
द्विजधर्मान् वदास्माकं स्वर्गप्राप्तिकरान् मुने ॥

इति तद्वचनं श्रुत्वा स्वधर्मान् मुनिरब्रवीत् ।
लोकस्य च हितार्थाय आत्ममार्गरतस्य च ॥
स्नानं संध्या जपो होमः स्वाध्यायाभ्यसनं तथा ।
माध्याह्निकक्रियाः पञ्च-यज्ञस्य तिथिपूजनम् ॥

End. वैकुण्ठे विष्णुपूजायां युगेनैकेन यत्फलम् ।
तद्दर्शपौर्णमासाभ्यां सकृदाप्नोति वै द्विजः ॥

Colophon. इत्याश्वलायनीये धर्मशास्त्रेऽग्निसंयोगनिर्णयः द्वाविंशोध्यायः । इत्याश्वलायनस्मृतिः समाप्तिमगमत् ।

विषयः । प्रथमे सदाचारनिर्णयः । द्वितीये स्थालीपाकादि सर्वहोमप्रकृतिः । तृतीये गर्भाधानं । चतुर्थे पुंसवनं सीमन्तश्च । पञ्चमे जातकर्म नामकरणञ्च । षष्ठे अन्नप्राशनं । सप्तमे चौड़म् । अष्टमे उपनयनम् । नवमे वेदव्रतम् । दशमे उपाकर्म उत्सर्जनञ्च । एकादशे गोदानम् । द्वादशे विवाहः । त्रयोदशे नान्दिश्राद्धादि । चतुर्दशे पैतृमेधिकपरिभाषा । पञ्चदशे पैतृमेधिकविधिः । षोड़शे वर्णधर्मः । सप्तदशे श्राद्धविधिः । अष्टादशे श्राद्धपरिभाषा । ऊनविंशे तीर्थप्रकरणम् । विंशे प्रायश्चित्तम् । एकविंशे जातिनिर्णयः । द्वाविंशे अग्निसंयोगश्चेति ।

---

**No. 36. आश्वलायनसूत्रोक्तश्राद्धसंकल्पः.** Substance country-made paper, 8×3 inches. Folia 5. Lines 10 on a page. Extent 80 çlokas. Character Nāgara. Date Sm. 1892. Place of deposit, Benares, Paṇḍit Vāmanācārrya. Appearance new. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

सूत्रोक्त श्राद्धसंकल्पो लिख्यते । पवित्रपाणिः प्राणानायम्य देशकालौ स्मृत्वा पुरुरवोमाद्रवससंज्ञकानां विश्वेषां देवानां प्राचीनावीती ।

End. अद्य मे सफलं जन्म इति ब्राह्मणान् क्षमाप्य यस्य स्मृत्येति श्रीकृष्णार्पणम् । यथाचारं वैश्वदेवं कृत्वा इष्टैः सह भुञ्जीत । परेऽह्नि तर्पणं कुर्यात् ।

Colophon. इति सूत्रोक्तश्राद्धसंकल्पःसमाप्तः । सम्वत् १८९२ । भाद्रपद ११ भृगु वासरे तद्दिने समाप्तः ।

विषयः । आश्वलायनशाखीयानां श्राद्धप्रयोगविधिः ।

---

**No. 37.** आहिताग्नेर्दाहाग्निनिर्णयः. By रामभट्ट. Substance country-made paper, 12×4 inches. Folia 21. Lines 10 on a page. Extent 425 çlokas. Character Nāgara. Date Sм. 1870. Place of deposit Benares, Paṇḍit Vāmanācāryya. Appearance new. Prose. Correct.

**Beginning.** श्रीगणेशाय नमः ।

अथाहिताग्नेर्दम्पत्योर्दाहाग्निं निर्णेतुं तदुपयोगित्वेन तावत्तयोः कर्म्माधिकारो विविच्यते । तत्र स्वर्गकामो यजेतेत्यादौ स्वर्गकामपदोपात्तयागजन्य-फलभोक्तृत्वेन भावनाश्रियागादिनिर्वर्त्तकत्वेन च द्विधाधिकारः ।

**End.** इषाब्दे बहुले चैत्रे योगिन्याम्बपुरे वसन् ।

होसिङ्गभट्टरामेण कृतो दाहाग्निनिर्णयः ॥

आहिताग्नेरिति शेषः ।

पुनश्च, चित्रभान्वब्दे श्रावणे ऽपरपक्षके ।

ब्रह्मपुरस्थितिं कृत्वा ग्रन्थोऽयं सुपरिष्कृतः ॥

**Colophon.** इति श्रीमद्होसिंगोपनामक-भट्टविश्वनाथात्मज-भट्टसुन्दरलानुज-भट्टरामभट्टकृत शाकल्येनाहिताग्नेर्दाहाग्निनिर्णयः समाप्तः । सम्बत् १८७० ।

विषयः । आहिताग्नीनां दाहाग्न्यादिनिरूपणं ।

---

**No. 38.** उणादिवृत्तिः By शिवराम. Substance country-made paper, 12×3 inches. Folia 19. Lines 5 on a page. Extent 500 çlokas. Character Bengali. Date ? Place of deposit Balihāra Babu Varadākānta Cakravartti. Appearance old. Verse. Incorrect.

**Beginning.** ॐ नमो गणपतये ॥

प्रणम्य वागीशपदारविन्दं सारस्वतव्याकरणस्य सन्मतम्

उणादिवृत्तिः प्रतिवद्धि + + + वितन्यते श्रीशिवरामशर्म्मणा ॥

कृत्प्रभृतिभ्यो धातुभ्य उण्प्रत्ययः स्यात् । करोति कार्य्यं कारुः शिल्पिनि कारके । इत्यादि ।

**End.** शेषः खण्डितः ।

विषयः सारस्वतीयोणादिप्रत्ययकथनम् ॥

---

**No. 39.** **उत्तराग्रन्थभाष्यम्.** By सायनाचार्य्यः Substance, country-made paper, 15 × 5 inches. Folia, 171. Lines, 11 on a page. Extent, 9,524 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Govinda Bhaṭṭā. Appearance, new. Prose. Correct.

**Beginning.** वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युः स्तं नमामि गजाननम् ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
तत्कटाक्षेण तद्रूपं दधत् बुक्क-महीपतिः ।
आदिशत् सायनाचार्य्यं वेदार्थस्य प्रकाशने ॥

**End.** अरिष्टनेमिः । न रिष्टा अरिष्टा अव्ययपूर्व्वपदप्रकृतिस्वरत्वं । अरिष्टा नेमिर्यस्य स तथोक्तः । बृहस्पतिः । तद्बृहतोः करपत्योरिति सुट् तलोपौ, उभे वनस्पत्यादिष्विति पूर्व्वोत्तरपदयोर्युगपत् प्रकृतिस्वरत्वं । इत्येकविंशेऽध्याये प्रथमः खण्डः ।

**Colophon.** इति श्रीमत् सायनाचार्य्यविरचिते माधवीये वेदार्थप्रकाशे उत्तराग्रन्थे एकविंशोऽध्यायः सम्पूर्णः ।

विषयः । सामवेदान्तर्गत-उत्तराग्रन्थव्याख्या ।

---

**No. 40.** **उपाकरणप्रयोगः.** Substance, country-made paper, 10 × 4 inches. Folia, 12. Lines, 10 on a page. Extent, 1,828 çlokas. Character, Nāgara. Date Sm. 1882. Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

**Beginning.** श्रीगणेशाय नमः ।
अध्यायानामुपाकर्म श्रावण्यां श्रवणेन तु ।
तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते ॥

**End.** अपः स्पृष्ट्वा प्रायश्चित्तादिहोमशेषं समाप्य ततः (..) प्रीत्यर्थं ब्राह्मणान् भोजयेत् । कर्मद्वय मिदं केचित् लौकिकाग्नौ प्रयुञ्जते ।

**Colophon.** इत्युपाकरणप्रयोगः समाप्तः ।
स्मृतकाले उपाकर्म गते मास-चतुष्टये ।
नवयज्ञोपवीतानि धृत्वा जीर्णानि संत्यजेत् ॥ सम्वत् १८९८ ।

विषयः । आश्वलायनशाखीयानां श्रावण्यां उपाकरणविधिः? ।

---

**No. 41.** उन्मार्गभञ्जनम् . By तुम्बरः Substance, country-made paper, 10×4 inches, Folia, 5. Lines, 15 on a page. Extent, 225 çlokas. Character, Nāgara. Date Sм. 1891. Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

**Beginning.** श्रीगणेशाय नमः ।

देवी वाचामपारा वदनसदनगा खेलते यत्कटाक्षा-
द्राम्यं तेजःकदम्बमतिघनममलं कोटिचन्द्रप्रभासम् ।
शान्तं चन्द्रावतंसं तदमितमहिमानन्दमोदैककन्दम्
वन्दे हस्तारविन्दं हरिहरशरणीभूतपादारविन्दम् ॥

**End.** गीर्व्वाणवाङ्मम सुखान्निरगाद्यदेष
यो (.) जसा मधुरकोमलकान्तवाक्या ।
नारायणस्मरणलालसमानसस्य
श्रीत्र्यम्बकस्य महिमा पदपङ्कजस्य ॥

**Colophon.** इति श्रीतिमाजिरघुनाथगुरुपादपद्माराधकस्तुम्बर (.) कृतोन्मार्गभञ्जनं समाप्तम् । समाप्तश्चेदं श्रावणकृष्णनवम्याम् । सम्वत् १८९१ ।

विषयः । माधवमतानुयायि पिष्टपशुखण्डनोन्मार्गभञ्जनम् ।

---

**No. 42.** उपदेशतरङ्गिनी . Substance, country-made paper, 12×4½ inches. Folia, 60. Lines, 17 on a page. Extent, 3,300 çlokas. Character, Nāgara. Date Sм. 1740. Place of deposit, Benares, Dikmaṇḍalācāryya, Mahārāja Bālacandra. Appearance ,old. Prose and Verse. Incorrect.

**Beginning.** श्रीनाभेयः (...) दमेयाः परमारमाः ।
यन्नामध्यानतः सर्व्वसिद्धयः, स्युः स्वयम्वराः ।
स श्रीपार्श्वप्रभुर्भूयाद्भक्तानां भुरि (. ) तीयः ।
यस्य प्रभावात् (. .) शेषोऽभूद् भूमिपुङ्गवः ॥

**End.** यथा श्रीभोजेन राजपाटिकां कृत्वा पश्चाद्दलमानेर्न्तुं सङ्कीर्णमार्गे सम्मुखागतः कश्चिद्न्धोऽग्रसैन्यैर्निर्भत्स्यमानोऽपि दुष्टो मातुल भवतामस्ति सौख्यं इत्यालापितः, ततस्तेनोक्तं, भो जातस्मर त्वत्प्रसादात् भविष्यति । राज्ञोक्तं ; कथं ज्ञायते, (. .) तेनोक्तं मधुरभाषया । तुष्टेन राज्ञा स्वराजवाहनं ग्रामाधिपत्यञ्च दत्तम् ।

**Colophon.** इति उपदेशतरङ्गिन्यां धर्मोपदेशः। सम्वत् १७४०।

विषयः। जैनधर्मोपदेशकथनम्।

---

**No. 43.** उपदेशसमुच्चयः By सोनफूल उपाध्याय. Substance, country-made paper, 12×3 inches. Folia, 23. Lines, 5 on a page. Extent, 352 çlokas. Character, Bengali. Date Sk. 1694. Place of deposit, Dinājpur, Paṇḍit Kṛṣṇadāsa Smṛtibhūsaṇa. Appearance, tolerable. Prose and Verse. Incorrect.

**Beginning.** आद्यं खण्डितम्॥

**End.** अपि च, वदन्तोऽन्ये मुक्तिः परमसुखसाक्षात्कृतिरिति।
तवेतावन्मन्यादृश मन्मथमर्द्दन (?) निजमते।
न तत्र क्रपीश त्रिनयना समेष्या क्षितितले।
परन्तु त्वद्दास्यं सततमिह याचे सुखवहम्॥

**Colophon.** इत्युपदेशसमुच्चये भजनोपदेशो नाम अष्टमोपदेशः॥
श्रीमद्दर्पणकारपण्डितवरोदामोदरोऽभूत्ततः।
जातः पण्डितः कृष्णदेव श्रीहतः पुत्रस्त्वनन्तः कृती॥
तत्पुत्रो भुवि रामशेखरबुधो रुद्रावतारः स्वयं।
तत्पुत्त्रोऽत्र कृती कविर्विजयते श्रीसोनफूलः सुधीः॥
श्रीसोनफूलोपाध्यायकृत उपदेशसमुच्चयग्रन्थः समाप्तः॥शक १६९४॥

विषयः। प्रथमोपदेशः खण्डितः। २ये उपदेशे अन्यापदेशकथनम्। ३। ४ उपदेशयोः सज्जनदुर्ज्जनादिनिरूपणं राजवर्णनञ्च। ५ मे उपदेशे सम्पत्त्युपदेशकथनम्। ६ ष्ठ उपदेशे रसोपदेशकथनम्। ७ मे उपदेशे भक्त्याबोपदेशकथनम्। ८ मे उपदेशे भजनोपदेशकथनम्॥

---

**No. 44.** उभयतोमुखीगोदानप्रयोगः. Substance, country-made paper, 8×3 inches. Folia, 6. Lines, 7 on a page. Extent, 80 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, new. Prose. Correct.

**Beginning.** श्रीगणेशाय नमः।
अथोभयतोमुखीगोदानप्रयोगः। आसन्नप्रसवां गां ज्ञात्वा दाता शुचिः प्राङ्मुख उपविश्य देशकालौ स्मृत्वा अमुकगोत्रामुकशर्म्मा सर्व्वपापक्षयपूर्व्वकं विष्णुप्रीतिकामः उभयतोमुखीगोदानं करिष्ये।

End. मतः कर्म्मस्वरार्पणं कृत्वा द्वादशब्राह्मणान् पायसान्नेन भोजयित्वा स्वयं पायसान्नं भक्षयेत् ।

Colophon. इत्याथर्व्वण-परिशिष्ट-हेमाद्रि-मयूख-चन्द्रिकोद्धृतोभयतोमुखीगोदानप्रयोगः ।

विषयः । आसन्नप्रसवगोदानविधिः ।

---

**No. 45.** ऋषभगीता. Substance, country-made paper, 12 × 4½ inches. Folia, 6. Lines, 10 on a page. Extent, 120 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Govinda Bhaṭṭa. Appearance, new. Prose. Correct.

Beginning. पितोवाच । यदुक्तं भवतायुष्मन् ऋषभो निष्परिग्रहः ।
बभूव योगिनामाद्योऽवतारस्त्वष्टमो हरेः ॥
तद्ब्रूहि विस्तरेणैव स्वरूपं तस्य योगिनः ।
यच्च कर्मफलासङ्गः सर्व्वान्तर्भावमाश्रितः ॥
किंधर्माभूदसौ तस्य कदाभूदिति वासना ।
कथं स परमार्थेति निस्यातो नाभिसम्भवः ॥

End. एतत्पुराण-पुरुषस्य समस्तपाप-
विच्छेददं चरितमद्य मयोदितं ते ।
शृण्वन्ति ये भवभयं परिमुच्य तेषां,
निःशेषपापविलयं कुरुते मुरारिः ॥

Colophon. इति ऋषभगीता समाप्तिमगमत् ।

विषयः । ऋषभचरित्रकथनव्याजेन ब्रह्मविद्योपदेशः ।

---

**No. 46.** ऋषभजिनस्तुतिः. Substance, country-made paper, 11 × 4 inches. Folia, 3. Lines, 9 on a page. Extent, 75 çlokas. Character, Nāgara. Date Sm. 1659. Place of deposit, Benares, Diṇmaṇḍalacāryya Mahārāja Bālacandra. Appearance, old. Verse. Correct.

Beginning. पढिलउ पणमिय देव परमेसरसेत्तं ।
जधणिय पय पङ्कय रयसे ॥
वन्दिहि वीर घिसुत्त ।
सुत्तनीय जिन्वर वड्डमङ्गठान ॥

**End.** इय रिसह जिनवर सिद्धिसरवर सुन्दरिवर सुन्दरो ।
सिरि विमलभूधर धवलसिन्धुरखन्धवास पुरन्दरो ।
सेवय सभासुर सुनिय भासुर गुरु भवासुर गञ्जनो ।
मद्दा सुविद्दि वासन देउ सासन विजई तिलउ निरञ्जनो इति ॥

**Colophon.** इति ऋषभजिनस्तवनं सम्पूर्णम् ! सम्वत १६५६ ।

विषयः । जैनमते ऋषभदेवस्तुतिः ।

---

**No. 47.** **ओघनिर्युक्तिः .** Substance, country-made paper, 12 × 4 inches. Folia, 13. Lines, 18 on a page. Extent, 780 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Dinmaṇḍalācāryya Mahārāja Bālacandra. Appearance, old. Verse. Correct.

**Beginning.** श्रीपार्श्वजिनं प्रणम्य अरिहन्ते वन्दित्ता चउद्दस, पूव्वी तहेव दस पूव्वी एक्कार सङ्ग सुत्तथ धावरे सभ्यसाङ्ग्य ।

**End.** एसा ओ (...) पूइवि ग्रुद्दसञ्जना इन्ना एक्कारसद्दिं रात्तद्दिं सद्दिय द्दि एद्दिं सङ्गद्दिया ।

**Colophon.** ईति ओघनिर्युक्ति समाप्ता ।

विषयः । जैनसाधुसमाचारकथनम् ।

---

**No. 48.** **कर्पूरादिस्तवटीका** By **रामकिशोर .** Substance, country-made paper, 14 × 2 inches. Folia, 10. Lines, 7 on a page. Extent, 325 çlokas. Character, Bengali. Date ? Place of deposit, Upalatāgrāma, Post office Mehār, Zilla Comilla. Paṇḍit Jagadbandhu Tarkavāgīça. Appearance, fresh. Prose. Generally correct.

**Beginning.** श्रीकालीजयति ।
नतमूर्द्धविरिञ्च्यादि वृन्दारकवरव्रजम् ।
कुरुतां भवतां भव्यं भवानीचरणाम्बुजम् ॥
काल्या रामकिशोरेण बालानामवबुद्धये ।
महाकालप्रणीतस्य स्तोत्रस्यार्थः प्रकाश्यते ॥
तत्रायस्तोकपञ्चकेन श्रीमद्दक्षिणकालिकाया द्वाविंशत्यक्षरमन्त्रमुद्धरन् महाकालः स्तौति कर्पूरमित्यादिना । इत्यादि ।

**End.** केलीति। एवं केलिकलया क्रीड़ाकलया विशिष्टः सन् चिरं चिरकालं जीवन्मुक्तो भवति। तथा प्रतिजनुः प्रतिजन्म भोक्ता भवति। प्रतिजनुरिति जनुर्जनुः वीप्सयाव्ययीभावः। जनुर्जननजन्मानीत्यमरः। इति।

**Colophon.** यामाराध्य पितामहादिविबुधाः सृष्ट्यादिकं कुर्व्वते
यां ध्यायन्ति सदैव योगिनिवहा ब्रह्मस्वरूपां पराम्।
नत्वाऽज्ञानतमिस्रनाशतरणिं श्रीकालिकां तां द्विज
ष्टीकां रामकिशोरनामक इमां तस्याः स्तुते निर्म्ममे॥
मया विरचिता ह्येषा कर्पूरादिप्रबोधिनी।
तनोतु मुदमज्ञानां धीमतां वा कृपावताम्॥
अज्ञानाद्वा प्रमादाद्वा स्खलितं यद् बभूव मे।
कृतिभिः शोधनीयं तत् कृपया बहुदर्शिभिः॥
इति लोचनगोचरीकृतब्रह्महरिहरादिगीर्व्वाणगणदुर्लभापारसकलकरणवृत्तियोगिगणमनोगोचरभवानीपदारविन्दकानिर्व्वचनीयमहिमत्रिभुवनविदितसर्व्वविद्यासन्तति-श्रीरामकिशोरशर्म्मविरचिता शिवांशभूतभगवन्महाकालविरचित-श्रीमद्दक्षिणकालिकास्तुतिः कर्पूरादिप्रबोधिनी नाम सभाप्रिपदमारूढ़ा॥

विषयः। कर्पूरादिस्तवव्याख्यानम्।

---

**No. 49.** **कर्म्मप्रकृतिटीका।** Substance, country-made paper, 11 × 4 inches. Folia, 12. Lines, 11 on a page. Extent, 350 çlokas. Character, Nāgara. Date ? Place of deposit, Dikmaṇḍalācāryya Mahārāja Bālacandra Suri. Benares City. Appearance, fresh. Prose. Correct.

**Beginning.** ॐ नमो वीतरागाय।
प्रणम्य कर्म्मद्रुमचक्रनेमिं नमस्कराधीशमरिष्टनेमिं।
कर्मप्रकृत्याः कियतां पदानां सुखावबोधाय करोमि टीकाम्॥

**End.** इति विश्वजनप्रसावकाशमाश्रङ्क्य ग्रहणाग्रहणप्रयोग्याः पुद्गलवर्गणाः प्ररूपयति।

**Colophon.** असम्पूर्णोऽयम् ।

विषयः । जैनकर्मप्रकृतिव्याख्या ।

---

**No. 50.** कलापव्याकरणोत्पत्तिप्रस्तावः By वनमालिद्विजः. Substance, country-made paper, 14×3 inches. Folia, 10. Lines, 5 on a page. Extent, 150 çlokas. Character, Bengali. Date ? Place of deposit, Upalatāgrāma, Post office Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgīça. Appearance, old. Verse. Generally correct.

**Beginning.** प्रणम्य शिवया सार्द्धं शिवं शिवप्रदायकम् ।
ज्ञानदं सर्व्वतत्त्वज्ञं सुरासुरनमस्कृतम् ॥
कलापाख्यं महाशास्त्रं विस्तृतं सर्व्ववर्म्मणा ।
कृतः कथं कृतं तेन प्रस्तावमतिसुन्दरम् ॥
तमेवाहं प्रवक्ष्यामि बालानामवबुद्धये ॥ इत्यादि ।

**End.** संक्षेपाद्रचितं किञ्चिद् गुरुपादप्रसादतः ।
क्षाम्यगुणैर्बुधैः सर्व्वैर्ज्ञायताञ्च विशेषतः ॥

**Colophon.** इति श्रीवनमालिद्विजविरचिते कलापव्याकरणोत्पत्तिप्रस्तावे पञ्चमः परिच्छेदः समाप्तः ।
उमामहेशं भुवनैकसारं हंसासनस्थं × × × स्वरूपम् ।
सुधांशुसूर्य्याग्निसमप्रदीप्तिं गुणत्रयात्मानमहं भजामि ॥
परात्पर जगद्बन्धो त्वदीयचरणाम्बुजे ।
स्थानं मे दीयतामन्ते कृपया करुणानिधे ॥

विषयः । आसीत् पुरा शालवाहनो नाम राजा स कदाचित् महादेव्या सह सरसि विहर्त्तुं गतवान् तत्रासौ महिषीं प्रति प्रीतिपरायत्तो जलोत्क्षेकं कुर्व्वन्नतिशयजलप्लावितया महादेव्या "मोदकं देहि राजन्निति" पुनः पुनर्व्याहृतो बहुशो महिषीप्रीतिमिच्छन् मोदकं दत्तवान् तेन च तयातिनिर्भयमतिनिष्ठुरं निर्भर्त्सितो राजा मा उदकं देहीति प्रकृतमर्थमननुसरन् नितरां लज्जापरवशो जीवितुमुत्स्रष्टुमुपचक्रमे तत्र तथाविधमवलोक्य राजानं राज्ञी समानीय सर्व्ववर्म्माभिधेयं कमपि पण्डितवरं प्रेषितवान् राज्ञः परिशान्तनाय स च सर्व्ववर्म्मा अचिरेणैव कालेन राजानं व्याकरणसंस्कृतं कर्त्तुं प्रतिज्ञाय महादेवस्याराधनां कृतवान् देवस्य च शम्भोरनुज्ञया कार्त्तिकेयमाराध्य शिखिवाहनस्य शिखिनां कलापात् व्याकरणं संगृह्य राजानमल्पकालेनैव व्याकरणाभिज्ञं कृतवानित्यस्य कलाप इति नाम आसीदिति कथनं ।

---

**No. 51.** कवितारत्नाकरः. Substance, country-made paper, 14×3½ inches. Folia, 7. Lines, 11 on a page. Extent, 300 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post office Gurvetā, Grāma Bhaṭṭagrām, Paṇḍit Rāmhridaya Bhaṭṭachāryya. Appearance, fresh. Verse. Generally correct.

**Beginning.** श्रीरामः । अथ कवितारत्नाकरः ।

माधवो माधवो वाचि माधवो माधवो हृदि ।
स्मरन्ति साधवः सर्व्वे सर्व्वकार्य्येषु माधवम् ॥
देवे तीर्थे द्विजे मन्त्रे दैवज्ञे भेषजे गुरौ ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥
न माता शपते पुत्त्रं न दोषं लभते मही ।
न हिंसां कुरुते साधु र्न देवः सृष्टिनाशकः ॥
न वीजहारिका पृथ्वी न विप्रो देवनाशकः ।
न धर्म्मनाशको राजा न देवः सृष्टिनाशकः ॥
जयोऽस्तु पाण्डुपुत्राणां येषां पक्षे जनार्द्दनः ।
यतः कृष्णस्ततो धर्म्मो यतो धर्म्मस्ततो जयः ॥ इत्यादि ।

**End.** भुक्त्वा राजवदासीत यावन्न विकृतिं गतः ।
ततः शतपदं गत्वा वामपार्श्वे तु संविशेत् ॥
पिता रक्षति कौमारे भर्त्ता रक्षति यौवने ।
पुत्त्रस्तु स्थविरे काले स्त्रियो नास्ति स्वतन्त्रता ॥
पठतो नास्ति मूर्खत्वं जपतो नास्ति पातकम् ।
सर्व्वदा अभ्रविद्यानां विद्या नातिप्रसीदति ॥
आसनं चालयेत् दृष्ट्वा पथि नारी विवर्ज्जिता ।
जागरणे भयं नास्ति अतिक्रोधो निवार्य्यते ॥ २१४ ।

इति कवितारत्नाकरः समाप्तः ।

रामचन्द्र तव यादृशी कृपा
वानरेषु न नरेषु तादृशी ।
वार्द्धके मयि वानराकृतौ
सा कृपा किमधुना न जायते ॥

विषयः । श्लोकावलीनां संग्रहः ।

---

**No. 52.** कातन्त्रपञ्जीव्याख्या. By रामकिशोर शर्मा. Substance, country-made paper, 10×3 inches. Folia, 29. Lines, 6 on a page. Extent, 550 çlokas. Character, Bengali. Date ? Place of deposit, Upalatāgrām, Post office Mehar Zilla, Comilla, Paṇḍit Jagadbandhu Tarkavagis. Appearance, fresh. Prose. Generally correct.

**Beginning.** ॐ नमः शिवाय ।

भवानीचरणद्वन्द्वनखचन्द्रमरीचयः ।
ध्वान्तो हृदयेऽस्माकं नाशयन्त्वन्तरन्तमः ॥
नत्वा शिवपदं रामकिशोरेण यथामति ।
त्रिलोचनकृता-पञ्जी पञ्जीव्याख्यायते स्फुटम् ॥

तत्रादौ तावत् सकलशिष्टाचारप्राप्तस्य प्रारिप्सितग्रन्थसमाप्तिप्रतिबन्धक-विघ्नध्वंसकामनया कृतस्य शिवनमस्काररूपमङ्गलस्य शिष्यशिक्षार्थे निबन्धनं दुर्गसिंहोक्तकातन्त्रवृत्तिदुर्गपदविवरणरूपचिकीर्षितवस्तुनिर्देशञ्च कुर्व्वन् पञ्जिकाकारः श्लोकद्वयं कृतवान् प्रणम्येत्यादि ।

**End.** तथाच सति तन्निष्ठतादृशभाविप्रतिपत्तिविषयतानुकूलत्वादृशपुरुषीयनिष्ठत्व-भाविप्रतिपत्तेर्विशिष्टसाधकत्वाभाववान् यस्तादृशवचनशतकरणकोऽपि पूर्व्वो-क्तभाविव्यापार इत्याद्यन्वयबोधः ।

समाप्तेयं पञ्जी ।

विषयः । त्रिलोचनकृतायाः कातन्त्रीयसन्धिविषयिकाया वृत्तेर्व्याख्यानम् ।

---

**No. 53.** काम्ययन्त्रोद्धारः. Substance, country-made paper, 18×4 inches. Folia, 15. Lines, 7 on a page. Extent, 500 çlokas. Character, Bengali. Date, Sk. 1297. Place of deposit, District Dinajpur, Rájárampur Kãlāpāda, Paṇḍit Sitānātha Bhaṭṭāchāryya. Appearance, old. Verse. Generally correct.

**Beginning.** ॐ नमो गणगामिन्यैः ॥ अथ मातृकायन्त्रम् ॥ केशराद्यमष्टदलं पद्मं लिखित्वा कर्णिकायां हसौः इति बीजं लिखेत् इत्यादि ।

**End.** उद्दीरितं मन्मथयन्त्रमेतत् सौभाग्यलक्ष्मीविजयप्रदायि ॥
काश्मीररोचनालाक्षाचाम्बगेभमदचन्दनैः ।
विलिखेद्धेमलेखन्या यन्त्राण्येतानि देशिकः ॥

भूमिष्ठञ्च गरस्थञ्च दग्धनिर्म्माल्यसङ्गतम् ।
विशीर्ण्णं लङ्घितं मन्त्री यन्त्रं जातु न कारयेत् ॥

**Colophon.** इति महामहोपाध्याय-सत्पण्डित-श्रीपरिव्राजकाचार्य्येण नानामूलादाग-माद्राकृष्यकृतः काम्ययन्त्रोद्धारः समाप्तः ॥ शुभमस्तु ॥ शकाब्दाः १२९० ।

विषयः । मातृकादिशकलयन्त्रलिखनविधिः ।

---

**No. 54.** कार्त्तिकमाहात्म्यम् (सनत्कुमारसंहितान्तर्गतम्). Substance, country-made paper, 14×5 inches. Folia, 38. Lines, 9 on a page. Extent, 1200 çlokas. Character, Bengali. Date ? Place of deposit, Dinajpur, Rajvāti. Appearance, fresh. Verse. Generally correct.

**Beginning.** ॐ नमो गणेशाय । ऋषय ऊचुः ।
मुनिश्रेष्ठा बालखिल्याः सर्व्वलोकहितेच्छया ।
कलौ कलुषचित्तानां लोकानां दीनभाषिणाम् ॥
ज्ञानविज्ञानहीनानां शिश्नोदरसुखैषिणाम् ।
क्षणभङ्गुरबुद्धीनां स्वार्थतत्परमनसाम् ।
कथं प्रसन्नो भगवान् भविष्यति जनार्द्दनः ॥

**End.** भास्करस्य मुखात् श्रुत्वा ततस्तानभिवाद्य च ।
ययुः सूर्य्यस्य निकटे गायन्तो भास्करस्तुतिम् ॥
इत्येतत् सर्व्वमाख्यातं कार्त्तिकस्य व्रतोत्तमम् ।
यत्कृत्वा सर्व्वपापेभ्यो मुक्तो भवति तत्क्षणात् ।
अतः परं किं वक्ष्यामि तद्ब्रुह्यन्नैव सत्वरम् ॥

**Colophon.** इति श्रीसनत्कुमारसंहितायां कार्त्तिकमाहात्म्ये चतुर्नवतितमोऽध्यायः ॥ स्कन्दपुराणीय सनत्कुमारसंहितायां कार्त्तिकमाहात्म्यं समाप्तम् ॥ * ॥

विषयः । अत्र आदावेव एकसप्ततितमोऽध्यायः तमारभ्य चतुर्नवतितमाध्यायं यावत् कार्त्तिकमाहात्म्यादिकथनम् ॥

---

**No. 55.** कालमाधव-संक्षिप्त-व्याख्या. Substance, country-made paper, 9×4 inches. Folia, 16. Lines, 3 on a page. Extent, 100 çlokas. Character, Nāgara. Date Sм. 1903. Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, new. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

प्रथम ( . ) ह— सांख्यमतमाश्रित्य कालशब्दवाच्यः कश्चिदर्थो नास्तीति पूर्व्वपक्षौ (पक्षः) कृतः, वैशेषिकादिमतमाश्रित्य तत्सत्त्वं साधितम् इत्यादि ।

End. यस्तेति तद्देवं निर्णीय तमेवार्थं संग्रहे अनुक्रम्योपसंहरति ईदृशमिति ।

Colophon. इति व्याख्या समाप्ता । सम्वत् १९०२ ।

विषयः । कालमाधवीयव्याख्या ।

---

No. 56. कालमाधवीय-कारिका-व्याख्या. By वैद्यनाथ सूरि. Substance, country-made paper, 12×4 inches. Folia, 37. Lines, 9 on a page. Extent, 740 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।

नत्वा गजाननं देवमगजानन्दवर्द्धनम् ।

कालमाधवपद्यानि विवरिष्ये यथामति इत्यादि ॥

End. उपाकर्म्मणि चोत्सर्गे ग्रहवोधो न विद्यते ।

ईदृशं नियमं न्यायशास्त्राभ्यां कर्त्तुमुद्यमः ॥

Colophon. इति श्रीमद्धर्म्मशास्त्रपारावारीणरामचन्द्रभट्टात्मजभट्टवैद्यनाथसूरिकृते काल-माधवीयकारिकाव्याख्याने प्रथमं प्रकरणं सम्पूर्णम् ।

विषयः । कालमाधवीय-कारिकाव्याख्या ॥

---

No. 57. काव्यादर्शटीका. By त्रिभुवनचन्द्र. Substance, country-made paper, 14×4 inches. Folia, 57. Lines, 7 on a page. Extent, 2,000 çlokas. Character, Bengali. Date, Sk. 1758. Place of deposit, Dinajpur, Babu Giris Candra Cakravarttī. Appearance, tolerable. Prose. Incorrect.

Beginning. ॐ नमो गणेशाय ।

सर्व्वज्ञं सर्व्वहितं देवं श्रीवर्द्धमानमानम्य ।

त्रिभुवनचन्द्रेणेयं विविच्यते दण्डिणष्टीका ॥

विघ्नोपशमनपुण्यसम्भारभक्तिप्रकर्षं सम्प्रदायाविच्छेदलक्षणं फलमवलोक्य मङ्गलार्थं श्लोकमाह ।

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्व्वशुक्ला सरस्वती ॥

चतुर्मुखस्य मुखानि तान्येवाम्भोजानां वनानि तत्र हंसवधूः पितामहवदनकमलकाननहंसीति रूपकालङ्कारेण ब्रह्मणो विशुद्धत्वात् सरस्वत्याश्च तन्मुखप्रसूतत्वादभिजनशुद्धिः प्रदर्शितेति । इत्यादि ॥

**End.** प्रकृतमुपसंहर्त्तुमाह ।

पन्था स एष विवृतः परिमाणवृत्त्या ।
संक्षिप्यविस्तरमनन्तमलङ्क्रियाणाम् ॥
वाचामति ( ... ... ) ।
× × × × × × ॥

इत्यविषयं विवरीतुमलं विशेषेण अलङ्क्रियाणामनन्तपरिमितं विस्तरं स्वभावाख्यानादिरूपपरिणामवृत्त्या यः पूर्व्वाचार्य्यैरुपदिष्टः स एव पन्थाः ।
विवरीतुं समारोपि-
ण्यावर्त्तनपटीयसे ।
ॐ नमोवादिसिंहाय ।
नमः स्याद्वादवादिने ॥

**Colophon.** इत्याचार्य्य-श्रीवादिसिंहनामाङ्कितेन त्रिभुवनचन्द्रेण विरचितायां दण्ड्यलङ्कारटीकायां अर्थालङ्कारविभागो नाम द्वितीयः परिच्छेदः ॥ ॐ नमः ॥ शकाब्दा १७५८ ॥

विषयः । दण्डिकृतकाव्यादर्शस्य व्याख्यानम् ॥

---

**No. 58.** काव्यप्रकाशटीका (रसप्रकाशः). By श्रीकृष्णशर्म्मा. Substance, country-made paper, 25 × 3½ inches. Folia, 19. Lines, 7 on a page. Extent, 600 çlokas. Character, Bengali. Date ? Place of deposit, Gram Bhadughar, Post Bramhanberia, Zilla Comilla, Paṇḍit Amar C. Nyāyaratna. Appearance, old. Prose. Correct.

**Beginning.** ॐ नमः स्वेष्टदेवतायै ।

सत्यासक्तमनाः शुद्धद्विजेन्द्रविलसत्तनुः ।
मुरारिर्वा पुरारिर्वा पायान्नो वृजिनार्णवात् ॥

रसप्रकाशनामायं निबन्धः क्रियतेऽधुना ।
काव्यप्रकाशबोधाय श्रीमत् श्रीकृष्णशर्म्मणा ॥
ननु काव्यस्य धर्म्मादिचतुर्वर्गसाधनतया तन्निरूपणार्थं सुकुमार× × × × × × × × ×ग्रन्य एव कर्तुमुचितः न तु × × × मङ्गलमित्याशङ्कामपनेतुं मङ्गलफलं दर्शयन्नेव तत्कारिकामवतारयति ग्रन्यारम्भ इत्यादि । इत्यादि ।

End. अत्रायं भावः प्रतीतिमात्रसारं हि काव्यं न ज्योतिष्टोमादिवाक्यवत् सत्यार्थप्रतिपादनद्वारेण प्रवर्त्तनार्थं प्रामाण्यमन्विष्यते अतोऽत्र सत्यासत्यलनिरूपणमनुपयुक्तमेव तस्यैव ? विषयेषु विधिनिषेधव्युत्पत्तिसिद्धेरित्यास्तां विस्तरः ।

Colophon. इति श्रीश्रीकृष्णशर्म्मविरचिते रसप्रकाशे पञ्चमोऽध्यायः । एतावन्मात्रं श्रीकृष्णशर्म्मणा विरचितम् । श्रीहरिः ॥

विषयः । काव्यप्रकाशस्य व्याख्यानम् ।

---

No. 59. किशोरकौमुदी. Substance, country-made paper, 12×5 inches. Folia, 23. Lines, 9 on a page. Extent, 100 çlokas. Character, Bengali. Date ? Place of deposit, Saptagrām Kṛṣṇapurer Akdā (Monastery). Appearance, old. Verse. Generally correct.

Beginning. श्रीकृष्णाय नमः ।
जिज्ञासमानो जनको वासुदेवकथाद्भुतम् ।
समपृच्छत् सुसन्तुष्टो मुनिं कृष्णपरायणम् ॥
सनत्कुमारं भगवन् कथ्यतां मे कृपानिधे ।
गोविन्दस्य यदाश्चर्य्यं वसतो गोकुले विभोः ॥ इत्यादि ।

End. घनश्यामलगोविन्दपादपद्मोडुपा विभो ।
कार्ष्णा दुःखसागरं वै तरन्ति तत्र मानिनः ॥
नन्दवालन्तु गोपालं वालमेकोनषोड़शम् ।
चिद्घनानन्दगोविन्दं चिन्तयामः प्रजापतिम् ॥

Colophon. इति श्रीकिशोरकौमुद्यां ......... ॥ ० ॥

विषयः । गोकुललीलावर्णनम् । प्रेमादिकथनम् । नन्दादीनां परिणामकथनम् । स्वभक्तानां परिणामकथनम् । ईश्वरस्वरूपनिरूपणम् । नाममाहात्म्यादिकथनम् ॥

---

**No. 60.** **कुण्डकल्पद्रुमः.** Substance, country-made paper, 12×5 inches. Folia, 38. Lines, 10 on a page. Extent, 800 çlokas. Character, Nāgara. Date, of composition Sk. 1577. Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

**Beginning.** श्रीशिवो जयति ।

ओमित्यक्षरमद्वितीयमन (.) तत्वद् यदन्तस्थितं ।
नत्वा( . )ति विभक्तिविश्वमखिलं यस्मिन् पुनर्लीयते ।
शास्त्रं वीक्ष्य समुद्धराम्यथ सतां श्रीमाधवोऽहं मुदे ।
निर्मथ्याङ्कसमुद्रमिष्टफलदं श्रीकुण्डकल्पद्रुमम् ॥ इत्यादि ।

**End.** करे दिङ्मिते सायकाश्च नागाः ।
भूर्भुजौ शून्यमम्भोधयः पर्व्वपूर्व्वाः ।
भूजाः सूक्ष्ममूलाः स्मृताः चेचषिड्डौ ।
युगाख्याणि तुल्यानि तैस्योत्तमानि ॥

**Colophon.** रविघनमितवर्षे १७१२ विक्रमाब्दे प्रयाते ।
नगनगतिथितुल्ये १५७७ शाककाले प्रवृत्ते ।
शरदि मनुजमाने मन्मथे तैषशुक्ले ।
फणितिथियुतचन्द्रे कुण्डकल्पद्रुमोभूऽत् ।

विषयः । यज्ञकुण्डविधानम् ॥

---

**No. 61.** **कुण्डमण्डपविधानम् (आथर्वणसूत्रोक्तम्).** Substance, country made paper, 8×3 inches. Folia, 38. Lines, 10 on a page. Extent, 60 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Incorrect.

**Beginning.** श्रीगणेशाय नमः ।

अथाथर्वणसूत्रोक्तकुण्डमण्डपविधानम् लिख्यते उक्तानि वैविध्यकानि आथर्वणिकानि वक्ष्यामः (.) मे शंकुमेकादशाङ्गुलं विधाय शङ्कुसंमितया

रज्वा मण्डलं परिलिख्य यत्र लेखयोः शङ्कग्रच्छाया निपतति तत्र शंकुं निहन्ति सा प्राची इत्यादि ।

**End.** कुण्डाकारेण मेखलार्द्धेन विभाग दीर्घविस्तृता योन्यः सितादिना रचयेत् ।

**Colophon.** इत्याथर्वणसूत्रोक्तकुण्डमण्डपविधानम् ।

विषयः । अथर्ववेदीयकुण्डमण्डपविधानम् ।

---

**No. 62.** कुण्डलीकवचम् . Substance, country-made paper, 11 × 3 inches. Folia, 3. Lines, 7 on a page. Extent, 90 çlokas. Character, Bengali. Date ? Place of deposit, Upalatā grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgis. Appearance, fresh. Verse. Generally correct.

**Beginning.** श्रीगुरवे नमः । श्रीआनन्दभैरव्युवाच ।

अथ वच्ये महादेव कुण्डलीकवचं शुभम् ।
परमानन्ददं सिद्धसिद्धवृन्दनिषेवितम् ॥
यद्धृत्वा योगिनः सर्व्वे धर्म्माधर्म्मप्रदर्शकाः ।
ज्ञानिनां मानिनोऽ धैर्य्या विचरन्ति यथा तथा ॥
सिद्धयोऽप्यनिमाद्याश्च करस्थाः सर्व्वदेवताः ।
एतत् कवचपाठेन देवेन्द्रो योगिराड् भवेत् ॥
ऋषयो योगिनः सर्व्वे जटिलाः कुलभैरवाः ।
प्रातःकाले निवारञ्च मध्याह्ने वारयुग्मकम् ॥
सायाह्ने वारमेकन्तु पठेत् कवचमेवच ।
पाठादेव महायोगी कुण्डली दर्शनं लभेत् ॥ इत्यादि ।

**End.** इत्येतत् कवचं देवि कुण्डलिन्याः प्रसिद्धिदम् ।
ये पठन्ति ध्यानयोगे योगमार्गव्यवस्थिताः ॥
ते यान्ति मोचपदवीमैहिके नात्र संशयः ।
वामा वामकरे धृत्वा सर्व्वाभीष्टमवाप्नुयात् ॥
स्वर्णे रौप्ये तथा ताम्रे रोपयित्वा प्रपूजयेत् ।
सर्व्वदेशे सर्व्वकाले पठित्वा सिद्धिमाप्नुयात् ।
स भूयात् कुण्डली पुत्रो नात्र कार्य्या विचारणा ॥

**Colophon.** ॐ इति रुद्रजामले उत्तरखण्डे कुलकुण्डलिनीकवचं समाप्तं ।

विषयः । कुण्डलीशक्तेः कवचकथनम् ।

---

**No. 63.** कुण्डलीस्तोत्रम्. Substance, country-made paper, 11 × 3 inches. Folia, 1. Lines, 7 on a page. Extent, 34 çlokas. Character, Bengali. Date ? Place of deposit, Upalatāgrām, Post Māhar, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgis. Appearance, fresh. Verse. Generally correct.

**Beginning.** अथ कुण्डलीस्तोत्रं ।

ॐ जन्मोद्धारिणी रचिणीह तरुणी वेदादिवीजादिमा ।
नित्यं चेतसि भाव्यते भुवि कदा मद्वाक्यसञ्चारिणी ।
मां पातु प्रियदा सदा चविपदं संख्यातमश्रीधरे ।
धात्री त्वं स्वयमादिदेववनिता दीनातिदीनं परं ॥
रत्नाभाम्दतचन्द्रिका लिपिमयी सर्पाकृतिर्निद्रिता ।
जाग्रद्दर्म्मसमाश्रिता भगवती त्वं मांश्लोकाश्रयः । (?)
मांसोद्गन्धकगन्ध-दोषजड़ितं वेदादिवाक्यान्वितं ।
संपाल्याम्दतचन्द्रकोटिकिरणे नित्यं शरीरं कुरु ॥ इत्यादि ।

**End.** कुण्डलीशक्तिमार्गस्थं स्तोत्राष्टकं महाफलम् ।
यः पठेत् प्रातरुत्थाय स योगी भवति ध्रुवम् ॥
सर्व्वतेजःस्वरूपां मामनन्तकोठिविग्रहां ।
दरिद्रधनदां लक्ष्मीं नारायणमनोरमां ॥
सदा भावय शम्भो त्वं योगनायकपण्डितः ।

**Colophon.** ॐ इति रुद्रयामले उत्तरखण्डे कुण्डलीस्तोत्रं समाप्तम् ।

विषयः । कुण्डलीशक्तेः स्तवनं ।

---

**No. 64.** कुमारपलाचरित्रम्. By जिनमण्डनोपाध्याय. Substance, country-made paper, 12 × 5 inches. Folia, 85. Lines, 15 on a page. Extent, 1,980 çlokas. Character, Nāgara. Date of composition Sk. 1492. Place of deposit, Benares, Dijmaṇḍalācāryya Mahārāja Bālacandra. Appearance, old. Verse. Incorrect.

Beginning. जीवोऽयं विमलस्वभावसुभगः सूर्य्योपलस्पर्द्धया ।
धत्ते संगवशादनेकविकृती लुं प्रात्मरूपस्थितिः ॥
यद्याप्नोति रवेरिवातिसुगुरोः सत्पादसेवाश्रयं ।
तज्जातोर्जिततेजसैव कुरुते धर्मेन्धनं भस्मसात् ॥

End. प्रबन्धयोजितः श्रीमत्कुमारनृपतेरयं ।
गद्यपद्यैः (...) कश्चित् × × × ।
केश्चित् प्राग्यजनिर्मितैः ? × × × ॥
× × × × × × ॥
श्रीसोमसुन्दरशिष्येण यथाश्रुतानुसारेण श्रीजिनमण्डनगणिनाशक १४९२ अनु ( ... ) वत्सरे रचितः श्रीजिनमण्डनोपाध्यायैः श्रीकुमारपालप्रबन्धात् यथादृष्टानुसारेण योजितः ।

Colophon. इति श्रीकुमारपालचरित्रं सम्पूर्णम् ।

विषयः । कुमारपालचरित्रवर्णनम् ।

---

No. 65. कुमारसम्भवटीका . (ललिता) By भगीरथ . Substance, country-made paper, 18×3 inches. Folia, 75. Lines, 8 on a page. Extent, 300 çlokas. Character, Bengali. Date, Sk. 1678. Place of deposit, Dinajpur, Paṇḍit Kṛṣṇadāsa Smṛtibhuṣaṇa. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
ब्रह्मबीजां कलाधारे व्याकारेऽपारपल्लवां ।
वाणीं कल्पलतापाटपदार्णवतरश्रितां ॥
यः पीतमुण्डिकुलभूषणमग्रजन्मा ।
माघादिकाव्यनिवहस्य चकार टीकाः ॥
स श्रीभगीरथकविर्ललिताभिधाना-
मेताञ्च मन्दमतिवोधकरीं करोति ॥
अस्त्युत्तरस्यामित्यादि । उत्तरस्यां दिशि उत्तरदेशभूमौ नगाधिराजः पर्व्वतानां राजा इत्यादि ॥

End. केनापि प्रकारेण न दत्ता वाचो वचनानि यया शयने शय्यायामपि यास्तिष्ठन्ति ताः शयनसख्यः ताभ्यः शयनसखीभ्य इति विग्रहः प्रथमस्यासौ मुखविकारश्चेति विग्रहः ॥

**Colophon.** इति पीतमुण्डीयभगीरथविरचितायां कुमारटीकायां सप्तमः सर्गः अष्टमसर्गस्तु भगवत्या जगन्मातुरम्बिकायाः शृङ्गारवर्णनं इति भयादुपेक्षितमस्माभिर्नव्याख्यात इति कुमारटीप्पनी सम्पूर्णा ॥ शकाब्दा १६७८ ॥

विषयः । कालिदासकृतकुमारसम्भवकाव्यस्य व्याख्यानम् ॥

---

No. 66. कुमारीतन्त्रम्. Substance, country-made paper, 18 × 4½ inches. Folia, 6. Lines, 8 on a page. Extent 300 çlokas. Character, Bengali, Date ? Place of deposit, Calcutta, Government of India. Appearance. old. Verse. Generally correct.

**Beginning.** ॐ नमो गणेशाय ।
कैलासशिखरासीनं चन्द्रखण्डविराजितं ।
पप्रच्छ परया भक्त्या गौरी लग्ना वृषध्वजं ॥ इत्यादि ।

**End.** जप्त्वायुतं श्मशाने च शत्रूणां मारणं भवेत् ।
कालीकल्पमिदं प्रोक्तं गोपयेत् मातृजारवत् ॥
गोपने सर्व्वसिद्धिः स्यात् प्रकाशे मरणं ध्रुवं ॥

**Colophon.** इति श्रीकुमारीतन्त्रे परमरहस्ये कलियुगवर्णने पूर्व्वभागे कालीकल्पे नवमः पटलः ।

विषयः । १ पटले विद्योद्देशकथनं । २ पटले मन्त्रयोगविधिकथनं ॥ ३ पटले वह्नियोमकथनं । ४ पटले नैवेद्यनिश्चयादिकथनं । ५ पटले पुरश्चरणविधिकथनं । ६ पटले कुलाचारविधिकथनं । ७ पटले पूजास्थानादिनिरूपण । ८ पटले आचारविधिकथनं । ९ पटले कालीकल्पः ।

---

No. 67. कुरुक्षेत्रमाहात्म्य. By रामचन्द्रसरस्वती. Substance, country-made paper, 10 × 5 inches. Date Sm. 1888. Place of deposit, Dinajpur, Paṇḍit Kṛṣṇadāsa Smṛtibhuṣaṇa. Appearance, tolerable. Prose and Verse. Generally correct.

**Beginning.** श्रीगणेशाय नमः ।
प्रणम्य जगदीशानं तेन यान्तुस्वनामयं ? ।
× × × × × × ।
× × × × × × ।

अथ श्रीमद्रामचन्द्र-सरस्वत्याननाब्जच्युतोत्कटसुगन्धिवाचामृतमयमकरन्दवता ? श्रीमत्कुरुक्षेत्रीयतीर्थवर्णनग्रन्थभ्रमजला अनेकपुराणेतिहाससुगन्धितमहाकमला संसारसागरोत्तितीर्ष्वधिकारिजनहंसमण्डिततटा अल्पकुल्या ग्रन्थात्मिकानुक्रमणिका हरिगिरिभिस्तरण ? निष्काश्यते । तत्रानुबन्धचतुष्टये नाम अधिकारिविषयसम्बन्धप्रयोजनानि । तत्राधिकारी संयतेन्द्रियत्वे सति तीर्थाभिगमनकामः उक्तञ्च वनपर्व्वणि इत्यादि ।

End. पूर्व्वोक्तकालदेशावुच्चार्य्य पूर्व्वोक्तप्रमाणकसांगा ? संख्यातवाचिसहस्रवाश्वमेधजन्यपुण्याद्धितपरमेश्वरगतानन्तसन्तोषहृदये पूर्व्वोक्तविशेषः पूर्व्वोक्तविशेषणाय सम्प्रददे । इत्यादि पूर्व्ववत् ॥

Colophon. इति श्रीकुरुक्षेत्रनामतीर्थमाहात्म्यं समाप्तं । संवत् १८८८ ॥

विषयः । कुरुक्षेत्रमाहात्म्यवर्णनमुखेन तत्तत्तीर्थ-कर्त्तव्यकर्म्मनिचयनिरूपणं ॥

---

**No. 68.** **कृच्छ्रादिविधिः** By **अनन्तदेव**. Substance, country-made paper, 8 × 4 inches. Folia, 7. Lines, 9 on a page. Extent, 105 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

अथ कृच्छ्रादिलक्षणादिसंक्षेपः ॥ याज्ञवल्क्यः ।

एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन चैवायं पादकृच्छ्रः प्रकीर्त्तितः ॥

End. अवादि स अनन्तेन कृच्छ्रादेर्लक्षणादिकं ।
देवेशः प्रीयतां तेन यस्य ज्ञानमयं तपः ॥

Colophon. इत्यनन्तदेवीय-कृच्छ्रादि-विधिः ।

विषयः । कृच्छ्रप्रायश्चित्तविधानम् ।

---

**No. 69.** **कृष्णामृतमहार्णवस्तोत्रम्** By **आनन्दतीर्थ**. Substance, country-made paper, $12 \times 4\frac{1}{2}$ inches. Folia, 10. Lines, 11 on a page. Extent, 250 çlokas. Character, Nāgara. Date ? Place of deposit, Benares Paṇḍit Vāmanācāryya. Appearance, old. Verse. Correct.

**Beginning.** श्रीमद्वेदव्यासाय नमः ।

अर्च्चितः संस्मृतो ध्यातः कीर्त्तितः कथितः श्रुतः ।

यो ददात्यमृतत्वं हि स मां रक्षतु केशवः ॥

**End.** श्रीमदानन्दतीर्थाख्यसद्दसकिरणोच्छ्रिता ।

गीततिः सेव्या गीर्वाणैः सर्व्वदा शुद्धिदा भवेत् ॥

**Colophon.** इति श्रीमदानन्दतीर्थविरचितः कृष्णामृतमहार्णवः सम्पूर्णः ।

विषयः । माध्वसम्प्रदायस्थ-वैष्णवानामाचारनिर्णयः ।

---

**No. 70. कोकिलामाहात्म्यम्.** Substance, country-made paper, 14×5 inches. Folia, 26. Lines, 10 on a page. Extent, 600 çlokas. Character, Bengali. Date ? Place of deposit, Dinājpur Rājavāṭi. Appearance, fresh. Verse. Generally correct.

**Beginning.** ॐ नमो गणेशाय ।

एकदा नैमिषारण्ये ऋषयः शौनकादयः ।

सत्रान्ते सूतमासीनं पप्रच्छुरिदमादरात् ॥

ऋषय ऊचुः ॥

सूत सूत महाप्राज्ञ छिन्ध्यस्मत्हृत्स्थसंशयं ।

यत् पृच्छामो वयं सर्व्वं सविस्तरमशेषतः ॥

कोकिलायास्तु माहात्म्यं महापातकनाशनमित्यादि ।

**End.** यदास्मरसि मां साधो स्नेहेन भृगुनन्दन ।

तदाहमागमिष्यामि सत्यमेतत् वदामि ते ॥

इदं पवित्रं विमलं विचित्रं स्वर्गापवर्गप्रदमीश्वरस्य ।

चरित्रमाद्यं भृगुनन्दनाय संश्रावयित्वा हि जगाम सूतः ॥

**Colophon.** इति श्रीस्कन्दपुराणे कनकाद्रिखण्डे शिवनारदसंवादे कोकिलामाहात्म्ये एकत्रिंशोऽध्यायः ॥

विषयः । १ मे अध्याये शिवनारदसंवादकथनम् ॥ २ ॥ व्रतारम्भकथनम् ॥ ३–४ ॥ कोकिला-व्रतोत्सर्गादिकथनम् ॥ ५ ॥ सतीजन्मकथनम् ॥ ६ ॥ दक्षकोपवर्णनम् ॥ ७ ॥ दक्षस्य यज्ञनिश्चयकथनम् ॥ ८ ॥ यज्ञारम्भकथनम् ॥ ९ ॥ दक्षस्य समुद्वेगकथनम् ॥ १० ॥ शिववाक्यकथनम् ॥ ११ ॥ सत्या दक्षालयगमनम् ॥ १२ ॥ सत्या देहविसर्जनम् ॥ १३ ॥ वीरभद्रोत्पत्तिकथनम् ॥ १४ ॥ युद्धोद्वेगकथनम् ॥

१५॥ देवपराजयवर्णनम्॥ १६॥ गोविन्दास्त्रप्रदानकथनम्॥ १७॥ यज्ञविध्वंसकथनम्॥ १८॥ भवस्य प्रतापकथनम्॥ १९॥ सत्या वरदानकथनम्॥ २०॥ गौरीवरप्रदानकथनम्॥ २१॥ ब्रह्मणोवर-प्रदानकथनम्॥ २२॥ शतरूपादक्षयो वरप्रदानकथनम्॥ २३॥ पुनर्दक्षयज्ञारम्भकथनम्॥ २४॥ दक्षप्रबोधकथनम्॥ २५–२६॥ गिरिवाक्यनिश्चयकथनम्॥ २७॥ वरागमनवर्णनम्॥ २८॥ उमा-महेश्वरोद्वाहवर्णनम्॥ २९॥ उमामहेश्वरसङ्गमकथनम्॥ ३०–३१॥ कुमारजन्मादिकथनम्॥

---

**No. 71.** क्षेत्रविचारः Substance, country-made paper, 12 × 4 inches. Folia, 42. Lines, 3 on a page. Extent, 252 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Diŋmaṇḍalācāryya, Mahārāja Bālacandra. Appearance, old. Verse. Correct.

**Beginning.** वीरं जयसेहर पय पडियं ।
पणमि जण सुगुरुं च मंडणि ।
ससरणटाखित्तविराराणु ।
सुंच्छामि × × × × × × × ×

**End.** वङ्कसंख विगणेवय ।
गदौविउ चित्तसद्दस वुल्लसी ए ॥
नरगणसमवय गोपुण ।
विठ्ठर सयटाणि सद्दस्संको ॥

**Colophon.**
विषयः । क्षेत्राणां विचारः ।

---

**No. 72.** क्षेत्रसमासः. Substance, country-made paper, 12 × 4 inches. Folia, 10. Lines, 10 on a page. Extent, 250 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Diŋmaṇḍalācāryya, Mahārāja Bālacandra. Appearance, old. Verse. Correct.

**Beginning.** षस्य प्रथमपङ्क्तिः कीटदृष्टा ।
जम्बुद्दीवा उया ।
मयम्मूलयणाय रावसा नाउ ।
सव्वेविसस्सं रिरजा ।
दीवोदहानो तिरिय लोए ॥

**End.** एगा जोयण कोटीलकखा । ?
कयाल तीसर सहस्सा दोन्निसए ।
गूण वन्नहिया समय खेत्त स्सपरि ।
× × × × × इतोनास्ति ।

**Colophon.**

विषयः । चत्राणां वर्णनम् ।

---

**No. 73.** गणपतिखण्ड (विनायकमाहात्म्यं). Substance, country-made paper, 14×5 inches. Folia, 37. Lines, 9 on a page. Extent, 1,100 çlokas. Character, Bengali. Date ? Place of deposit, Dinājpur, Rajavāṭi. Appearance, fresh. Verse. Generally correct.

**Beginning.** ॐ नमो गणेशाय ।
स्कन्द उवाच ।
शिवरात्रौ महेशान सर्व्वज्ञसुखदायक ।
आख्यानानि सुपुण्यानि श्रुतानि त्वन्मुखाम्बुजात् ॥
विचित्राणि पवित्राणि सर्व्वाघशमनानि च ।
येषां श्रवणमात्रेण पलायन्ते महापदः ॥
इतस्त्वं कृपया ब्रूहि गणेशचरितं मम ।
अवतारान् सेतिहासान् सर्व्वकामप्रपूरकान् ॥
शरण्यानस्य लोकानां वक्तुमर्हसि शङ्कर ॥ इत्यादि ।

**End.** व्यास उवाच ।
शिवेन गदितं विप्रा स्कन्दाय पृच्छते ऽखिलं ।
विनायकीयो महिमा स भवद्भ्यो निवेदितः ॥
इति श्रीस्कन्दपुराणे विनायकमाहात्म्ये शिवस्कन्दसंवादे गणेशावतारवर्णनं नाम द्वाविंशतितमोऽध्यायः ॥

**Colophon.** समाप्तश्चायं ग्रन्थः ॥

विषयः । १ प्रथमाध्याये स्कन्दशङ्करसंवादे वक्रतुण्डावतारवर्णनम् ॥ २ ॥ द्वितीयाध्यायात् ८ अष्टमाध्यायं यावत् चिन्तामण्युपाख्यानम् । ९ नवमाध्याये पार्व्वतीवरप्रदानकथनम् ॥ १० दशमाध्याये गजासुरमुक्तिप्रदानकथनम् ॥ ११ एकादशाध्याये गजाननावतारकथनम् ॥ १२ द्वादशाध्याये सिन्दूरवधादिकथनम् ॥ १३। १४ त्रयोदशचतुर्दशाध्याययोः विघ्नराजावतार-

कथनम् ॥ १५ पञ्चदशाध्याये वल्लालसेनावर्णनम् ॥ १६ । १७ ॥ १८ षोड़शसप्तदशाष्टादशाध्यायेषु मयूरेशावतारवर्णनम् ॥ १९ ऊनविंशाध्याये भृगुसंवादकथनम् ॥ २० विंशाध्याये प्रमदामाधव-वर्णनम् ॥ २१ एकविंशाध्याये विद्रुमकल्पनकथनम् ॥ २२ द्वाविंशाध्याये धूम्रकेत्ववतारादिवर्णनम् ॥

---

**No. 74.** गायत्रीकवचं (नीलतन्त्रीयं). Substance, country-made paper, 15 × 3 inches. Folia, 1. Lines, 9 on a page. Extent, 37 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Chandrakona, Ayodhyá Raghunathváti, Babu Chakrapáni Ráya. Appearance, old. Verse. Generally correct.

**Beginning.** श्रीश्रीदुर्गा शरणम् ।

अथ गायत्रीकवचं । अस्य श्रीगायत्रीकवचस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामाथर्व्ववेदाश्छन्दांसि ब्रह्मवश्यप्रणवस्वरूपा गायत्रीदेवता ॐ तद्बीजं भर्ग इति गायत्रीकीलकं ब्रह्मलोकप्राप्त्यर्थं जपे विनियोगः ।

गायत्रीपूर्व्वतः पातु सावित्री पातु दक्षिणे ।

ब्रह्मा रक्षतु मे पश्चात् उत्तरे मे सरस्वती ॥ इत्यादि ।

**End.** गोब्राह्मणवधादौ च पातकादतिपातकात् ।

मुच्यते सर्व्वपापेभ्यः परं ब्रह्माधिगच्छति ॥

**Colophon.** इति नीलतन्त्रे गायत्रीकवचं सम्पूर्णं ॥

विषयः । गायत्र्याः कवचकथनम् ।

---

**No. 75.** गायत्रीकवचं (आगमसन्दर्भीयं). Substance, country-made paper, 11 × 3 inches. Folia, 2. Lines, 7 on a page. Extent, 58 çlokas. Character, Bengali. Date ? Place of deposit. Upalatāgrām, Post Mehar Zilla Comilla, Paṇdit Jagadbandhu Tarkavágis. Appearance, fresh. Verse. Generally correct.

**Beginning.** अथ गायत्रीकवचं ।

श्रीदेव्युवाच ।

ॐ देवदेवमहादेव संसारार्णवतारक ।

गायत्रीकवचं देव कृपया कथय प्रभो ॥

श्रीमहादेव उवाच ।
मूलाधारे स्थिता नित्या कुण्डली तत्त्वरूपिणी ।
सूक्ष्मातिसूक्ष्मा परमा विषतन्तुस्वरूपिणी ॥
विद्युत्पुञ्जप्रतीकाशा कुण्डलाकृतिरूपिणी ।
परब्रह्मस्वरूपा सा पञ्चाशद्वर्णरूपिणी ॥
शिवस्य नर्त्तकी नित्या परब्रह्म प्रपूजिता ।
ब्रह्मणः सैव गायत्री सच्चिदानन्दरूपिणी ॥
तद्भ्रमावर्त्तवातोयं प्राणात्मा नित्यनूतनः ।
नित्यं तिष्ठतु सानन्दा कुण्डली तव विग्रहे ॥
अतिगोप्यं महत् पुण्यं त्रिकोटीतीर्थसंयुतम् ।
सर्व्वयज्ञमयं देवि सर्व्वदानमयं सदा ॥
सर्व्वज्ञानमयं देवि परं ब्रह्ममयं सदा ।
कवचं कथयाम्यद्य पार्व्वति प्राणवल्लभे ॥ इत्यादि ।

**End.** इदं कवचमज्ञात्वा गायत्रीं प्रजपेत्तु यः ।
जप एव स एव स्यान्निस्तेजा न च सिद्धिदः ॥
यः पठेत् कवचं देवि सततं शिवसन्निधौ ।
सन्निधौ विष्णुदेवस्य कवचं शक्तिसन्निधौ ॥
तेजःपुञ्जमयो विप्रस्तत्क्षणाज्जायते ध्रुवं ॥ ॐ ॥

**Colophon.** इत्यागमसन्दर्भे ज्ञानदर्पणे गायत्रीब्राह्मणसर्व्वस्वे देवदेवीसंवादे गायत्रीकवचं समाप्तं । श्रीकाली ।

**विषयः ।** गायत्र्याः कवचकथनम् ।

---

**No. 76.** गायत्रीविवरणम् By शङ्कराचार्य्य. Substance, country-made paper, 9 × 5 inches. Folia, 4. Lines, 7 on a page. Extent, 46 çlokas. Character, Nāgara. Date ? Place of deposit, Benares. Paṇḍit Govinda Bhaṭṭa. Appearance, old. Prose and Verse. Correct.

**Beginning.** अथ सर्व्वदेवतात्मनः सर्व्वशक्तेः सर्व्वावभासकतेजोमयस्य परमात्मनः सर्व्वात्मकत्वद्योतनार्थं सर्व्वात्मकब्रह्मप्रतिपादकगायत्रीमन्त्रस्य उपासना-प्रकारः प्रकाश्यते तत्र गायत्रीं प्रणवादिकां सप्तव्याहृत्युपेतां शिरःसमेतां सर्व्ववेदमातरमिति वदन्ति । इत्यादि ।

End. यो देवः सविताऽस्माकं धियोधर्मादिगोचरः ।
प्रेरयत्तस्य तद्भर्गस्तद्वरेण्यमुपास्महे ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्य श्रीमच्छंकराचार्य्यकृतगायत्रीविवरणं समाप्तम् ।

विषयः । गायत्रीव्याख्या ।

---

No. 77. गुर्वावली-नाम-महाछन्दः By मुनिसुन्दर सूरि. Substance, country-made paper, 12 × 4½ inches. Folia, 17. Lines, 13 on a page. Extent, 510 çlokas. Character, Nāgara. Date, v. Saṃ. 1496. Place of deposit, Benares, Paṇḍit Diṇmaṇḍalācāryya, Mahārāja Bālacandra. Appearance, old. Verse. Correct.

Beginning. श्रीगौतमाय ।
जयश्रियं राउ जिनेन्द्रचन्द्रमाः ।
स वर्द्धमानप्रभुरङ्गतां सतां ।
निजाभिधानानुगुणा सुनोति यः ।
सुतक्रम प्र ( ... ) त सौख्यसंपदः ॥ इत्यादि ।

End. श्राद्धाः पत्रगणाश्च ( ... ) तुला वृद्धाश्च सुश्राविकाः ।
सर्व्वाभीष्टफलप्रदः स जयति श्रीसंघकल्पद्रुमः ।
सम्पूर्णश्चेदं श्रीगुर्वावलीनाममहाच्छन्दः ।

Colophon. इति वृहत्तपागच्छ-श्रीगुर्वावली वृहती श्रीमुनिसुन्दरसूरिकृता । संवत् १४९६ आषाढ़ सुदि ।

---

No. 78. गौतमीसूत्रं (ज्ञानवोधप्रकाशकं). Substance, country-made, paper, 8 × 5 inches. Folia, 86. Lines, 9 on a page. Extent, 1,250 çlokas. Character, Nāgara. Date of Comp. v. Saṃ. 1715? Place of deposit, Calcutta, Çyāmapukura Viçvakoṣa office, Babu Nagendranāth Vasu. Appearance, old. Verse Incorrect.

Beginning. अरिहन्ता भगवन्त इन्द्रमहिता सिद्धाश्च सिद्धिस्थिताः ।
आचार्य्यजिनशासनोन्नतिकराः पूज्योपाध्यायकाः ।
श्रीसिद्धान्तसुपाठकमुनिवरा रत्नत्रयाराधकाः ।
पञ्चैते परमेष्ठिनः प्रतिदिनं कुर्व्वन्तु वो मङ्गलं ॥

विबुधकुमुदचन्द्रसर्व्वदुःखापहरं ।
त्रिभुवनपतिसेव्यं धर्म्मरत्नाकरं च ।
स्वपरहितमपारं स्वर्गमोक्षैकहेतुं ।
सकलगुणनिधानं तीर्थनाथं भज त्वं ॥
असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रं ।
सुरतरुवरशाखा लेखनी पत्रमुर्व्वी ।
लिखति यदि गृहीत्वा सारदा सर्व्वकालं ।
तदपि तव गुणानामीश पारं न याति ॥
जिनस्मरणमात्रेण शोकक्लेशभयादिकं ।
शाकिनीग्रहरोगादिदारिद्रञ्च विनश्यति ॥

End. सरस्वती महाभागे वरदे कामरूपिणी ।
विश्वरूपा विशालाक्षी देवी या परमेश्वरी ।
सरस्वती मया दृष्टा वीणापुस्तकधारिणी ।
हंसवाहनमारूढा देवी या परमेश्वरी ॥
ब्राह्मीचन्दनवालिका भगवती राजमती द्रौपदी ।
कौशल्या च मृगावती च सुरलसा सीता सुभद्रा शिवा ॥
कुन्ती शीलवती नलस्य दयिता चोला प्रभावत्यपि ।
पद्मावत्यपि सुन्दरी प्रतिदिनं कुर्व्वन्तु वो मङ्गलं ॥
मङ्गलं भगवान् वीरो मङ्गलं गौतमप्रभुः ।
मङ्गलं स्थूलभद्राद्या जैनधर्म्मोऽस्तु मङ्गलं ॥
सर्व्वारिष्टप्रणाशाय सर्व्वाभीष्टार्थदायिने ।
सर्व्वलब्धिनिधानाय गौतमस्वामिने नमः ॥
वाणेन्दुवसुभूवर्षे श्रावणस्य सितेतरे ।
षष्ठी तु सौम्यवारे (.) न्तिभकाष्यपुरे (?) शुभे ॥
सुशिष्यपठनार्थे च ज्ञानबोधप्रकाशके ।
सुक्तमुक्ता च शास्त्रं (?) भारामल्ललिपिकृतं ॥
मङ्गलं लेखकस्यापि पाठकस्यापिमङ्गलं ।
मङ्गलं सर्व्वलोकानां भूमिभूपतिमङ्गलं ॥
यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धम् वा मम दोषो न दीयते ॥
श्रीरस्तु ॥

विषयः । जैनधर्म्मप्रशंसामुखेन सिद्धगुणादिकथनम् ॥ धर्म्मपुण्यगुणद्वारादिकथनम् ॥ साधुगुणादिकथनम् ॥ तपोगुणकथनम् ॥ भावगुणकथनम् । आचार्य्यवाक्यं ॥ बुद्धिद्वारादिकथनम् । भवितव्यताद्वारादिकथनम् ॥ कर्म्मरेखाकुम्बरभावनीकन्याकथा ॥ आशीर्व्वादकथनम् ॥ स्वधर्म्मगुणद्वारादिकथनम् ॥ विवेकचतुर्द्वारादिकथनम् ॥ प्रस्ताविककथानिरूपणम् ॥ देशादिलक्षणं ॥ कुसङ्गतिद्वारकथनम् ॥ देवतादिद्वारकथनम् । नीचरागगुणद्वारकथनम् ॥ लेखनगुणादिकथनम् ॥

---

No. 79. गोत्रप्रवरभास्करः By भट्टोजि. Substance, country-made paper, 8 × 3 inches. Folia, 8. Lines, 9 on a page. Extent, 144 çlokas Character, Nāgara. Date, SM. 1774. Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance old. Prose. Incorrect.

**Beginning.** श्रीगणेशाय नमः ।

सप्तर्षयोऽगस्त्यष्टमास्तदपत्यञ्च गोत्रम् प्रक्रियन्ते गोत्राध्वर्य्युभ्यामुत्कीर्त्यन्त इति प्रवराः समानप्रवरां समानगोत्राञ्च नोद्वहेत् इत्यादि ।

**End.** श्रीभट्टोजिविरचितो गोत्रप्रवरनिर्णयः ।

गुणग्टह्यै र्बुधैः सोऽयमादरेण विभाव्यतां ॥

गोत्रप्रवरसन्देहतमःप्रावृतचेतसां ।

मोदं तनोतु विदुषां गोत्रप्रवरभास्करः॥

**Colophon.** समाप्तोयं ग्रन्थः संवत् १७७४ वैशाखशुक्लतृतीयायां ।

विषयः । गोत्रप्रवरकथनम् ।

---

No. 80. गोपालोत्तरतापनीविवृतिः By विश्वेश्वर, जनार्द्दनभट्ट, प्रबोध-यति, And जीवगोस्वामी. Substance, country-made paper, 11 × 5½ inches. Folia, 24. Lines, 12 on a page. Extent, 850 çlokas. Character, Bengali. Date ? Place of deposit, Dinājpur, Paṇḍit, Kṛṣṇadāsa Smṛtibhūṣaṇa. Appearance, fresh. Prose. Incorrect.

**Beginning.** श्रीराधाकृष्णः ।

अथ गोपालतापनीटीका ॥

क्लींकारादसृजद्विश्वं इति प्राह श्रुतेः शिवः ।

( ... ... ... ) ककाराज्जलसम्भवः ॥

इत्यादिभिः श्रीमता-गौतमेन भगवता स्वीयतन्त्रस्य प्रमाणता दर्शिता ... ... ... गोपालतापन्याख्या श्रुतिरियं स्वप्रतिपाद्यं श्रीकृष्णमेव सर्व्ववेदान्तसम्मत्या सर्व्वोत्तमत्वेन प्रतिपादयन्ती नमस्करोति सच्चिदानन्द-रूपायेति । कृष्णाय नम इत्यन्वयः कृष्णाय देवकीनन्दनाय इति ब्रह्मणो देवकीपुत्र इति च ॥ इत्यादि ।

**End.** उपसंहरति इत्वेति । तदेवं पुण्यतमामुत्तरतापनीरूपां स्तुतिं सर्व्वभूतानां कण्ठत्वं दत्वा अन्तर्हितवान् इत्यर्थः ( ... ... ... ... ... )

गान्धर्व्वीवरगान्धर्व्वगन्धबन्धुरकर्म्मणे ।

वृन्दावनवनीवृन्दनन्दिने नन्दतां मनः ॥

विश्वेश्वरकजनार्द्दनभट्टाभ्यां वैदिकाग्याभ्यां तद्वत् ।

प्रबोधयतिना लिखितं चिन्तयित्वातारतम्येन ॥

इत्युत्तरगोपालतापन्या विवृतिः सम्पूर्णा ॥

**Colophon.** श्रीसनातनरूपस्य चरणाब्जसुधेन्दुना ।

पूरिताटीप्पनी चेयं जीवेन सुखबोधिनी ॥

श्रीश्रीनाथाय नमः ॥

विषयः । गोपालोत्तरतापन्या व्याख्यानम् ।

---

**No. 81.** **गोपीप्रेमामृतं. आगमपुराणीयम्** Substance, country-made paper, $8 \times 2\frac{1}{2}$ inches. Folia, 5. Lines, 4 on a page. Extent, 32 çlokas Character, Bengali Date ? Place of deposit, Zilla Midnapur, Post Chandrakonā, Ayodhyá Raghunáthváti. Appearance, old. Verse. Generally correct.

**Beginning.** श्रीश्रीराधाकृष्णाभ्यां नमः । अर्ज्जुन उवाच ।

त्रैलोक्ये के भवद्भक्ताः के त्वां जानन्ति मर्म्मणि ।

केषु वा त्वं सदायत्तः केषु प्रेम तवातुलं ॥

तन्मे वदस्व भगवन्नगतीनां गतिप्रद ।

मयि चानुग्रहो यादृक् × × × परीक्षणं ॥

श्रीभगवान् उवाच ।

न तथा मे प्रियतमो ब्रह्मा रुद्रश्च × × × ।

न च लक्ष्मीर्नचात्मो(?)वा यथा गोपीजनो मम ॥ इत्यादि ।

**End.** श्रीभगवानुवाच ।
रहस्यानां रहस्यं यद्दुर्लभानाञ्च दुर्लभं ।
तत्ते वदाम्यहं पार्थ श्रुत्वा मनसि तत् शृणु ॥
गोपीभावेन ये भक्ता मामेव समुपासते ।
तेषु × × × तुष्टोऽस्मि सत्यं सत्यं न संशयः ॥

**Colophon.** इति आगमपुराणे श्रीकृष्णार्जुनसंवादे गोपीप्रेमामृतं समाप्तं ।

विषयः । गोपीनां भगवद्भक्तिधौरेयत्वकथनं ।

---

**No 82. गोविन्दवृन्दावनम्.** Substance, country-made paper, 13×3 inches. Folia, 22. Lines, 6 on a page. Extent, 550 çlokas. Character, Bengali. Date BS. 1051. Place of deposit, Zilla Midnapur, Post Chandrakoná, Ayodhyá Raghunáthváti. Appearance, old. Verse. Generally correct.

**Beginning.** ॐ नमो राधामोहनाय ।
एकदा शङ्करं द्रष्टुं स्वपुत्रं कृष्णतत्परं ।
तस्याश्रमं ययौ प्रीत्या भगवांश्चतुराननः ॥
ददर्श लोकनाथेशं ध्यायन्तञ्च जनार्द्दनं ।
प्रेमवारिसमाकीर्णं रोमाञ्चिततनुश्रियं ॥
तमुत्थाप्य प्रियं दोर्भ्यां कृष्णभक्तं पितामहः ।
पुलकावलिहृष्टाङ्गः सस्वजे स्नेहविह्वलः ॥
दृष्ट्वा देवो महाभक्त्या शङ्करस्तु पितामहं ।
तस्याग्रे भगवद्बुद्ध्या दण्डवत् पतितो भुवि ॥
पाद्यार्घ्यमधुपर्काद्यै र्यथाविधि तमर्च्चयेत् ।
विश्रान्तं सुखमासीनं पप्रच्छ स्वागतं ततः ॥
सन्तुष्टस्तमथोवाच महाभागवतः प्रभुः ।
नन्दपुत्रे भगवति कृष्णे वृन्दावनेश्वरे ।
किन्ते भक्तिः समुत्पन्ना सुदृढ़ा प्रेमलक्षणा ॥
धर्म्मार्थकाममोक्षेषु कच्चित्ते निस्पृहं मनः ।
कच्चित् कीर्त्तयसे ब्रह्मन् कृष्णनामानि सर्व्वदा ॥
गुरोः कारुणिकस्येदं श्रुत्वा च स ह भाषितम् ।
विनयावनतो भूत्वा शङ्करो वाक्यमब्रवीत् ॥ इत्यादि ॥

End. ह्रींकारं वह्निसंयुक्तं चनन्तं तदनन्तरं ।
नादविन्दुकलायुक्तं राधिकाये ततः परं ।
हृदयान्तं महादेव्या मन्त्रमष्टाक्षरं विदुः ॥
अस्य स्मरणमात्रेण किं न सिध्यति साधनम् ॥
इदं स्तोत्रमिदं मन्त्रं यस्य वाचि प्रवर्त्तते ।
त्रैलोक्यसुन्दरी राधा चित्ते तस्य निरन्तरं ।
वाक्सिद्धिं लभते योगी योगिनामपि दुर्लभम् ॥

Colophon. इति श्रीगोविन्दवृन्दावने श्रीराधाप्रादुर्भावः ॥ समाप्तश्चायं ग्रन्थः । श्रीगुरवे नमः । लिखितं श्रीमहेशघोषविश्वास । पुस्तकमिदं श्रीश्यामदाससेनतन्त्रवा ॥ सन १०५१ ... ... ॥

विषयः । इति श्रीनागरकृष्णदासविलिखित-श्रीकृष्णोपनिषद् ... ... गोविन्दवृन्दावनरहस्यं । इति श्रीगोविन्दवृन्दावने वंशीप्रादुर्भावः । इति श्रीगोविन्दवृन्दावने त्रिभङ्गकारणं । इति श्रीगोविन्दवृन्दावने राधाप्रादुर्भावः ॥

---

No. 83. गौरीदिगम्बरप्रहसनम् By शङ्करमिश्र. Substance, country-made paper, 12 × 3 inches. Folia, 12. Lines, 5 on a page. Extent, 240 çlokas. Character, Bengali. Date ? Place of deposit, Dinajpur, Rājārāmpur, Paṇdit Maheshchandra Tarkachūḍāmaṇi. Appearance, old. Prose and verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।
द्रिद्रीन्द्रीद्रीधधि कटनदन्नन्दि मुरजं ।
रणद्राणद्राण रणरणदघर्घररवं ॥
स्फुरत् फू फू फू फू फणिपतिफणा-फूत्कृतिशतं ।
शिवं भूयोभूयः प्रथमनटनाद्यं दिशतु वः ॥

( ... ... ... ) नान्द्यन्ते सूत्रधारः । अलमतिविस्तरेण । आदिष्टोस्मि सकलवसुन्धरावलयवलमानपवित्रकीर्त्तिना परमपवित्राभिजनेन विनयसदाचारविवेकेन परमपवित्रेण मिश्रश्रीभवनाथेन, यथा मत्तनूजन्मनः श्रीशङ्करस्याभिनवकृतिर्गौरीदिगम्बराभिधानं प्रहसनमभिनीयतामिति । तद्गृहिणीमाहूय सङ्गीतकमाचरामि ॥

End. गौरीं हस्ते धृत्वा ।
तीव्रेण तन्वि तपसा फलितं भवत्या

मङ्गामषेयफलमद्युनाविरासीत् ।
अन्योन्यसंघटनमित्थमभूदतस्त्वं
पुत्रं लभस्व द्विविषत्परिषद्वरेण्यं ॥
तेन हि,
श्रीमन्तःसन्तु सन्तः सपदि सुमनसां सौमनस्याय वह्नौ
षट्कर्म्माण्यखिलसन्ध्यं हविरनुदिवसं जुह्वतु प्रीतिभाजः ॥
गावश्चाम्भोधराश्च प्रचुरमिह पयः किञ्च मुञ्चन्तु नित्यं ।
राजानश्च प्रजासु प्रकृतिषु च सदा नीतिभाजो भवन्तु ॥
इति निष्क्रान्ताः सर्वे द्वितीया सिद्धिः ॥

**Colophon.** इति महोपाध्याय-श्रीशङ्करमिश्र-विरचितं गौरीदिगम्बरं नाम प्रहसनं सम्पूर्णं ॥

विषयः । हास्यरसप्रधाननिबन्धैः शिवपार्व्वत्योः परिणयवर्णनम् ।

---

**No. 84.** ग्रहपीठसाधनम् By आपदेव. Substance, country-made paper, 8 × 3 inches. Folia, 2. Lines, 12 on a page. Extent, 30 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Verse. Correct.

**Beginning.** श्रीवरदं दन्तमदं भक्तजनेभ्यस्तमदं, ।
देवतवृन्दे सदयं (...) तमीडे सदयं ।

**End.** श्रीवसिष्ठादिवाक्यानुसारां
लसदासनां खेटसत्पीठमालां ।
चकाराशु गोविन्दपौत्रैकराधैर्वि
नोदितो देव आपाभिधानः (?) ॥

**Colophon.** इति जनस्थानवासि आपदेवकृतग्रहपीठसाधनम् ।

विषयः । ग्रहाणां पीठकथनम् ।

---

**No. 85.** ग्रहयागकौमुदी By रामकृष्ण. Substance, country-made paper, 12 × 4 inches. Folia, 18. Lines, 7 on a page. Extent, 365 çlokas. Character, Bengali. Date ? Place of deposit, Balihâr, Rājdhāni Varadākānta Cakravartti. Appearance, old. Prose and verse. Generally correct.

Beginning. ॐ नमो गोविन्दाय ।

श्रीकृष्णं ग्रहरूपेण सूचयन्तं शुभाशुभं ।
प्रणम्य रामकृष्णेण तन्यते ग्रहकौमुदी ॥
तत्राश्विन्यादिनक्षत्रावस्थानेन शुभाशुभसूचकदेवतात्वं ग्रहत्वं सूचकत्व-
मुद्भूतादृष्टादृष्टानुमापकत्वं तद्बोधस्य कार्य्ये जनयितव्ये सहकारित्वाभः ।
न तु सुखदुःखकारकत्वं इत्यादि ।

End. ॐ कयानश्चित्र इत्यादि-राहुमन्त्रः । ॐ काण्डादित्यादि-केतुमन्त्रः ।

Colophon. इति श्रीरामकृष्णभट्टाचार्य्यकृता ग्रहयागकौमुदी समाप्ता ।

विषयः । ग्रहयागप्रयोगादिनिरूपणम् ।

---

No. 87. घटकर्परटीका (खण्डिता) By रमानाथ. Substance, English yellow paper, 6×4 inches. Folia, 3. Lines, 7 on a page. Extent, 50 çlokas. Character, Bengali. Date ? Place of deposit, Upalatagram, Post Mepar, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavasis. Appearance, fresh. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।

नत्वा गुरोः पादरजस्त्रिदाख्यं
कामादिषेव्यं विदिवस्य हेतुम् ।
विप्रो रमानाथ इमां तनोमि
टीकां प्रगल्भां घटकर्परस्य ॥
इदानीं श्रीकालिदासस्य प्रसादात् घटकर्परः कुम्भकारो वापीह्रदजल-
पानान्तरेण मनसि देवतानमस्कारं ग्रन्थान्तरे देवतावर्णनञ्च कृत्वा वर्षासु
तद्वर्णनमारब्धवानिति किं वदन्तीति श्लोकमाह निचितमितीत्यादि ।

End. चिप्रमित्यादि । कोऽप्यनिर्वचनीयगुणो जनः तानि कान्तामुखानि सम्प्रति
वर्षासमये चिप्रं शीघ्रं प्रसादयति प्रसन्नानि करोतीत्यर्थः ।

Colophon. (अतः खण्डितं) ।

विषयः । घटकर्परस्य व्याख्यानम् ।

---

**No. 88.** घटकर्परटीका By देवीदास. Substance, country-made paper, 9 × 3 inches. Folia, 13. Lines, 6 on a page. Extent, 42 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetágrám, Bhaṭṭágrám, Paṇḍit Rámhridaya Bhaṭṭácháryya. Appearance, old. Prose. Generally correct.

**Beginning.** ॐ नमो गणेशाय । ॐ नमः शिवादिपद्भ्यः ।

शिरो देविपदाम्भोजे सदेदं मम तिष्ठतु ।
देहि मह्यन्तु तज्ज्ञानं येनैषा पूरिता भवेत् ॥
घटकर्परनामा कश्चित् कविः शरदादौ गवे सति प्राहृषं दृष्ट्वा तद्वर्णनमकरोत् तत् किमित्याह निचितमित्यादि । तदेकविंशतिश्लोका मया व्याख्यायन्ते प्रत्येकेन यथा नीरं जलं तत् ददातीति नीरदः दः प्राचेत्यनेन अङ् इदचीत्यादिना आगुक् नीरदस्ते नीरदैर्मेघै रुपेत्य आगत्य यं आकाशं निचितं व्याप्तं । इत्यादि ।

**End.** तत्र शरीरस्पर्शनमित्यस्योपलक्षणत्वादच वाचा अर्थविशेषज्ञानमपि शपथो भवति अथवा अत्रापि शरीरस्पर्श × × × × न विद्यत एव मयाद्दि भावानुरक्तवनिता सुरतैः सह अयमहं जनः शपे × × चितं शरीरस्पर्शनं विद्यते × × × × इति कर्त्तरि विशेषणं भावानुरक्तवनिता सुरतैः सह संयोगात् भूषिता एव भवति इति भूषितेति विशेषणमुपादानम् ॥

**Colophon.** इति श्रीदेवीदासेन विरचितायां टीकायां घटकर्पराख्यं काव्यं सम्पूर्णम् ॥

विषयः घटकर्परस्य व्याख्यानम् ॥

---

**No. 89.** चण्डीवादार्थमाला By कृष्णकान्त. Substance, country-made paper, 16 × 4 inches. Folia, 5. Lines, 9 on a page. Extent, 225 çlokas. Character, Bengali. Date, SK. 1742. Place of deposit, Zilla Midnapur, Post Garvetagram Khunverá, Late Paṇḍit S'rípati Bhattácharyya. Appearance, fresh. Prose. Correct.

**Beginning.** श्रीदुर्गा ।

चण्डीत्वं किन्तावत् मार्कण्डेयप्रोक्तत्वे सति देवीमाहात्म्यत्वं । देवीमाहात्म्यं यथा रुद्रयामले पठेदारभ्य सावर्णिः सूर्य्यतनय आदितः समापयेत्तु तस्मान्ते सावर्णिर्भविता मनुः । एकाकी इत्यादि एकादाकिञ्चासत्राये

इति श्रीकिन्। सजातीयव्यवच्छेदो बोध्यते तेनाश्वे सत्यपि न दोष इति माधवाचार्य्य-विद्याविनोद-उद्दीचिभट्टाचार्य्याः। इत्यादि।

End. स्वगात्ररुधिरं दद्यान्मानवः सिद्धसन्निभ इति दर्शनात् केचित्तु ब्राह्मणस्यैव निन्दा नत्वन्येषामनन्तरञ्च मद्यं दत्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयत इति दर्शनात् ननु तथात्वे कलौ वर्ज्या द्विजातिभिरितिवहुवचनस्यानर्थक्यादवुत्तस्यार्थं ज्ञेयं॥

Colophon. इति श्रीकृष्णकान्तदेवशर्म्मणा संगृहीता चण्डीवादार्थमाला समाप्ता। शकाब्दाः १७४१। ११। २१॥

विषयः। चण्डीस्वरूपनिरूपणं। द्वितीये सत्यपि वाजिनि एकाकिप्रभृत्यसम्बद्ध शब्दानां समर्थनञ्च।

---

**No. 90.** चन्दनवाला चौपाइ. Substance, country-made paper, 11 × 4½ inches. Folia, 10. Lines, 15 on a page. Extent, 1,754 çlokas. Character, Nāgara. Date, Saṃ 1754. Place of deposit, Benares, Dikmaṇḍalācārya Mahārāja Bālacandra. Appearance, old. Verse. Correct.

Beginning. ऐं नमः।

दोहा प्रथम जिनेसर
पयनमी समरी
श्रीजिनवीर, श्रीजिनशासन
जय करण पय उपगायी।

End. सीतलतनागु श्रीसंघ
साहजि भाष्यासरस मुनिन्द,
सुनतां गुणतां राग
धन्या सिरी सुखसंपति आनन्द।

Colophon. इति चन्दनवाला चौपाई सम्पूर्णम् सम्वत् १७५४. माधमासे शुक्लपक्षे।

विषयः। चन्दनवालानाम्न्याः कस्या अपि जैनधर्मावलम्बिन्याः श्रेष्ठिकन्यायाः कथा।

---

**No. 91.** चयनप्रयोगः. By Substance, country-made paper, 11 × 4½ inches. Folia, 150. Lines, 12 on a page. Extent, 4,500 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Govinda Bhaṭṭa. Appearance, old. Prose. Correct.

Beginning. अग्निं वेध्यमानाः । अग्निरितीष्टकाहतं स्थण्डिलमुच्यते तत्संयोगात् क्रतुरप्यग्निरित्युच्यते लक्षणया । तं वेध्यमानस्थण्डिलेनाग्निगुणकेन क्रतुना-यक्ष्यमाण इत्यर्थः सोग्निः सोमाङ्गप्रकृतावुत्तरवेद्या नाम्यामग्निप्रणयनं विहितं तस्यैष श्लोको यदुत्तरवेदिनाभिरिति श्रुतेः साग्निचित्ये क्रतौ ।

End. एके विंश उक्थ इत्यादि पश्चाकाले अश्वमेदमासभते पूर्व्ववत् पत्नी-संयाजात पूर्व्ववद्वीनसंततयः ... ... इतो नास्ति ।

Colophon. ... ... ... ... ... ... ... ... ... ...

विषयः । चयनयागविधिः ।

( असम्पूर्णोयं ग्रन्थः ) ।

---

No. 92. चातुर्ज्ञानम्. Susbtanee, country-made paper, 10×4½ inches. Folia, 24. Lines, 9 on a page. Extent, 660 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares, Paṇḍit Govinda Bhaṭṭa. Appearance, old. Prose. Ineorrect.

Begininng. अग्निमीड़े सुताः विश्वादधाना अजोषा इन्द्रताः सोमपा इमा जुष्टा मत्सरा इरा घृतश्चा यजत्रा द्रविणो दधानाः स्तुधाः पञ्चदश. अग्निमीले तु विज्ञातौ दधाना इन्द्रे योगे चत्वेमत्व. धने ये इत्वते मद्दे यज्ञे सुजिह्वौ भ्रियन्त एकादश. य एकस्वर्षणीनां कक्षीवन्तं य औशिज इति वर्जयित्वा ।

End. यथा काममवगच्छा उत्थितं द्विपदं काण्ड अरवीनखण्डं न दुर्वर्णो इति दुर्वर्णो जोध पतन्त्या विसर्गेण विश्वामित्रजमदग्नी इति दस्युहन्तमं मकारखण्डं नम कृणोरश्लोकं कल्पयतु पिंशतु सुसत्त्वमिति ।

Colophon. इति अष्टमाष्टकचातुर्ज्ञानं समाप्तं ।

विषयः । ऋग्वेदस्यसूक्तादीनां निरूपणम् ।

---

No. 93. चित्तामोदसिन्धुः. By यष्ठीदासकविराज. Substance, country-made paper, 16×4 inches. Folia, 9. Lines, 5 on a page. Extent, 140 çlokas. Character, Bengali. Date of composition SK. 1601. Place of deposit, Dinajpur, Paṇḍit Kṛṣṇadāsa Smritibhūṣaṇa. Appearance, tolerable. Verse. Generally correct.

**Beginning.** ॐ नमः श्रीकृष्णाय ।

अखिलभुवननाथं दुःखमातङ्गसिंहं
सुखशशिसितपक्षं नित्यमालम्ब्य कृष्णं ।
अधमविषयचिन्तावह्निसन्तापराशि-
व्यथित सपदि चिन्तामोदसिन्धौ निमज्ज ।

× × × × × ×

**End.** किन्त्वस्माभिस्तदीयारुणकमलपदामोदमुग्धा जना ये ।
तेषां पादारविन्दे स्थिरतरमधुपे भाव्यमेवाचिरेण ॥
शाके वर्षे धरित्रीखरसशशिमिते वैदिको गौड़देशे ।
गङ्गापूरे ऽवतीर्णः सुकृतिगणयुते तर्कवागीशपुत्रः ॥
चिन्तामोदाख्यकाव्यं हरिमहिमसुधाबिन्दुसम्पर्कमिष्टं ।
षष्ठीदासो विपश्चित्तरलतरमनाश्चित्तशुद्ध्यामकार्षीत् ॥
इति षष्ठीदासकविराजविरचितश्चिन्तामोदसिन्धुः समाप्तः ॥

**Colophon.** शाके तारकनाशकाननकुम्भत् कन्दर्पकोले दिने ?
तारानायकनायके खरकरे कन्याख्यके शोकति ?
... प्रालिखद्यदुनाथ नामक ... ...
× × × × लौकिककष्टान्तकं ॥

विषयः । कृष्णमाहात्म्य कथनम् ॥

---

**No. 94.** चिन्तामणिपार्श्वनाथकल्प. Substance country-made paper, 12×5 inches. Folia, 2. Lines, 25 on a page. Extent, 200 çlokas. Character, Nāgara. Date, SN. 1904. Place of deposit, Benares, Dikmaṇḍalācāryya Mahārāja Bālacandra. Appearance, new. Prose and Verse. Incorrect.

**Beginning.** ॐ नमः श्री ॐ पार्श्वाई नमः ।

किञ्चिद् गुरूणां वदनारविन्दा-
न्निशम्य सम्यक् परमार्थसूत्रैः ।
विलिख्यते स्वान्यजनोपकृत्यै
श्रीपार्श्वचिन्तामणिमन्त्रकल्पः ॥

**End.** नट्ठ मयठाने पणट कम्मठ णठ संसारे ।
परिमिठि णठि अठे अठ गुणाधीसरं वन्दे ॥

अनेनवार् १०८, अथवा २१ पुष्पादिक्रियानके चियते मदर्थं अविक्रयो भवति ।

Colophon. इति चिन्तामणिपार्श्वनाथकल्पः सम्पूर्णः . संवत् १९०४ .

विषयः । चिन्तामणिपार्श्वनाथमन्त्रादि-कथनम् ।

---

**No. 95.** चैतन्यचन्द्रामृततरङ्गिनी . Substance, country-made paper, 12×5 inches. Folia, 28. Lines, 7 on a page. Extent, 700 çlokas. Character, Bengali. Date, ? Place of deposit, Dinajpur. Paṇḍit Kṛṣṇadāsa Smṛitibhūṣana. Appearance, tolerable. Prose. Generally correct.

**Beginning.** श्रीगोविन्ददेवो जयति ॥

श्रीमन्नित्यानन्दचैतन्यचन्द्रौ

दीनश्रेणिपीयूषसान्द्रौ

विद्वद्वृन्दस्यन्दमानात्मतत्त्वौ

सत्त्वौदार्य्यात् सेवकान्नः पुणीतां ॥

अथ सोयं विद्वत्कविहृन्दवन्द्यचरणः प्रबोधानन्दनामा न्यासीन्द्रः श्रीकृष्ण-चैतन्यस्य भगवतो मञ्जुमहिमपुञ्जोन्मत्तः स त्रयस्त्रिंशत्शततमेन ग्रन्थेन तं निजाभीष्टपादारविन्दं स्तोत्रयति तत्रैकेन पद्येन स्तुवन् सप्रयोजनं तस्य प्रादुर्भावं निरूपयति । स्तुमस्तमिति । तं व्रजपतिकुमारं स्तुमः कीदृशं चैतन्याकृतिं ।

**End.** तथापि बालभावात् स्वबाल्यचापल्यादयं मल्लक्षणो जनो यथा तथा जल्पतु तथापि स गौरहरिर्मे प्रसीदतु प्रीणातु कौतुकप्रियत्वात् ईश्वरस्य इति भावः ॥

× × × × × ×

तथा व्याख्यातवानस्मि दारुयन्त्रोपमानकः ॥

Colophon. इति श्रीप्रबोधानन्दसरस्वतीविरचितस्य श्रीचैतन्यचन्द्रामृतस्य टीका चैतन्यचन्द्रामृततरङ्गिनी समाप्ता ॥

विषयः । प्रबोधानन्दकृतचैतन्यचन्द्रामृतस्य व्याख्यानम् ॥

---

**No. 96.** छन्दोदीपः . Substance, country-made paper, 12×2½ inches. Folia, 40. Lines, 3 on a page. Extent, 375 çlokas. Character, Bengali. Date of composition, SK. 1700. Place of deposit, Dinajpur, Rājārāmpur, Paṇḍit Çyāmāprasanna Vācaspati. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमः शिवाय ।

गौरीशं वाङ्मयं देवं प्रणम्य विदुषां मुदे
छन्दसां सारमाहृत्य छन्दोदीपः प्रतन्यते ।

छन्दोमञ्जर्य्यां ।

पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसंख्यातं जातिर्मात्रा कृता भवेत् ।
सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा ॥

End. एकैवातिकृतिः प्रोक्ता ख्याता क्रौञ्चपदातु या ।
षड्विंशत्यक्षराप्येका कविभिः कथितोत्कृतिः
छन्दःशास्त्रे तु विख्यातं सा भुजङ्गविजृम्भितं ।
उक्थादिषड्विंशतिसंज्ञकेषु
छन्दःसु भेदा विधुनेत्रचन्द्राः
समाहृताः पिङ्गलनागसम्मता
मुदं वितन्वन्तु सदा मनीषिणां ॥

Colophon. इति छन्दोदीपे प्रकीर्णकः प्रकाशः समाप्तश्चायं छन्दोदीपः ।
शाके शून्याभ्रसप्तक्षितिपरिगणिते श्रीनवद्वीपनाथं ।
तातं राजेन्द्रदेवं दलितकलिबलं वाजपेयादियागैः ।
नत्वा तस्य द्वितीयः सुत इममखिलं सारमाकृष्य यत्ना-
च्छन्दोदीपं प्रतीपं निखिलबुधमनोध्वान्तराशेरपूर्व्वं ।
फाल्गुनोनत्रिंशद्दिने प्रारब्धं शुभवत्सरे विधुवेदमिते स्वीयच्छन्दोदीपः
समाप्तः वाजपेयि-श्रीमन्महाराज-राजेन्द्राब्दाः पञ्चाशत्संख्यकाः ॥

विषयः । छन्दोनिरूपणम् ॥

---

**No. 97.** छान्दोग्योपनिषद्भाष्यम्. By आनन्दतीर्थ. Substance, country-made paper, 8×3 inches. Folia, 48. Lines, 12 on a page. Extent, 1,152 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Verse. Correct.

श्रीगुरुभ्यो नमः ।

Beginning. श्रीमदानन्दतीर्थभगवत्पादाचार्य्येभ्यो नमः ।
अत्युद्रिक्तविदोषसत्सुखमहाज्ञानैकतानप्रभा
सर्व्वप्राभवशक्तिभोगविलसत्सानन्ददिव्याकृतिं,

हृद्दिस्थाननिरोधनित्यनियतिज्ञानप्रकाशादृति
ध्वान्तामोचविमोचदं हरिमहं नित्यं सदोपास्महे ॥

End. आनन्दतीर्थ इति तु यस्य नाम द्वितीयकं ।
पूर्णप्रज्ञेन तेनेदं कृतं भाष्यं हरेः प्रियं ॥
नित्यानन्दो हरिः पूर्णो नित्यं संप्रीयतां मम ।
नमस्तस्मै नमस्तस्मै नमस्तस्मै च विष्णवे ॥

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमच्छान्दोग्योपनिषद्भाष्ये
अष्टमोध्यायः ।

विषयः । माध्वमते छान्दोग्योपनिषद्व्याख्या ।

---

No. 98. छान्दोग्योपनिषद्भाष्यम् By सायनाचार्य्य. Substance, country-made paper, 14×5 inches. Folia, 114. Lines, 11 on a page. Extent, 5,016 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares, Paṇḍit Govinda Bhatta. Appearance, new. Prose. Correct.

Beginning. वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ।
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ।
तत् कटाक्षेण तद्रूपं दधत्बुक्कमहीपतिः ।
आदिशत् सायनाचार्य्यं वेदार्थस्य प्रकाशने ।
ये पूर्व्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात् ।
कृपालुः सायनाचार्य्यो वेदार्थं वक्तुमुद्यतः
सामवेदार्थमेषोत्र प्रकाशयति सादरं ।

End. तनु विस्तारे छान्दसे लिटि तनिपत्योश्छन्दसीत्युपधालोपः किञ्च हे इष्णो शत्रुधर्षण शीलसोम स त्वं वशीव कवचीव आरुज असुरान् जहि, अपि या अन्तरश्मनि अस्या अन्तरश्मनि अस्या अन्तरश्मन् इति छन्दोगबह्वृचानां पाठभेदः, इति पञ्चमस्याध्यायस्य एकादशः खण्डः इति काकुभं समाप्तं ।

Colophon. वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमत्सायनाचार्य्यविरचिते माधवीये वेदार्थप्रकाशे छन्दाव्याख्याने पञ्चमोध्यायः ।

विषयः । छान्दोग्योपनिषद्व्याख्या ।

---

**No. 99.** **जन्मरहस्यं (भविष्यपुराणीयम्).** Substance, country-made paper, 12×4 inches. Folia, 5. Lines, 7 on a page. Extent, 82 çlokas. Character, Bengali. Date, SK. 1,740. Place of deposit, Zilla Midnapur, Post Garveta Grām Khunverá, Late Paṇḍit Rámtáran Siromani. Appearance, fresh. Verse. Correct.

**Beginning.** ॐ नमः श्रीकृष्णाय ।

नारद उवाच ।

अस्मिन्नेकार्णवे घोरे नष्टे स्थावरजङ्गमे ।
चन्द्रार्कें गगने नष्टे ज्योतिषि प्रलयं गते ॥
अचिन्त्यभावमव्यक्तं योगनिद्रामुपागतं ।
नारदः परिपप्रच्छ भगवन्तं जनार्द्दनं ॥
केषु स्थानेषु द्रष्टव्यो भववंस्त्वं मया प्रभो ।
तन्मे कथय तत्वेन अनुग्राह्यो ह्यहं यदि ॥

श्रीभगवानुवाच ।

अहं ते कथयिष्यामि प्रादुर्भावं महामुने ।
यं पठित्वा द्विजाः सर्व्वे यास्यन्ति परमां गतिं ॥ इत्यादि ।

**End.** यः पठेत् प्रातरुत्थाय मम जन्मानुकीर्त्तनं ।
मर्त्त्यलोकं परित्यज्य मम लोकं स गच्छति ।
न च मृत्युभयं तस्य यः पठेन्ममकीर्त्तनम् ॥

**Colophon.** इति श्रीकृष्णनारदसंबादे भविष्यपुराणोक्तं जन्मरहस्यं समाप्तं ।
ॐ तत्सत् । शुभमस्तु शकाब्दाः १७४० ।

विषयः । भगवतोऽवतारनिचयकथनमुखेन श्रीकृष्णावतारस्य वृत्तान्तकीर्त्तनम् ।

---

**No. 100.** **जलाशयोत्सर्गविधिः.** Substance, country-made paper, 8×3 inches. Folia, 14. Lines, 9 on a page. Extent, 260 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

अथ जलाशयोत्सर्गः ।

स चोदगयने माघादिपञ्चसु श्रावणवर्जनमासेषु वा शुक्लपक्षे द्वितीया-तृतीया-पञ्चमी-सप्तमी-दशमी-त्रयोदशी-पौर्णमासीषु तिथिषु बुधगुरुशुक्र-वारेषु रविसोमयोर्वेत्यादि ।

End. १०००-१०८-५०-१० वा विप्रान् संभोज्य भूयसीं दक्षिणां दत्वा कर्मेश्वरार्पणं कृत्वा सुहृद्युतो भुञ्जीत इति ।

Colophon. इति श्रीमन्नारायणभट्टसुरिसूनुरामकृष्णात्मजकमलाकरभट्टकृतो जलाशयोत्-सर्गप्रयोगः समाप्तः ।

विषयः । जलाशयानां उत्सर्गविधिः ।

---

**No. 101.** ( जातकपद्धतिटीका ) भावार्थमञ्जरी By अच्युत. Substance, country-made paper, 10×3 inches. Folia, 44 (without 4–32). Lines, 8 on a page. Extent, 1,100 çlokas. Character, Bengali. Date, SK. 1571. Place of deposit Zilla Midnapur, Post office Garvetā Grām Khuverā, Late Paṇḍit Rāmtaran S'iromani. Appearance, old. Prose. Correct.

Beginning. नमोवृन्दावनचन्द्राय ।

कमलवदनारुणनयनं परमं परमार्थविदां रघूणां ।
ससलिलजलदश्यामं रामं सहलक्ष्मणं वन्दे ॥
श्रीमद्वामनभट्टशेखरमणेः सत्कर्म्मवारां निधेः
सूनुः सागरचन्द्रमाः समजनि प्रख्यातकीर्त्तिच्छटः ।
नो दोषाकरतामुपैति न जड़ो नाङ्के × × लक्ष्यते
पूर्णस्ताभकलाभिरत्र कमलास्वेदं दधत्यद्भुतं ॥
व्याख्याताकाव्यसिन्धोरभिनवकवितापद्मिनीनां विकाशे
भास्वानुच्चैर्नभस्वानतिजव × × × प्राकृतानां कृतानां ।
न्याये व्यासकृतौ कृती कृतधियामुच्चैर्विधाने विधि-
र्भक्तः श्रीरघुनाथपादयुगले श्रीसागरः × × × ॥
भावाभावविचारे जातकविहिते × × × तत् सूनुः ।
ज्ञानी श्रीपतिटीकां कुरुते भट्टाचार्य्यतः श्रीमान् ॥ (?)
श्रीपतिव्याख्यातात्वच्युतविहितालङ्कृता नवीनापि ।
भावार्थमञ्जरीयं दयिता भावार्थविद्भि-भविता ॥
श्रीमिहिराचार्य्याच्युतभट्टेन श्रीपतिकृतजातकपद्धतिविवरणमारभ्यत इत्यादि ।

End. इदमेव प्रयोजनं ग्रन्थकारेण पूर्व्वग्रन्थानुसारेणोक्तं किन्तु सप्तवर्गजफलै रेतत् ज्ञातव्यं। खोचे रूपं चरणविचितेनित्यादिप्रकारेण शुभं बुद्धा अनयोर्यदधिकं तदपफलं ग्रहः परिपाचयति। शुभाधिक्ये शुभं अशुभाधिक्ये अशुभमिति।
इत्थं गौतमगोत्रेण श्रीयुताच्युतशर्म्मणा।
कृतं श्रीपतिपद्धत्यां चतुर्थाध्यायवर्णनम्॥

Colophon. इति ग्रहेष्टकाध्यायविवरणं चतुर्थः।
शाकेऽगाश्ववाणेन्दौ १५७१ ध्यात्वा कृष्णपदाम्बुजं।
लिलेख श्रीमहादेवेष्टकाच्चाच्युत शर्म्मणः॥ ?

विषयः। श्रीपतिभट्टकृतजातकपद्धतेर्विवरणम्।

---

**No. 102.** जिनचैत्यनमस्कारः. Substance, country-made paper, 11 × 4½ inches. Folia, 2. Lines 11 on a page. Extent, 44 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Dikmaṇḍalācāryya Mahārāja Bālacandra. Appearance, new. Verse. Incorrect.

Beginning. स (...) न्या देवलोके रविशशिभवने व्यन्तराणां निकाये।
नक्षत्राणां निवासे ग्रहगणपटले तारकाणां विमाने।
पाताले वा नगेन्द्रे स्फुटमणिकिरणे ध्वस्तशास्तान्धकारे,
श्रीमत्तीर्थंकराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे।

End. तेषां श्रीतीर्थयात्राफलमतुलमलं जायते मानवानां
कार्य्यं सिद्धिस्तथोचैःप्रभृति च सततं चित्तमानन्दकारे।

Colophon. इति श्रीजिनचैत्यनमस्कारः समाप्तः।

विषयः। जैनतीर्थंकरचैत्यनमस्कारकथनम्।

---

**No. 103.** जीवत्पितृककर्त्तव्यनिर्णयः By बालकृष्णभट्ट. Substance, country-made paper, 8 × 3 inches. Folia, 8. Lines, 9 on a page. Extent, 150 çlokas. Character, Nāgara. Date, SN. 1785. Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः।
सत्पद्मचक्रादियुतं प्रसन्नं पीताम्बरं कौस्तुभभूषिताङ्गं
यशोदयालिङ्गितपूर्णदेहं सत्यव्रतं कृष्णमहं भजामि।

End. श्रीबालक्लष्णरचितात् जीवत्पितृकनिर्णयात्
भागीरथीमौलिमालः शम्भुस्तुष्यति सर्व्वदा ।

Colophon. इति श्रीमद्राङ्गोजिभट्टात्मजबालकृष्णभट्टविरचितो जीवत्पितृककर्त्तव्यनिर्णयः समाप्तः । संवत् १७८५ ।

विषयः । जीवत्पितृककर्त्तव्यकथनम् ।

---

**No. 104.** ज्ञानरत्नकोशः. Substance, country-made paper, 11 × 3 inches. Folia, 137. Lines, 7 on a page. Extent, 2,000 çlokas. Character, Bengali. Date SM. 1847. Place of deposit, Calcutta, Viçvakoṣa office, Babu Nagendranath Basu. Appearance, fresh. Verse. Incorrect.

Beginning. श्रीगणेशाय नमः ।

अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।
सर्व्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥
चतुर्मुखमुखाम्भोजवनदुर्गवधू र्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥

श्रीविश्वकर्म्मोवाच ।

श्वेताच ब्राह्मणी भूमीरक्ता वै चत्रिया स्मृता
पीतवर्णा भवेद्वैश्या शूद्रा कृष्णानुवर्णिनी । इत्यादि ।

End. विंशत्यात्तनकनिष्ठानि ज्येष्ठां तदांशवर्द्धना,
एकमादौ भवेन्मानं त्रिविधं मानमेव हि ।
आसनस्योद्भवा चीणा क्रमेणापि क्रमोद्भवा ।
स्थिलासनकेशान्तप्रमाणमेव सम्भवं ।

Colophon. इति श्रीअपराजितपृच्छायां प्रतिमाप्रमाणं द्विशताग्रे नवमसूत्रं समाप्तं ॥
संवत १८४७ ॥

विषयः । भूमिवर्णादिनिरूपणम् ॥ महापीठलक्षणादिकथनम् ॥ चतुष्प्रकारपीठलक्षणकथनम् ॥ प्रासादमानकरणादिनिरूपणम् ॥ वर्द्धमानाद्यष्टमण्डपनिरूपणम् ॥ मण्डपलक्षणादिकथनम् ॥ द्वारमानादिकथनम् ॥ प्रतिमाप्रमाणादिकथनम् ॥

---

**No. 105.** ज्ञापकसमुच्चयः By पुरुषोत्तमदेव. Substance, country-made paper, 10×4 inches. Folia, 60. Lines, 4 on a page. Extent 500 çlokas. Character, Bengali. Date? Place of deposit, Bhāṇḍārapur, Dist Vaguḍā, Babu Kāliçaraṇa Cakravartti. Appearance old. Prose. Incorrect.

**Beginning.** ॐ नमो गणेशाय ।

यस्योक्ते परिभाषाणां वृत्तिं हृद्यसुसम्मतां ।
पुरुषोत्तम आरेभे स ज्ञापकसमुच्चयं
तरप्तमब्विधावेतौ सद्दिनिव ततो यस्मादीयः ? × × × × इति वा वक्तव्ये प्रकरणापकर्षे तरप्तमपौ स इति ज्ञापयति प्रकर्षार्थमन्तरेणापि क्वचित् स्वार्थे तरवस्तीति ।

**End.** अ अ इति शास्त्रान्तरे विवृतप्रत्याससत्तिवचनं ज्ञापयति व्याकरणप्रक्रियायामकारस्य विवृतोपदेशः । आकारग्रहणेनार्थं इति ॥

**Colophon.** इति श्रीमहामहोपाध्याय-श्रीपुरुषोत्तमदेव-विरचिते ज्ञापकसमुच्चये ऽष्टमोऽध्यायः ॥ समाप्तश्चेदं पुस्तकम् ॥

विषयः । संक्षेपतः पाणिनीयप्रत्ययादिकथनम् ।

---

**No. 106.** ज्योतिष्कणिका By कृष्णानन्दचक्रवर्त्ती. Substance, country-made paper, 12×3 inches. Folia, 70. Lines, 6 on a page. Extent, 1,200 çlokas. Character, Bengali. Date SK. 1687. Place of deposit, Balihār Rājadhāni, Babu Varadākānta Cakravartti. Appearance, tolerable. Prose and Verse. Generally correct.

**Beginning.** ॐ श्रीगुरवे नमः ।

नमामि परमात्मानम् सर्व्वलोकेश्वरेश्वरं ।
अविचिन्त्यमहाशक्तिं भक्तिकारुण्यवारिधिं ॥
असत्यमपि संसारं यद्भक्तिः सत्यतां नयेत् ।
× × × × × ×
हे जना यदि लग्नादि संक्षेपाज्ज्ञातुमिच्छथ ।
सुज्योतिष्कणिका यत्नात् श्रूयतां कर्म्मपावनी ॥
समालोक्य बहून्ग्रन्थान् कृता श्रीकृष्णशर्म्मणा ।
सुगमा स्वल्पबुद्धीनां झटिति ज्ञानहेतवे ।

अथ राशिसंज्ञा ॥

मेष-वृष-मिथुन-कर्कट-सिंहाः ...

... ... इति च राशयः कथिताः ।

सप्तविंशतिभिर्ज्योतिश्चक्रं स्तिमितवायुगं

तदर्कांशो भवेद्राशिर्नवर्क्षचरणाङ्कितः ॥ इत्यादि ।

**End.** ॐ चमस्वेति प्रत्येकस्थापनक्रमेण विसृज्य अच्छिद्रावधारणम् कुर्य्यात् इति नवग्रहपूजापद्धतिः ॥ इति ज्योतिष्कणिकायामष्टमः परिच्छेदः ॥

ज्योतिःशास्त्रमहाधनानि बहुशः सन्ति प्रशस्तानि वै

सन्तो मत्कृतिमल्पिकामपि वरिष्यन्ते गुणग्राहिणः ।

अम्भोधौ परिलब्धरत्ननिवहेचास्यैव एवम्विधं

यत् कृत्येपि तदेव रत्नममलं लब्ध्वाप्युपेक्षिष्यते ।

श्रीविक्रमादित्यचम्पकयष्टिश्रीकृष्णशर्म्मा चक्रवर्त्ती ।

चकार यत्नात् सुगमं कृतीनामज्ञप्रबोधार्थमिमं निबन्धं ॥

**Colophon.** इति श्रीकृष्णानन्दचक्रवर्त्तिविरचिता ज्योतिष्कणिका समाप्ता ॥ श्रीकृष्ण-गोविन्दशर्म्मणः पुस्तकमिदं शकाब्दाः १६८७ ॥

विषयः । राशिसंज्ञाकथनम् ॥ राशिनक्षत्रविभागकथनम् ॥ राश्युदयलग्नमानादि-कथनम् ॥ द्रेक्कानादिकथनम् । नवांशादिकथनम् ।। दिक्पतिकथनम् ॥ ग्रहाणां शत्रुमित्रादि-कथनम् ॥ ग्रहसञ्चारशुभाशुभफलकथनम् ॥ नक्षत्राधिपादिकथनम् ॥ रिष्टिफलादिकथनम् ॥ योगादिकथनम् ॥ वारवेलाकालवेलादिकथनम् ॥ रव्यादिशुद्धिकथनम् । कालशुद्धि-कथनम् । विवाहविहितनक्षत्रादिकथनम् ॥ गर्भाधानविहितनक्षत्रादिकथनम् ॥ पुंसवनादि-विहितनक्षत्रकथनम् ।। वीजवपनादिविहितदिनादिकथनम् ॥ लग्नकथनम् ॥ अभिजित्-क्षणकथनम् । उपायोगादिकथनम् ॥ संक्रान्तिनिरूपणम् ॥ वास्त्वादिनिरूपणम् ॥ रिष्टि-भङ्गादिकथनम् । रव्यादीनां भोग्यवर्षादिकथनम् ॥ नवग्रहपूजादिकथनम् ॥

---

**No. 107.** ज्योतिःसंक्षेपः By कृष्णदासशर्म्मा. Substance, country-made paper, 18×3 inches. Folia, 46. Lines, 6 on a page. Extent, 1,150 çlokas. Character, Bengali. Date SK. 1725. Place of deposit, Balihār Dist Rājasāhī, Paṇḍit Kālī Çandra Bhaṭṭācārya. Appearance, tolerable. Prose and Verse. Correct.

**Beginning.** ॐ नमो गणेशाय ।

यन्मण्डले ब्रह्मणि दैवतानि तेजः स्वरूपेण सदा वसन्ति ।

सर्व्वात्मकं कारणमीश्वरं तं मुक्तिप्रदं सूर्य्यमहं नमामि ॥

गुरुं नत्वेष्टदेवांश्च श्रीकृष्णदासशर्म्मणा ।
अभ्यासार्थं बालकानां ज्योतिःसंक्षेप उच्यते ॥
तत्र प्रथमतो वक्ष्ये वारादीनां स्वरूपकं ।

× × × × × ×

उदयादोदयं भानोर्भौमसावनवासराः ।
इति सूर्य्यसिद्धान्तोक्तेन सूर्य्योदयावधि सूर्य्योदयान्तरं यावत् दिनाधिपस्य रव्यादेर्भोग्यो दिवारात्रिस्वरूपः षष्टिदण्डात्मकः कालो वार इति ।

**End.** अथ यात्राप्रत्यागमनं ।

तिथावरिक्ते सुभदे सुचन्द्रे
पापेषु केन्द्राष्टमवर्ज्जितेषु ।
ग्राम्ये स्थिरे वा जनिते सुलग्ने
गृहं विशेत् याननिवृत्तभूपः ।
श्रुत्युक्ताचारयुक्तो दिनपुरविषयो योऽस्ति लब्धप्रतिष्ठस्तन्मूलग्रामवासी द्विजगुरुविबुधप्रीतिदः सुप्रतिष्ठः ।
नानाशास्त्रार्थदानप्रथितपृथुयशाश्चक्रवर्त्त्युपाधिर्वारेन्द्रः सत्कुलाढ्यो जयति पटुवरः श्रीयुतो रामचन्द्रः ॥
सुतस्तदीयो द्विजकृष्णदासः ।
प्रणम्य पित्रोश्चरणारविन्दं
बालावबोधार्थममुं चकार
ग्रन्थं ततो नोपहसन्तु विज्ञाः ॥

**Colophon.** इति श्रीयुतरामचन्द्रचक्रवर्त्ति-तनय-श्रीकृष्णदासशर्म्म-विरचितो ज्योतिःसंक्षेपः समाप्तः ॥

रामप्राक्सुन्दरेणाप्युगदहनमनोज्ञाङ्कदृग्माचलेके
शाके लेखीनमेनं ध्वटिति सुवटुना तन्नु नत्वाचलेके ।
× × × × × × । १७२५ । २ । ५ । २० ॥

विषयः। वारादिकथनम् ॥ वारफलादिकथनम् । वारवेलादिकथनम् । तिथ्यादिनिरूपणम् । नक्षत्राधिपादिकथनम् । राश्यादिनिरूपणम् ॥ लग्नादिनिर्णयः । अष्टवर्गादिकथनम् । नक्षत्रशूलादिकथनम् ॥ संक्रान्तिनिरूपणम् । शनिराहुचक्रादिकथनम् । ग्रहणादिनिरूपणम् । विवाहविहितनक्षत्रादिकथनम् । द्विरागमनादिकथनम् । पुंसवन-सीमन्तोन्नयन-जातकर्म्मोपनयनादिसंस्कारकर्म्मविहितदिनादिनिरूपणम् ॥ यात्रिकदिनादिकथनम् ॥

**No. 108.** ज्योतिःसंक्षेपसारः (खण्डितः) By कृष्णचन्द्र. Substance, country-made paper, 12×3 inches. Folia, 6. Lines, 5 on a page. Extent, 90 çlokas. Character, Bengali. Date ? Place of deposit, Upalatá Grám, Post Mehár, Zilla Comilla. Pandit Jagadbandhu Tarkavágis. Appearance, old. Verse. Generally correct.

**Beginning.** ॐ नमः शिवाय ।

प्रणम्य नव रव्यादीन् कृष्णचन्द्रेण शर्म्मणा ।
ज्योतिःसंक्षेपसारोऽयं तन्यते बालकप्रियः ॥
अथदिननिर्णयः ।
रविः सोमो मङ्गलश्च बुधो जीवः सितः शनिः ।
एतेषां नामतो वाराः सप्तैव कथिताः क्रमात् ॥ इत्यादि ।
रिष्टिं भुजङ्गमाकारां केचिदिच्छन्ति सूरयः ।
भुजङ्गस्य मुखे मृत्यु र्न तु पुच्छे कदाचन ॥
आनने पञ्चनाद्यस्तु वचःस्थाने चतुर्द्दश ।
क्रोड़े चाष्टौ तथा ज्ञेयः पुच्छे तिस्रः प्रकीर्त्तिताः ॥
आनने धननाशः स्याद्वक्षःस्थाने महाभयं ॥
(अतः परं खण्डितं ।)

विषयः । संक्षेपतो ज्योतिर्वचनसङ्ग्रहः ।

---

**No. 109.** ज्योतीरहस्यं By हरिहरन्यायालङ्कार. Substance, country-made paper, 13×2 inches. Folia, 46. Lines, 5 on a page. Extent, 640 çlokas. Character, Bengali. Date SK. 1592. Place of deposit, Dinajpur, Babū Girīçacandra Cakravartti. Appearance, old. Verse. Generally correct.

**Beginning.** ॐ नमस्तारिण्यै ।

सृष्टिस्थितिप्रलयहेतुरहेतुरीशो
विश्वस्य यस्तमभिवन्द्य खगस्फुटाय ।
ज्योतिःसमुद्रतरणे तरणिं तनोमि
ज्योतीरहस्यममलं सुधमश्च धीरः ॥
ज्योतिर्विदः पुष्टकरो विनयं विधाय
श्रीमानहं हरिहरः प्रतिपादयामि

× × × × × ×

कालाङ्कबाणावनिभिश्च युक्तः
शाको भवेदब्द इह प्रबन्धे ।
कालाङ्कबाणावनितोपि शुद्ध-
श्छदाब्दगुण्येषयितोत्र योज्यः ॥ इत्यादि ।

End. अन्तं खण्डितं ॥

विषयः । अब्दाद्ययनगणनम् ॥ अहर्गणनादिकथनम् ॥ सर्व्वग्रहाणां स्फुटानयनम् ॥ ग्रहाणां भुक्त्यानयनम् ॥ दिवसपञ्चाङ्गानयनम् ॥ दिनमानाद्यर्थकथनम् ॥ चन्द्रादीनां दिनादिभुक्तिप्रकटनम् ॥ अतःपरं खण्डितं ॥

---

**No. 110.** ज्योतिःसारसंग्रहः By श्रीपति. Substance, country-made paper, 14 × 4 inches. Folia, 280. Lines, 7 on a page. Extent, 6,800 çlokas. Character, Bengali. Date ? Place of deposit, Dinajpur, Rājārāmapur. Pandit Çyāmāprasanna Vācaspati. Appearance, old. Verse. Incorrect.

Beginning. ॐ सूर्य्याय नमः ।

श्रीरामं श्रीपतिं नत्वा श्रीमत्श्रीपतिशर्म्मणा ।
क्रियते सुखबोधाय ज्योतिषां सारसंग्रहः ॥
अथ कालपुरुषस्याङ्गविभागः ॥
शीर्षमुखबाहुहृदयोदराणि कटिवस्तिगुह्यसंज्ञकानि ।
उरुजानुजङ्घे चरणाविति राशयोऽजाद्याः ॥
अथ मेषादयो यथासंख्यं कालपुरुषस्य शीर्षादयः स्युः वस्तिर्नाभेरधो भागः। मेषाद्या इति यदुक्तं तदुपलक्षणं । किन्तु जातकस्य लग्नादेव शीर्षादयः कल्प्या इति ॥ इत्यादि ।

End. रविबुधशुक्रजीवैः सप्तमः । रविबुधजीवशौरैरष्टमः । रविबुधशुक्रशौरैर्नवमः । रविजीवशुक्रदष्टैर्दशमः । भौमबुधजीवशुक्रैरेकादशः । अतःपरं खण्डितं ॥

विषयः । कालपुरुषस्याङ्गविभागकथनम् ॥ राशिनिर्णयः ॥ राशिदेवतादिकथनम् ॥ सामान्यविशेषादिराशिसंज्ञाकथनम् ॥ लग्नमानादिकथनम् ॥ ग्रहभोगकालादिकथनम् ॥ ग्रहसंज्ञादिकथनम् ॥ जात्यधिपादिकथनम् ॥ अमृतयोगादिकथनम् ॥ उत्पातादिकथनम् ॥ करकचादियोगकथनम् ॥ पापयोगापवादकथनम् । मासदग्धादिकथनम् ॥ सामान्ययोगादिकथनम् ॥ नक्षत्रनिर्णयः । नक्षत्रदेवतादिकथनम् ॥ ऊर्द्धमुखपार्श्वादिगणकथनम् ॥ भद्राकार-

निर्णयः ॥ योगादिप्रतीकारकथनम् ॥ वारादिकथनम् ॥ शुभग्रहस्थितिफलादिकथनम् ॥ निरंशादिदिननिषेधकथनम् ॥ मलमासास्तगतादिनिषेधकथनम् ॥ कालशुद्धिकथनम् ॥ विविधोत्पाततच्छान्त्यादिकथनम् ॥ मण्डलोत्पातशान्त्यादिकथनम् ॥ राहुदर्शनविचारः । वक्रातिचारादिकथनम् । विवाहनिषेधकालादिकथनम् ॥ यामित्रादिवेधकथनम् ॥ चन्द्रशुद्ध्यादिकथनम् ॥ संक्रान्तिनिर्णयः । जन्मनक्षत्रजन्मतिथिफलं तथा वारादिफलञ्च ॥ सामान्यतो ग्रहशुद्धिकथनम् । अष्टवर्गशुद्ध्यादिकथनम् ॥ जन्मनक्षत्रे ग्रहणदर्शनादिनिषेधकथनम् । उदयास्तादिग्रहणफलं ॥ उल्कादिपतनफलं ॥ उपग्रहादिनिर्णयः । शतपदचक्रकथनम् ॥ विवाहकालादिकथनम् ॥ योटकविचारः ॥ अन्नप्राशनचूड़ोपनयनादिकालकथनम् ॥ यात्राविहितकालादिकथनम् ॥ कृषिकर्मकथनम् ॥ वास्तुप्रकरणम् । शल्योद्धारकथनम् ॥ दिक्पालपूजाविधिप्रयोगादिकथनम् ॥ कार्त्तिकादिवर्षज्ञानम् ॥ होराभिजित्फलकथनम् ॥ अयनांशादिविचारः । स्वप्नफलकथनम् ॥ शकुनप्रकरणं ॥ जातकप्रकरणं ॥ क्षेत्रनक्षत्रादिफलकथनम् ॥ तुङ्गादिफलकथनम् ॥ सूर्य्यादिरिष्टिकथनम् ॥ भावफलादिकथनम् ॥ पञ्चस्वरामते योगरिष्ट्यादिकथनम् ॥ आयुर्दशान्तर्दशादिनिरूपणम् ।

---

**No. 111.** ज्योतिःसारः By धर्म्मखान. Substance, country-made paper, 18 × 3 inches. Folia, 67. Lines, 5 on a page. Extent, 980 çlokas. Character, Bengali. Date S.K. 1670. Place of deposit, Dinajpur, Pandit Kṛṣṇadāsa Smṛtibhūṣaṇa. Appearance, tolerable. Verse. Incorrect.

Beginning. श्रीकृष्णचन्द्रचरणकञ्जमधुव्रताय माधवे
नमो जगत् सत्त्व ? गद वनं नलाजं जगदन्तकं ।
पूर्व्वशास्त्रं समाहृत्य ज्योतिःसारं ब्रवे ध्रुवं
आत्मजेनातियत्नेन प्रेरितोऽत्र क्रमेण तु ।
संक्षेपय्यवहारार्थं सोऽहं व्याहर्त्तुमुत्सहे ।

अथ दिनलक्षणं ॥

आदौ वारस्तिथिः पश्चात् नक्षत्रं तदनन्तरं ।
करणञ्च तथा योगो दिनं स्यात् पञ्चलक्षणम् ॥

End. रोहिणीस्वगमूलाख्यं तथा भाद्रपदात्रयं
पुष्याहस्तोत्तराषाढाफल्गुनी संयुता तथा
विक्रये सर्व्ववस्तूनां अनुराधा तथा परा
भवन्ति सर्व्वलाभाय श्रीधराद्योदितं यथा ॥
इति ज्योतिःसारे नवमः परिच्छेदः समाप्तः ।

Colophon. गन्धर्व्वार्णवसिन्धुनीरजमिते संवत्सरे निर्म्मले
माघे माधवसंज्ञके सुद्धियः सन्तोषदं ज्ञानदं ।
पुत्रप्रेमभरादिमं व्यरचयत् ग्रन्थं प्रयत्नात् स्वयं ।
राढाभूषणसिंहवंशप्रभवः श्रीधर्म्मखानः सुधीः ॥
शकाब्दाः १६७० ॐ गुरवे नमः ॥

विषयः । १ पः दिन-वार-नक्षत्रादिनिरूपणम् । विद्यादिकथनम् । राश्यादिनिरूपणम् । २ पः वारवेलाकालरात्र्यादिकथनम् । नन्दादितिथिकथनम् । योगादिकथनम् । ३ पः ग्रहगोचरादिफलकथनम् । ४ पः नववध्वागमनादिदशजातकप्रकरणं । ५, ६, ७ पः विवाहादिविहितनक्षत्रादिनिरूपणम् । यात्रादिनिरूपणञ्च । ८ पः कृषिकर्म्मवास्तुप्रकरणं ९ पः वर्षाधिपादिकथनम् ॥

---

**No. 112.** ठाणाङ्ग सूत्रवृत्तिः By अभयदेव. Substance, country-made paper, 11×4½ inches. Folia, 262. Lines, 17 on a page. Extent, 11,124 çlokas. Character, Nagara. Date ? Place of deposit, Benares, Dikmaṇḍālācary-Mahāraja Bālacandra. Appearance, old. Prose. Incorrect.

Beginning. अस्य प्रथमतः ५५ पत्राणि न सन्ति ।
यथा द्रव्येन्द्रो भावेन्द्रकारणतां प्रतिपद्यते तथा प्रयोगापेक्षायामपि तदुपयोगतामासादयत्यवाप्नवांश्च न तथा नामस्य (...) न्द्रावित्ययं विशेष इति ।

End. तदेवं निगमितमनुगमद्वारांशभूतं सूत्रस्पर्शिकनिर्युक्तिद्वारं शेषद्वाराणि तु सर्व्वाध्ययनेषु प्रथमाध्ययनवत् अनुगमनीयानीति ।

Colophon. श्रीमदभयदेवसूरिविरचिते महानाम्नृटतीयाङ्गविवरणे दशस्थानकाख्यं दशमाध्ययनं समाप्तम् ।

विषयः । ठाणाङ्गसूत्रव्याख्या ।

---

**No. 113.** ढालसागरः. Substance, country-made paper, 11×4½ inches. Folia, 225. Lines, 10 on a page. Extent, 4,500 çlokas. Character, Nagara. Date SM. 1846. Place of deposit, Benares, Dikmandalā-cāryya Mahārāja Bālacandra. Appearance, old. Verse. Correct.

Beginning. दुहा आसायागे ।
श्रीजिन आदि जिनसय आदितन उकरतार,
युगलाधरमणिकरणउ, वरतावण विवहार ।

End. हरिवंश गायो सुजस पायो ज्ञानबुद्धि प्रकासनो,
पापकठोगयोनाठो पूण्य आयो आ .
कारणपुत्र कलत्र कमला पढ़त सुनत सुहासनो,
पुञ्ज श्रीगुण सूरञ्ज पदसाङ्गराङ्ग बघमणो ।

Colophon. इति श्रीटालसागरहरिवंशप्रबन्धे नवमोधिकारः सम्पूर्णः । संवत् १८४६ ।

विषयः । हिन्दीभाषया हरिवंशकथनम् ।

---

**No. 115.** णकारप्रदीपः सटीकः By सरस्वतीकण्ठाभरण. Substance, country-made paper, 12×3½ inches. Folia, 5. Lines, 9 on a page. Extent, 200 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, post Garvetá, Gram· Khunverā, Babu Vaikuṇṭhanāth Cakravartī. Appearance, fresh. Verse. Correct.

Beginning. ॐ काली ।

विरिञ्चिवागीशकवीन्द्रमुख्या
वागम्बुराशिं यदनुग्रहेण ।
सुदुस्तरं गोष्पदवत् तरन्ति
वाग्देवतां तां प्रणमामि नित्यं ॥
मूर्द्धण्यवर्गान्तयुतास्तु शब्दाः
स्वभावसिद्धाः कृतिभिर्य उक्ताः ।
बालावबोधाय सतां मुदे च
प्रदीपवत्तानिह दर्शयामि ॥
वर्षीयसां सत्स्वपि शासनेषु नव्ये न काव्ये महतामुपेक्षा ।
भ्रतोस्तमः × × × × प्रकामं न किं प्रदीपे भवति प्रयत्नः ॥
वाणी-गणेणा गुण-गोणि-वाणास्तूणीर-वेणी धुणवेणु-घोणाः ।
माणिक्य-वीणा-श्रण-शाण-शोणाः सकिङ्किणीकाः कण-काण-कोणा ॥ इत्यादि

End. नत्वा चरणौ सरस्वत्याः कण्ठाभरणः श्रीमान् ।
निजकृतणकारप्रदीपटीकां समाचष्टे ॥

Beginning of Comm: ग्रन्थारम्भे शिष्टपरम्पराप्राप्ततया विघ्नविनाशाय × × × × × ब्रह्मादीन् शास्त्रवक्तॄन् स्तुवन् ग्रन्थकारो वागधिष्ठातृदेवतां प्रणमति विरिञ्चीत्यादि ।

Colophon. प्रदीपस्तरणकारं सरस्वतीकण्ठाभरणः श्रीमान् ।
कृतिकुलहृदयकुतूहलकलाकलापात् सुखं व्यनक्ति ॥
इति श्रीसरस्वतीकृतौ णकार प्रदीपः समाप्तः ॥
इदानीं पूर्व्वोक्तामुपसंहरति । सरस्वती कण्ठाभरणं यस्य स णकारः प्रदीप इव व्यक्तीकरोति व्यनक्ति विपूर्व्वादनज्धातो र्लटि रूपं । इति श्रीकण्ठाभरणसरस्वतीकृता णकारप्रदीपटीका समाप्ता ॥

विषयः । मूर्द्धण्यणकारयुक्तशब्दानां संग्रहः ।

---

**No. 116.** तत्त्वचिन्तामण्यालोकपरिशिष्टं By देवनाथ. Substance, country-made paper, 14 × 2 inches. Folia, 143. Lines, 6 on a page. Extent, 4,000 çlokas. Character Bengali. Date L.S. 443. Place of deposit, Dinajpur Babu Giriša Candra Cakravarti (Vakil). Appearance, very old. Prose. Generally correct.

**Beginning.** ॐ नमः कृष्णाय ।

हरविकटजटान्तस्तुङ्गगङ्गातरङ्ग-
व्यतिकरितभवानीकेशवेणीत्रिवेणी ।
जनयतु मनसो मे गाहमानस्य गूढं
विपदपनयदीक्षासाक्षिणी मङ्गलानि ॥
देवनाथेन गोविन्दचरणाम्बुजसेविना ।
चिन्तामणौ यदालोके परिशिष्टं तदुच्यते ॥
समाप्तिहेतुतामिति निष्फलाचरणं मा प्रसज्यतामित्युपोद्घात एव सङ्गतिरिति कश्चित् ॥ खल्विति यद्यपि निषेधे वाक्यभूषायां खलु स्यादवधारण इत्यभिधानाद्वाक्यालङ्कारशक्तावपि तस्य विशेषस्योपस्थितिं विना नान्वयसम्भवः तथापि हन्तादिपदवत् भिन्नैव व्युत्पत्तिरस्येति तत्त्वं वस्तुतः कालिकविचारविषयत्वमेवालङ्कारः । न तावदित्यादौ तावत् पदसदिति बोद्धव्यं शब्द एवालङ्कार इति कश्चित् । ननु सकलसम्प्रतिपत्तीनामेकत्र समाधानाभावात् कथं तासामाचारहेतुत्वं किन्तु कस्यचित् काचित् संप्रतिपत्तिरपि नेत्यत आह अविप्रतिपत्तिरिति । यद्यपि समाप्तेः प्रस्तुतत्वेन तत्परत्वमेवोक्तं, कारणतान्तरस्य मङ्गलेऽन्वयव्यतिरेकगम्यत्वात् तथापि विचारस्यापि प्रस्तुतत्वमेव अतएव साहस्यं प्रमाकरणमित्यादौ

नद्देवार्थं इति भावः ॥ वस्तुतः कारणताज्ञानं व्यभिचारानुपालम्भे भवत्येवेति बाध इत्यन्यथा व्याचष्टे तत्वेति ॥

End. किञ्चाभावाभावत्वं प्रतियोगित्वमज्ञातमेव प्रकारस्तदनन्तरं तत्सन्देहाभावात् किञ्चाज्ञातस्याभावस्याप्रकारत्वेऽप्रसिद्धसाध्यकत्वमिति × × × × × × × अभावत्वज्ञानाभावात् अनुमितेरालोचनत्वायोगात् इति दिक् । यदपि विशेषणज्ञानत्वेनाधिकरणज्ञानादीनां साधारण्येन कारणता नत्वसाधारणीति तदपि न, अन्वयव्यतिरेकेणाधिकरणज्ञानत्वादिनैव हेतुत्वात् । अन्यथाधिकरणाद्यविशेषणकाभावत्वादिविशेषणान्तरविशिष्टबुद्धेरपि प्रसङ्गात् । ... ... ... ... वस्तुतस्त्विति । अवच्छेदपदव्यावृत्तिविषयत्वानियतमित्यन्वयः । यथेत्यादि दृष्टान्तः । संयोगावच्छेदको व्याप्यावच्छेदकस्य इति द्वन्द्वः । अवच्छेदकज्ञानानन्तरमवच्छेद्यज्ञानात् तद्विषयत्वानियमतेति भावः । तदवच्छेदकमिति शून्यत्वरूपविशेषणावच्छेदकमित्यर्थः । यद्वा स्वानधिकरणव्यावृत्तबोधजनकतावच्छेदकमित्यर्थः । एवञ्च प्रतियोगितावच्छेदकेत्यत्र विरहरूपत्वमिति पाठः ? । अनुद्देश्येति इन्तीत्यादौ लक्ष्यत्वेनानुद्देश्यायामदन्तव्यावृत्तिरित्यर्थः ॥ यवच्छिन्नत्वेन व्यावृत्तत्वेन तथाच यदन्वितनयेत्याद्यविकल्पमित्यर्थः ॥

पक्षपातमनालम्ब्य विलम्बगुरुगौरवं ।
देवनाथो यथावस्तु परिशिष्टमचिन्तयत् ॥

Colophon. ल सं ४४१ चैत्र वदि एकादश्यां चन्द्रे महामहाठक्कुर श्रीदेवनाथमहाशयानुशासनात् राघवेन लिखितं ॥

विषयः । चिन्तामण्यालोकानुक्तपदार्थनिर्वचनम् ॥

---

**No. 117.** तत्त्वप्रकाशिकाविवरणम् By जयतीर्थ. Substance, country-made paper, $10 \times 2\frac{1}{2}$ inches. Folia, 25. Lines, 5 on a page. Extent, 350 çlokas. Character, Nagara. Date ? Place of deposit, Tikāri, District Gayā, Paṇdit Çāstri. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ श्रीवेदव्यासाय नमः ।

रमाया रमणं नत्वा गुणमाणिक्यमण्डनं ।
तत्त्वप्रकाशिकाव्याख्यां करिष्यामो यथामति ॥
परमात्मनोऽत्यन्तभिन्नस्य स्वतश्चिदानन्दाद्यात्मकस्यापि जीवस्यानाद्यविद्या-

कामकर्म्मादिनिमित्तोयं परमार्थ एवान्यथाकारी दुःखाद्यनर्था न परमेश्वर-प्रसादादृतेऽपगच्छति न चासाचात्कृतोऽसौ प्रसीदति न चाविदितस्वरूपः शक्यते साचात् कर्त्तुमिति ॥ इत्यादि ।

End. नानन्दः स्वरूपमात्रेण पुरुषार्थ इत्यतो नित्यानन्देति विशेषणं ॥ भोजनं भोग अन्तभव इति यावत् ।

सदा सुरशिरोरत्नप्रभामुषि नखत्विषि ।
कमलाकमितुः पादमण्डले रतिरस्तु मे ॥

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादाचार्य्यविरचित-तत्वप्रकाशिकाविवरणं जय-तीर्थभिचुविरचितं समाप्तं ॥

विषयः । आनन्दतीर्थकृतोपाधिखण्डनस्य व्याख्यानम् ॥

---

No. 118. तत्त्वविवेकटीका By जयतीर्थ. Substance, country-made paper, 10×2½ inches. Folia, 13. Lines, 5 on a page. Extent, 260 çlokas. Character Nagara. Date ? Place of deposit, Tikāri, District Gayā, Paṇḍit Çāstri. Appearance, tolerable. Prose. Correct.

Beginning. प्रणम्य रमणं लक्ष्म्याः पूर्णबोधान् गुरूनपि ।
व्याख्यां तत्त्वविवेकस्य करिष्यामो यथामति ॥
ननु परमपुरुषादितत्वानां विवेकः शास्त्रे
एव कृतत्वात् किमनेन प्रकरणेन ॥ इत्यादि

End. तथापि परमपुरुषाधीनतयावगतं भवत्येव मोचसाधनमित्येतत् द्वे विद्ये वेदितव्ये इत्यादि श्रुतिसिद्धमिति हि शब्देन सूचयति ॥

करतलमिलितामलकप्रख्यं यस्याखिलं विश्वं ।
कमलापरिदृढममलं वन्दे तं वन्द्यपद्माक्षम् ॥

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादोदाहृततत्त्वविवरणं जयतीर्थभिचुविरचितं समाप्तम् ॥

पुरे वाराणसीचेत्रे विन्दुमाधवसन्निधौ ।
पीताम्बरेण लिखितं रमामाधवप्रीतये ॥

विषयः । आनन्दतीर्थकृततत्त्वविवेकस्य व्याख्यानम् ॥

---

**No. 119.** तत्त्वसंख्यानविवरणम् By जयतीर्थ. Substance, country-made paper, 9 × 2 inches. Folia, 13. Lines, 5 on a page. Extent, 325 çlokas. Character, Nāgara. Date ? Place of deposit, Tikāri, District Gayā, Paudit Çastri. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीवेदव्यासाय नमः ॥

लक्ष्मीपतेः पदाम्भोजयुगं नत्वा गुरोरपि ।
करिष्ये तत्त्वसंख्यानव्याख्यानं नातिविस्तरं ॥
मुमुक्षुणा खलु परमात्मा जगदुदयादिनिमित्तत्वेनावश्यमवगन्तव्य इति सकलशास्त्राणामविप्रतिपन्नोऽर्थः । इत्यादि ॥

End. सकलसत्त्वादेस्तदधीनत्वात्तदस्तु निमित्तमात्रमेव ।
स्वातन्त्र्येण तु विष्णुरेवास्येश्वर इति ॥
पद्मापद्मासनानन्तप्रभृतीदं यदिच्छया ।
सत्त्वादि लभते देवः प्रीयतां श्रीपतिः स मे ॥

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादविरचिततत्त्वसंख्यानविवरणं जयतीर्थभिक्षुकविरचितं समाप्तम् ॥

विषयः । आनन्दतीर्थकृततत्त्वसंख्यानस्य व्याख्यानम् ॥

---

**No. 120.** तत्त्वसुधानिधि By आनन्दतीर्थ. Substance, country-made paper, 11 × 5 inches. Folia, 9. Lines, 9 on a page. Extent, 300 çlokas. Character, Nāgara. Date ? Place of deposit, Hatuya, District Chāprā, Bābu Girīndranāth Datta. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीहयग्रीवाय नमः ॥

अथापरोक्षज्ञानस्वरूपं निरूपयितुं तदुत्पत्तिं प्रथमतः कथयति ।
यदैवं वैराग्यातिशयदृढया भक्तिधुरया
हरेरन्तोपास्या किल सपरिवारस्य भवति ॥
तदा नित्याव्यक्तोऽपि तु निजमहिम्नैव कमला-
निलोपितः साक्षात् क्रियत इह सर्वैरपि हरिः ॥ इत्यादि ।

End. एवमपरोक्षज्ञानस्य मोक्षोत्तरफलं सप्रपञ्चं निरूप्य मोक्षाख्यं फलं वदन्नुपसंहरति ॥

मोक्षाभिधं फलमुदेत्यपरोक्षभाजा-
मारब्धकर्म्मविगमे क्वचिदन्यथा न ।
एवं प्रसन्नहृदयः स्वदृशा रमेशो
मोक्षादिकात्मविषये भ्रमयत्वनर्थान् ॥

Colophon. इति बुधवरोपाध्यायोपदर्शितदर्शनाखिलसरणिना तज्जेनानन्दतीर्थमनीषिणा रचितोचितार्थश्रेणिभाजि सुधानिधौ हरिदृशि तरङ्गोयं साङ्गं समुद्रं समेयिवान् ॥ इति तत्त्वसुधानिधौ अपरोक्षज्ञानतरङ्गः ॥

विषयः । अपरोक्षज्ञानस्वरूपादिनिरूपणम् ॥

---

**No. 121.** तन्त्रकोषः. Substance, country-made paper, 8 × 5 inches. Folia, 4. Lines, 13 on a page. Extent, 53 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Govinda Bhaṭṭa. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशं महेशानं भारतीमीश्वरं शिवं
नत्वा वक्ष्ये मातृकाया निघण्टं बालबुद्धये ।
अध्रुवस्तारस्थिद्दृक्ष्म वेदादिस्तारकोऽव्ययः ।
प्रणवश्च त्रिमात्रोऽपि ॐकारो ज्योतिरादिषः ॥
अ. श्रीकण्ठः केशवश्चापि निवृत्तिश्च स्वरादिकः ।
अकारोमातृकादिश्च वात इत्यभिधीयते ॥

End. संवर्त्तको न्टसिंहश्च हृदयान् सुखसंस्थितः ।
अनन्तः परमात्मा च वज्रकायोन्तिमः स्मृतः ॥

Colophon. इति तन्त्रकोषः समाप्तः ॥

विषयः । अकारादिवर्णानां यथायथमर्थकथनम् ॥

---

**No. 122.** तन्त्रमणिः By काशीश्वरः. Substance, country-made paper, 18 × 4 inches. Folia, 87. Lines, 6 on a page. Extent, 2,000 çlokas. Character, Bengali. Date ? Place of deposit, Bhāṇḍārpur, District Baguḍā, Paṇḍit Kāliçarana Cakravarttī. Appearance, old. Prose and verse. Incorrect

Beginning. ॐ गुरवे नमः ॥

भजेनुवेलं तमसो निवृत्त्यै शम्भोर्जटाजूटतटे निषण्णाम् ।
कन्दर्पकोटिद्युतिदेहकान्तिं कामारदंशीमिव चन्द्रलेखाम् ॥
+ + + + +
तन्त्रमणिं महत् गुह्यं वक्ति काशीश्वरः सुधीः ।
तत्र गुरुपदप्रावृ शिवतन्त्रे ॥
गकारात् ज्ञानसम्पत्तौ रेफोऽपि तत् प्रकाशकः ।
उकाराच्छिवतादात्म्यं दद्यादिति गुरुः स्मृतः ॥ इत्यादि ।

End. वां वटुकाय नम इति मन्त्रेण वायव्ये बलिं दद्यात् ।
हूँ यां योगिनीभ्यो नम इति मन्त्रेण मध्ये बलिं दद्यात् ।
हूँ यां क्षेत्रपालाय नम इति अग्निकोणे बलिं दद्यात् ।

Colophon. इति बलिदानविधिः । इति तन्त्रमणौ महागोपनीये चतुर्थः पटलः ॥
अतःपरं खण्डितम् ॥

विषयः । १ पटले गुरुशिष्यलक्षणादिकथनम् ॥ कुलाकुलचक्रविचारः ॥ राशिचक्रादिकथनम् ॥ दीक्षामासादिनिरूपणम् ॥ मालासंस्कारादिकथनम् ॥ पुरश्चरणादिकथनम् ॥ दीक्षाप्रयोगादिकथनम् ॥ सकलमन्त्रगायत्रीकथनम् ॥ सामान्यपूजापद्धतिः ॥ २ पटले सकलमन्त्रबीजादिकथनम् ॥ ३ पटले तारापूजाप्रयोगादिकथनम् ॥ यन्त्रादिकथनम् ॥ ४ पटले मन्त्रसिद्धेरुपायादिकथनम् ॥ बलिदानविध्यादिकथनम् ॥

---

**No. 123.** तन्त्रराजः By काशीरामवाचस्पतिः. Substance, country-made paper, 15 × 3½ inches. Folia, 5. Lines, 7 on a page. Extent, 180 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur. Post Garvetā, Grām Khunverā, Late Paṇḍit S'rīpati Bhaṭṭācārya. Appearance, fresh. Prose and verse. Correct.

Beginning. ॐ नमः सरस्वत्यै ॥

प्रणम्य सूक्ष्मां प्रकृतिं निर्गुणं पुरुषं तथा ।
श्रीकाशीरामसन्नुते तन्त्रराजं सतां मुदे ॥
तत्र गुरुलक्षणम् ॥
शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेशवान् ।
शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान् ॥ इत्यादि ।

**End.** वस्तुतस्तु इदं प्रशंसापरं विचारस्य तु सर्व्वत्रावश्यकत्वं दुरदृष्टवशात् कदाचित् वैरिमन्त्रस्य ग्रहणादौ प्राप्तौ तत्तद्दोषस्य दृष्टत्वादिति तु साम्प्रदायिकाः ॥

**Colophon.** इति श्रीकाशीरामवाचस्पतिभट्टाचार्य्यविरचितः शेषरचितमन्त्रराजः समाप्तः ॥

विषयः । गुरुलक्षणकथनम् ॥ शिष्यलक्षणकथनम् ॥ दीक्षाग्रहणविधिकथनम् ॥

---

**No. 124** तन्त्रसारपरिशिष्टम् By यतिवर. Substance, country-made paper, 17 × 3 inches, Folia, 83. Lines, 6 on a page. Extent, 2,000 çlokas, Character, Bengali. Date ? Place of deposit, Dinajapur, Rājārampur, Paṇḍit Çyāmāprasanna Vācaspati. Appearance, fresh. Verse. Correct.

**Beginning.** ॐ नमः शिवाय ॥

गुरुगणेशहरिशक्तिशङ्करान्
हृदि विचिन्त्य जनजपादिहेतवे ।
तन्त्रसारपरिशिष्टसंज्ञकं
यतिवरेण गतिपरेण तन्यते ॥
तत्र गुरुकथने बृहद्धर्म्मपुराणम् ॥
तस्माद्गुरोर्व्वंशजातं वयोऽल्पमपि पण्डितं
गुरुं कुर्य्यात् तु दीक्षायामविचार्य्य गुरोः कुलं
ब्राह्मणो ज्ञानवृद्धो हि कनिष्ठोऽपि गुरुर्भवेत् ॥ शान्तस्य सर्व्वमन्त्रगुरुत्वञ्च ॥
तत्रैव देवीवाक्यम् ।
वैष्णवानान्तु सर्व्वेषामहं दैवतमेव हि ।
तस्मान् ममोपासकः स्याद्विष्णुदीक्षाविधौ गुरुः ॥ इत्यादि ।

**End.** अथ घटार्गलयन्त्रम् ॥
पूर्व्वार्द्धे दक्षिणार्द्धे च रेखे कुर्य्यात् विचक्षणः ।
ईशानात् कोणपातञ्च रेखायुग्मं प्रकल्पयेत् ।
वह्नितो वायुकोणान्तं रेखायुग्मं ततः क्रमात् ॥
अतःपरं खण्डितम् ॥

विषयः । वयोऽल्पगुरुकरणम् ॥ दीक्षाकालविचारः ॥ मन्त्रविचारादिकथनम् ॥ वाह्यान्तर्दशसंस्कारादिकथनम् ॥ आगमतत्त्वविलासोक्तदीक्षाविधिः ॥ मन्त्रचैतन्यादिकथनम् ॥ मन्त्रेन्द्रिय-

ज्ञानकथनम् ॥ सप्ताङ्गपुरश्चरणकथनम् ॥ ग्रहणव्यवस्थादिकथनम् ॥ कलौ होमनिषेधकथनम् ॥ तिथिनक्षत्रयोगादीनां पुरश्चरणकथनम् ॥ मिश्रिताचारादिकथनम् ॥ गुरुध्यानकथनम् ॥ गायत्रीध्यानादिकथनम् ॥ तान्त्रिकसन्ध्याया नित्यत्वकथनम् ॥ पूजाविशेषकथनम् ॥ अन्तर्यागादिकथनम् ॥ मुद्राविशेषकथनम् ॥ तान्त्रिकलिङ्गपूजाकथनम् ॥ काम्यपूजादिकथनम् ॥ दीपान्वितापूजाव्यवस्थादिकथनम् ॥ रटन्तीपूजाव्यवस्थाकथनम् ॥ अजपामन्त्रप्रयोगादिकथनम् ॥ सीताराधादीनां मन्त्रकथनम् ॥ गुरुस्तोत्रकवचादिकथनम् ॥ महादुर्गाजयदुर्गादीनां स्तोत्रकथनम् ॥ ताराष्टकस्य व्याख्यानम् ॥ कवचादिकथनम् ॥

अतःपरं खण्डितम् ॥

---

**No. 125.** तन्त्रसारसंग्रहः By आनन्दतीर्थ. Substance, country-made paper, 12×4 inches. Folia, 31. Lines, 18 on a page. Extent, 620 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācārya. Appearance, new. Verse. Correct.

**Beginning.** श्रीवेदव्यासाय नमः ॥

जयत्यजभवेशेन्द्रवन्दितः कमलापतिः,
अनन्तविभवानन्दशक्तिज्ञानादिसंगुणः ।
विधिं विधाय स्वर्गादौ तेन दृष्टोजलोचनः,
यावद्दे ( ... ) मोत्सङ्गविलसत्पादपल्लवः ॥

**End.** अशेषदोषोज्झितपूर्णसद्गुणं
सदा विशेषोपगतोरुरूपम् ।
नमामि नारायणमप्रतीपः
सदाप्रियेभ्यः प्रियमादरेण ॥

**Colophon.** इति श्रीमदानन्दतीर्थभगवत्पादाचार्य्यविरचिते श्रीमत्तन्त्रसारसंग्रहे चतुर्थोध्यायः समाप्तः ॥

विषयः । माध्वसम्प्रदायाणां पूजादिविधिः ॥

---

**No. 126.** तन्त्रसारसंग्रहटीका By नरसिंहाचार्य्य. Substance, country-made paper, 12×6 inches. Folia, 48. Lines, 11 on a page. Extent, 1,056 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācārya. Appearance, new. Prose. Correct.

**Beginning.** पूज्यश्च भगवान् नित्यं इत्यत्र भगवत्पूजाकार्य्यमुक्तं । ( ... ) जायांश्च प्रतिमास्वप्रबुद्धानामित्युक्तेः, अज्ञानां प्रतिमासापेक्षत्वात्, प्रतिमायाश्च, ऊर्द्ध्वदृष्टिं अधोदृष्टिं तिर्य्यग्दृष्टि विपर्य्ययेत् ॥

**End.** संसारान्मोक्षदो भवति, तदनन्तरं कामदश्च, तत्तदभीष्टप्रदो भवेत्, यद्वा मुक्तेः पूर्व्वमपि कामदश्च भवेदित्यर्थः ॥

**Colophon.** इति श्रीसदानन्दतीर्थविरचिते तन्त्रसारसंग्रहे श्रीमच्छलारिनरसिंहाचार्य्यशिष्येण विरचिते तृतीयोऽध्यायः ॥

विषयः । माध्वतन्त्रसारसंग्रहव्याख्या ॥

---

**No. 127.** तर्कताण्डवम्. Substance, country-made paper, 12 × 4½ inches. Folia, 318. Lines, 9 on a page. Extent, 5,724 çlokas. Character Nāgara. Date Sm. 1704. Place of deposit, Benares, Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

**Beginning.** श्रीगणेशाय नमः ॥

अनन्तकल्याणगुणैकराशिमशेषदोषोज्झितमप्रमेयं,
मुमुक्षुभिः सेव्यमनन्तसौख्यदं भवच्छिदं तं प्रणमामि नित्यम् ।
श्रीमत्पदाम्बुजासक्तं करुणापूरशीतलं,
मध्वाख्यो मरुदंशो मे सन्तापान् हन्तु सन्ततम् ॥

**End.** नापि करणविघटनेन तथात्वे व्याप्तिपक्षधर्मतान्यतरविघटनस्यावश्यकत्वेनाव्याप्त्यसिद्ध्यन्यतरान्तर्भावो भविष्यति दुर्वारत्वात् । तदेतदभिप्रेत्योक्तं प्रमाणलक्षणे असिद्धिरव्याप्तिरिति हेतुविरोध इति । सामान्येन परोक्तहेत्वाभासनियमभङ्गः ॥

**Colophon.** समाप्तं तर्कताण्डवम् ॥ संवत् १७०४ ॥

विषयः । वेदान्तदर्शनव्याख्या ॥

---

**No. 128.** ताराप्रदीपः By यादवाचार्य्यः. Substance, country-made paper, 15 × 2½ inches. Folia, 75. Lines, 5 on a page. Extent, 1,500 çlokas. Character, Bengali. Date ? Place of deposit, Bhāṇḍārpur, District Bagudā, Paṇḍit Kāliçarana Cakravartti. Appearance, old. Verse. Correct.

**Beginning.** ॐ नमो गणेशाय ॥

पश्चाशद्वर्णभेत्ता सकलगुणमयो नादबिन्दुप्रसाद्या-
द्यापी सत्ता विधाता परमगुरुतरो निष्कलो निर्व्विकारः ॥
... ... ... ... ... ...
श्रीमत्याद्वपण्डितोनिजगुरोः पादाब्जसेवावशात् ।
व्याचष्टे जनरोचनाय विधिना शास्त्रं प्रमोदप्रदं ॥
केचिन्नागमतन्त्रमन्त्रनिपुणाः कौटिल्यमोहाहताः ।
तेषां वामविमार्गमोचनधिया ताराप्रदीपं शुभं ॥
तन्त्राणि सकलानि स्युः सात्विकादिषु नित्यशः ।
तेषां विज्ञानसम्पत्तौ ग्रन्थोऽयं स्वच्छसुन्दरः ॥
सात्विको राजसश्चैव तामसश्च तथापरः ।
त्रिविधः पूजको देव्याः स्वस्वजात्यनुसारतः ॥

**End.** नादावसानां खलु पथमत्रापद्मपद्मान्तरस्थां ।
ध्यायेच्चैतन्यरूपामभिमतसुफलप्राप्तये शक्तिमाद्यां ॥

**Colophon.** इति श्रीयाद्वाचार्य्यविरचिते ताराप्रदीपे ... ... ... षष्ठः पटलः ॥

विषयः । १ पटले ताराभन्त्रादिकथनम् । २ पटले पूजासङ्केतादिकथनम् । ३ पटले मारणोच्चाटमादिमन्त्रसङ्केतकथनम् । ४ पटले साधनसङ्केतकथनम् । ५ पटले नानामन्त्रादिकथनम् । ६ पटले अन्तर्यागबहिर्यागादिकथनम् ॥

---

No. 129. तारिणीतारकब्रह्मकूटाष्टोत्तरशतसहस्रनामस्तोत्रराजः (कवचन्याससहितः) नीलतन्त्रे, उत्तरखण्डीयः. Substance, country-made paper, 12×3 inches. Folia, 13. Lines, 7 on a page. Extent, 325 çlokas. Character, Bengali. Date ? Place of deposit, Upalatāgrām, Post Meher, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgīśa. Appearance, old. Verse. Generally correct.

**Beginning.** ॐ मेरुपृष्ठसुखासीनं शङ्करं चन्द्रशेखरम् ।
पप्रच्छ प्राञ्जलिर्भक्त्या पार्व्वती परमेश्वरं ॥
श्रीपार्व्वत्युवाच ॥
त्रैलोक्यनाथ श्रीनाथ जगन्नाथ जगद्गुरो ।
कृपया परयाविष्ट कथयस्व मयि प्रभो ॥
तकारकूटविद्यायास्तारायाः परमं शुभम् ।

सहस्रनाममनलमष्टोत्तरसमाकुलम् ॥
तारामन्त्रतन्त्रमयं तारकं लोकतारकम्
ब्रह्मविद्यामयं साक्षात् कल्पवृक्षलतामयम् ॥
सर्व्वमन्त्रतन्त्रसारं सारात्सारं परात्परम् ।
सूक्ष्मात् सूक्ष्मतरं सारं तारिणीस्तवराजकम् ॥
सिद्धिविद्या सिद्धिमयं सर्व्वसाम्राज्यदायकम् ।
वद त्वं कृपया नाथ यदि स्नेहोऽस्ति मां प्रति ॥ इत्यादि ।

**End.** सर्व्वेषामुदयं जयं जयकरं योगेन्द्रयोगान्तरं
सारात्सारतरं परं स्तुतिपरं कैवल्यधामाकरम् ।
यः स्तौति प्रयतः शुचिः प्रतिदिनं प्रातर्निशि प्रोज्ज्वलं
स स्यादात्मगणाधिपो विभुरिव श्रीमण्डले संवसेत् ॥
तारिण्याः कूटनाम्ना विरचितमखिलं कोटिकोटिप्रधाम्ना
शर्व्वर्य्यां पाठकाले कुलपतिरतुलां सिद्धिमाप्नोति धीरः ।
प्रत्यक्षं प्राहरन्ती सकलरिपुगणान् तारकं पालयन्ती
मुद्राणां दिव्यमालाविकम्पितहृदया ध्यायते कौलपद्मे ॥
त्वत्पादाम्भोजयुग्मोज्ज्वलरुचिविगलत्प्रेमधारा विशाला
पानोद्यन्मुण्डखण्डोत्तटघटरुधिराक्ताद्दचित्तप्रकाशा ।
मायावीजस्ववीजप्रभवबटुगणास्त्वैकवर्णं विभर्त्ति
त्वं श्रीदेवेन्द्रराज्यं कुरु कुरु सततं मोक्षसन्तोषदात्री ॥

**Colophon.** इति श्रीनीलतन्त्रे उत्तरखण्डे सिद्धिविद्याप्रकाशे श्रीकृष्णमुखपङ्कजनिर्गत-तारिणीतारकब्रह्मकूटाष्टोत्तरशतसहस्रनामस्तोत्रराजकवचन्यासो नाम त्रयस्त्रिंशः पटलः ॥ ॐ श्रीतारा ॥

विषयः । तारायास्तकाराद्यष्टोत्तरशतसहस्रनामकथनम् ॥

---

**No. 130.** **तिथिवादार्थ.** Substance, country-made paper, 15 × 3½ inches. Folia, 24. Lines, 10 on a page. Extent, 1,200 Çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetā Bhaṭṭagrām, Paṇḍit Rāmhridaya Bhaṭṭācāryya. Appearance, fresh. Prose. Correct.

**Beginning.** ॐ नमो गणेशाय ॥

प्राचीनमते विघ्नविध्वंसद्वारा प्रारिप्सितपरिसमाप्तिं प्रति मङ्गलस्य हेतुत्वे

निर्विघ्नपुरुषव्यासादेर्मङ्गलाचरणे विघ्नाभावेन ध्वंसाभावात् विघ्नाभावद्वारा प्रारिप्सितपरिसमाप्तिं प्रति मङ्गलस्य हेतुत्वं वाच्यं तच्च निर्विघ्नपुरुषे व्यासादौ विघ्नात्यन्ताभावः तस्य व्यापारस्वीकारस्तु चैत्रमिकजन्यतास्वीकारेण सविघ्न-पुरुषे विघ्नध्वंसद्वारा इत्यभावपदमुभयपरं चात्मगौरवं प्राचीनमते। नव्यमते विघ्नध्वंसं प्रति मङ्गलस्य हेतुत्वं तच्च सविघ्नपुरुषे विघ्नध्वंसः निर्विघ्नपुरुष-स्थले मङ्गलाचरणरूपकारणसत्वेपि ध्वंसस्य कारणविघ्नरूपप्रतियोगिनो-ऽभावात् न विघ्नध्वंसः ॥ इत्यादि।

**End.** अमार्कपातश्रवणैर्युक्ता चेत् पौषमाघयोः।
अर्द्धोदयः स विज्ञेयः कोटिसूर्य्यग्रहैः समः ॥
इति स्मार्त्ताः। सौरपौषस्यामावस्यायां श्रवणाया असम्भवात् चान्द्रपौषस्य ग्रहः ननु तर्हि चान्द्रमासस्यामावस्यायां श्रवणायाः कथं सम्भवः। उ। यदा फाल्गुणस्य चतुर्थदिवसे चतुर्दण्डात्मिका श्रवणा तदनन्तरं धनिष्ठा समुदायदिनव्यापिनी चामावास्या तदा रवेरेकराश्यवस्थानं सुघटमिति सुधीभिर्भाव्यं। दिवैव योगः प्रशस्तोऽयं न तु रात्रौ कदाचन इति स्मार्त्ताः अयं योगः दिवैव रात्रौ कदाचन न इत्यन्वयः अयं योगः दिवैव प्रशस्त इत्यर्थ × × × रात्रावपि अप्रशस्त योगः स्यात् इदानीन्तु अप्रशस्त-मपि न भवतीति भावः ॥ (अतःपरं नास्ति)।

**Colophon.**

विषयः। तिथितत्त्वीयवादावलीनां सम्यग्विचारः ॥

---

**No. 131.** तिथ्यर्कप्रकाशः By दिवाकर. Substance, country-made paper, 8×4½ inches. Folia 111. Lines, 10 on a page. Extent, 2,800 çlokas. Character, Nāgara. Date ? Place of deposit, Tikāri, District Gayā, Paṇḍit S'āstrī. Appearance, tolerable. Prose and Verse. Correct.

**Beginning.** श्रीगणेशाय नमः ॥
जानकीनयनपुष्पगोचरं मानिनां नयनयोरगोचरं।
नीलमेघरुचिरच्छविं सदा भावये मनसि राघवं मुदा ॥
... ... ... ... ... ... ...
श्रीरामेश्वरसूरिसूनुरभवन्नारायणाख्यो महान्
येनाकार्य्यविमुक्तये सुविधिमाविश्वेश्वरस्यार्पणम्।

तत्पुत्रोविबुधाधिपः क्षितितले श्रीशङ्करस्तत्सुतो
जातोभाट्टनयेऽतुलः पृथुयशाः श्रीनीलकण्ठो बुधः ॥
भारद्वाजकुलेऽमले समभवत् श्रीबालकृष्णाभिधः
साहित्यामृतवारिराशिरपरः सर्व्वस्य जातः प्रभुः ।
तत् सूनुः प्रथमोऽपरो मणिरिव श्रीमान्महादेव इत्या-
श्रीदेवपुरोहितामलमतिर्न्यायाब्धिपारङ्गतः ॥
तत्पुत्रेण दिवाकरेण विदुषा श्रीनीलकण्ठप्रभो-
र्दौहित्रेण बुधैः सुधारस समास्वाद्यः परेषां कृते ।
तिथ्यर्कःक्रियते प्रणम्य पितरं बालां तथामातरं
श्रीकान्तं तपनं श्रियं पशुपतिं वाचं महादेवतां ॥
अत्र विध्युक्तकर्म्मानुष्ठानफललब्ध्यर्थं तदङ्गत्वेन षोडशतिथीनां निर्णयः कृत्यत्रोच्यते । अत्यन्ताप्राप्तप्रापणं हि विधिः ॥ इत्यादि ।

End. कृत्यचिन्तामणौ ब्राह्मे ॥
नरो दोलगतं दृष्ट्वा गोविन्दं पुरुषोत्तमं ।
फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेदिति ॥
पौर्णमासी गुरुवारेण सिद्धा । मन्देन विरुद्धा । योगिन्यत्र वायव्यामिति पौर्णमासीनिर्णयः ॥

Colophon. इति श्रीमद्विद्वच्छिरोमणिभारद्वाजमहादेवभट्टात्मजसकलविद्यानिधानदिवाकरविरचिते तिथ्यर्कप्रकाशे षोडशतिथीनां निर्णयः समाप्तः ॥

विषयः । प्रतिपदादिसकलतिथिकृत्यादिनिरूपणम् ॥

---

**No. 132.** तिथ्यर्कप्रकाशानुक्रमणिका By वैद्यनाथ. Substance, country-made paper, 8 × 4½ inches. Folia, 27. Lines, 10 on a page. Extent, 650 çlokas. Character, Nāgara. Date Sm. 1856. Place of deposit, Tikāri, District Gayā, Paṇḍit Çāstrī. Appearance, tolerable. Prose and verse. Generally correct.

**Beginning.** अथेष्टिकाल निर्णयः ॥
तत्रेष्टिः पर्व्वप्रतिपत्सन्धौ कार्य्या ॥ इत्यादि ।

**End.** सामान्यो व्रतधर्म्मश्च हिताहितविकीर्तनं ।
स्त्रीव्रतेषु विशेषस्तु गर्भिण्यादि निषेधनम् ॥

सङ्ख्या प्रतिनिधीनान्तु दोषस्त्यागे व्रतस्य हि ।
नैमित्तिकः पुण्यकाल इत्येवं कथितः क्रमः ॥
इत्थं दिवाकरसुतेन कणीयसा श्रीरामानुजेन गुरुभक्तिपरायणेन ।
श्रीतातपादरचिते सुजनप्रिये ऽस्मिन् ग्रन्थे क्रमोल्लिखित एकसुर प्रसादात् ॥

Colophon. इति दिवाकरसूरिसूनु-वैद्यनाथकृता तिथ्यर्कप्रकाशानुक्रमणिका समाप्ता ॥ * ॥
संवत् १८५६ ॥ श्रीः ॥ । ॥

विषयः । इष्ट्यादिकालनिरूपणम् । तथा तिथ्यर्कप्रकाशस्थतत्कृत्याद्यनुष्ठानकथनम् ॥

---

**No. 133.** दृचभास्करः. Substance, country-made paper, 14×5 inches. Folia, 10. Lines, 14 on a page. Extent, 350 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Govinda Bhaṭṭa. Appearance, fresh. Prose and verse. Correct.

Beginning. अथ धारणमात्रेण रोगनाशन फलकयन्त्रप्रकारः कथ्यते स चोक्तो यन्त्रसारे-
प्रणवं साध्यसमेतं विलिख्य षट्कोनकर्णिकामध्ये ॐ ह्रीं हंसः सोहं षड्वर्णान्
आलिखेच्च कोणेषु, केशरविलसत्तोरचतुर्वर्णं दलचतुष्टये चापि । इत्यादि ।

End. इत्यादिकन्तु न्यायविद्भिरुहितुं शक्यमेवेत्यलं विस्तरेणेति सर्वं शिवं । ...
... आश्वायणिकमासि कौलके
वत्सरे धवलपक्षपञ्चतौ ।
भास्करेण दृच भास्करः कृतो
भास्करावधि स जीवतु क्षितौ ॥

Colophon. इति श्रीमत्पदवाक्यप्रमाणपारावारीणधुरीणसर्वतन्त्रस्वतन्त्रश्रीमज्जम्भीरराज-
भारतीदीक्षितात्मजभास्कररराजोन्नीतदृचभास्करः सम्पूर्णतामगमत् ।

विषयः । अथ धारणमात्रेण रोगनाशनफलकयन्त्रप्रकारः । अथ पूजाप्रयोजनतिलकार्घ्य-
प्रकारः । अथ ध्यानं । अथ न्यासः । अथ सौराष्टाचरयन्त्रं । अथ समस्तयन्त्रोपयोगी यन्त्र-
सामान्य-विधिः । अथ पीठप्रमाणं । अथ लेख्याक्षराणि । यन्त्राङ्गविंशतिकं ।

---

**No. 134.** तैत्तिरीय उत्सर्जनोपाकरणम्. Substance, country-made paper, 10×5 inches. Folia, 7. Lines, 12 on a page. Extent, 1,262 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

सुमुखस्य इत्यादि देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं उत्सर्जनपूर्व्वं ( ...... ) ध्यायोपाकर्माङ्गभूतं मृत्तिकास्नानं करिष्ये ।

अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे,

शिरसा धारयिष्यामि रक्षस्व मां पदे पदे ।

End. ततोपाकरणे उत्सर्जनं करिष्ये । स्नानादिहोमान्तं कृत्वा तत्रैव स्वाध्यायं विसृजेत् । उत्सृष्टाः वै वेदाः । ततो जपति ।

Colophon. इत्युत्सर्जनं । इति तैत्तिरीयानां उत्सर्जनोपाकरणम् ।

विषयः । तैत्तिरीयशाखीयानां यज्ञोपवीतधारणविधिः ।

---

No. 135. तैत्तिरीयसंहिता-होमपद्धतिः. Substance, country-made paper, 12 × 5 inches. Folia, 37. Lines, 10 on a page. Extent, 740 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, new. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

ओम् । गणानां त्वा गण, सादनंस्वाहा । इषेत्वोर्जे, पाहि स्वाहा । १ । यज्ञस्य, गमनमसि स्वाहा । २ । शुदध्वं, रक्षस्व स्वाहा । ४ ।

End. प्रत्याहुतिनियं दशांशेन यथाशक्ति ब्राह्मणान् भोजयेत्, पयसाच मुख्यं पूपोदनयज्ञनादि औपचारिकमिति ज्ञातव्यम् । इति ।

Colophon. — — — — — — ।

विषयः । तैत्तिरीयशाखोक्तमन्त्रेण होमविधानम् ।

---

No. 136. त्रिसूत्रीनिबन्धव्याख्या By शङ्करमिश्र. Substance, country-made paper, 13 × 2 inches. Folia, 123. Lines, 5 on a page. Extent, 2,500 çlokas. Character, Bengali. Date ? Place of deposit, Dinajpur, Babu Giriš Candra Cakravartti. Appearance, very old. Prose. Incorrect.

Beginning. ॐ नमो नारायणाय ॥

पितुर्वाख्यां कृत्वा मनसि भवनाथस्य कृतिन-

श्चतुर्ग्रन्थीग्रन्थादहमिह विमोक्तुं व्यवसितः ।

तद्देतस्मिन् कर्मण्यतिगुरुणि गौरीपरिवृढे
दृढा भक्तिः शक्तिं जनयतु यथा स्यामवहितः ॥
प्रकाशदर्पणोद्यत्कृद्भिर्व्याख्या कृतोज्ज्वला ।
तथापि योजनामात्रमुद्दिश्यायं ममोद्यमः ॥
मातरिति एष टीकां व्याचिकीर्षुरहं हे सरस्वति पुनःपुनस्त्वां नत्वा किमपि विज्ञापयामि निवेदयामि तद्वेहि जानीहि किं विज्ञापयामि इति विज्ञाप्यमाह समवाक्ये वाङ्मनसयोस्तथा सारमानय यथा एते वाचस्पते-र्वचसि न स्खलतो न प्रमाद्यत इति नन्वाराधना गौरवितप्रीतिहेतुक्रिया विश्वपदार्थस्य न त्वीश्वरस्य सा सम्भवतीत्यत आह विश्वेति ॥ इत्यादि ।

**End.** ननु सन्देहो यदि विषयगतो विवक्षितस्तदा वह्निं प्रतीत्यादि-टीकाविरोध इति विषये संशयमपास्य प्रामाण्ये शब्दानुमानयोः संशयमुपपादयति उपदेश इति वक्तावपीति प्रामाण्यसंशयस्य विषयसंशयोत्पादकत्वादित्यन्यत् । नन्विति तत्त्वज्ञानमेव न संप्रति व्यवस्थापनस्य फलमत आह एकदेशेति नन्वेतदेव कुत इत्यत आह प्रत्यक्षफलेति अनुमानादिष्विति अनुमानं लिङ्गोपहितं शाब्दः शब्दोपहितः प्रत्यक्षेतु नोपधायकं किञ्चित् किन्तु साक्षादेव विषयमिन्द्रियसन्निकृष्टमित्यतस्तद्भावादिति आकाङ्क्षानिवृत्ते-र्भावादित्य ... ... ... ... ... विशेषणमाह द्वितीयेति ।

**Colophon.** इति महामहोपाध्याय-सन्मिश्रभवनाथात्मज-मिश्रश्रीशङ्करकृतन्यायसूत्री-निबन्धव्याकारः समाप्तः ।
पित्रायज्ञवनाथेन व्याख्यातं तद्दिशालिखं ।
व्याख्यान गुणदोषाभ्यां सम्बन्धो मत्पितुर्न मे ॥

विषयः । गौतमसूत्रीयविस्तृत्रीभाष्यस्य व्याख्यानम् ॥

---

**No. 137.** त्वरितरुद्रविधिः. Substance, country-made paper, 12×5 inches. Folia, 4. Lines, 10 on a page. Extent, 60 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Govinda Bhaṭṭa. Appearance, old. Prose. Correct.

**Beginning.** अथ त्वरितरुद्रविधिः । तत्र कालः सिद्धासम्पत्तिः । नाशः, आयुः । लाभः, अर्थः । सञ्चयः, शुभः । लाभः, मोक्षः वश्यः । चैत्रादिक्रमेण तिथिषु

द्वितीया-पञ्चमी-सप्तमी-त्रयोदशी-पञ्चदशी-प्रशस्ताः। नक्षत्रेषु अश्विनी-रोहिणी-मृगार्द्रा-पुष्य-त्रियोत्तरा-हस्त-चित्रा-स्वात्यनुराधा-विशाखा-श्रवणा-धनिष्ठा-रेवत्यः प्रशस्ताः। अथ प्रयोगः देशकालौ संकीर्त्त्य अमुकनामा अमुककामनासिद्ध्यर्थं अमुकसङ्ख्यकत्वरितरुद्रजपमहं करिष्ये।

End. होमोब्राह्मणभुक्तिश्च पुरश्चरणमुत्तमं।
यदि होमेष्वशक्तः स्यात् पूजायां तर्पणेऽपि वा॥
जपेद्दशांशहोमस्य तद्दशांशेन तर्पणं।
मार्जनं तद्दशांशेन तद्दशांशेन भोजनम्॥

Colophon. इति त्वरितरुद्रविधिः।

विषयः। त्वरितरुद्रपूजादिविधानम्।

---

**No. 138.** त्वरितरुद्रविधिः. Substance, country-made paper, 8 × 3 inches. Folia, 1. Lines, 16 on a page. Extent, 40 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः।
अथ त्वरितरुद्रमन्त्रस्याथर्वण ऋषिस्त्वरितरुद्रदेवतानुष्टुप् छन्दः नमः इति वीजं अस्त्विति शक्तिः, क्षिप्रं कार्य्यसिद्ध्यर्थे बिनियोगः।

End. दृष्टिकामोजपेल्लक्षं तिलैर्होमो घृतेन च।
वह्निपूजा तु कर्त्तव्या शिवस्य वरुणस्य च॥

Colophon. इति त्वरितरुद्रविधिः समाप्तः।

विषयः। त्वरितरुद्रपूजादिविधानम्।

---

**No. 139.** दत्तकविधिः By वाचस्पतिमिश्रः. Substance, country-made paper, 17 × 4 inches. Folia, 6. Lines, 8 on a page. Extent, 195 çlokas. Character, Bengali. Date S.K. 1778. Place of deposit, Dinajpur, Paṇḍit Kṛṣṇa-dāsa Smṛtibhūṣaṇa. Appearance, fresh. Prose. Correct.

Beginning. ॐ नमो गणेशाय।
प्रणम्य शम्भुं ब्रह्माणं लक्ष्मीशं जगतां पतिं।
श्रीवाचस्पतिमिश्रेण दत्तके विधिरुच्यते॥

End. अमुकगोत्रायामुकदेवशर्म्मणे तुभ्यमहं सम्प्रददे इति दक्षिणां दद्यात् ॥

Colophon. इति महामहोपाध्याय-वाचस्पतिमिश्ररचितं दत्तकपुत्रेष्टिशागविधिप्रकरणं समाप्तं ॥ शकाब्दा १७७८ (

विषयः । दत्तकग्रहणविधिप्रयोगादि-कथनम् ॥

---

**No. 140.** दशपच्चवाखानविचारः. Substance, country-made paper, 10×4 inches. Folia, 2. Lines, 13 on a page. Extent, 60 çlokas. Character, Nāgara. Date Sm. 1904. Place of deposit, Benares, Dikmaṇḍalācāryya Mahārāja Bālacandra. Appearance, new. Prose. Correct.

Beginning. अथ दशपच्चवाखान का विचार लिखे हैं ।
तिहां प्रथम चउदेनेमसंभारे,
सोदसतरे पच्चवाखानकरे ।
उग्ग ए सूयेनमोक्क'र सहिय
यं मुन्वसीं पच्चवाखामि ।
चउव्विहंपि आहारं ।
असनं, पानं, खाइमं साइमं ।

End. आगार वाहण, तथा अभिग्रह पच्चवाखानकेविधेपिण ए हि । आगार वाहणा, पांचमी वोलय प ( ... ) गारेणं, सो साधुके होय ।

Colophon. इति पच्चवाखानविचारः । संवत् १९०४ ।

विषयः । जैनमते दशविधप्रत्याख्यानव्याख्यानम् ।

---

**No. 141.** दारुणसप्तकम्. Substance, country-made paper, 8×3 inches. Folia, 6. Lines, 5 on a page. Extent, 50 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Govinda Bhaṭṭa. Appearance, old. Verse. Correct.

Beginning. ओम् कोपोद्रेकातितिर्य्यङ् निखिलपरिचरत्तारपारप्रभूत-
ज्वालामालाग्रदग्धस्मरतनुशकलं त्वामहं सानुवेशं,
याचे त्वत्पादपद्मप्रणिहितमनसं द्वेष्टि मां यः क्रियाभि-
स्तस्य प्राणप्रयाणं परशिव ! भवतः शूलभिन्नस्य तूर्णं ।

End. इति गुह्यं महावीर्य्यं परमं रिपुनाशनं ।
भानुवारे समारभ्य मङ्गलान्ते जपेत् सुधीः ॥
यत्कार्य्यं तन्न कृतं, यदकार्य्यं कृत्यवत्तदाचरितं ।
उभयोः प्रायश्चित्तं शिव तव नामाचरद्वयोच्चरितं ॥

Colophon. इत्याकाशभैरवतन्त्रे उमामहेश्वरसंवादे दारुणसप्तकं सम्पूर्णं ।

विषयः । शिवमहिमवर्णनम् ।

---

No. 142. दिव्यानुष्ठानपद्धतिः. Substance, country-made paper, 8 x 3 inches. Folia, 14. Lines, 10 on a page. Extent, 300 çlokas. Character, Nāgara. Date Sm. 1787. Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।
अथ तुलादिव्यविधिः ।
तच्च सावष्टम्भाभियोग एव, न तु शङ्किताभियोगे,
नास्तिकपणसहस्रन्यूनद्रव्यविवादे च न भवति ।

End. अयं च दिव्यविशेषप्रयुक्तो दण्डः ।
निह्नवे भवितोदायाद्धनं राज्ञे च तत्समम् ॥
इत्यादिविशेषप्रयुक्तदण्डेन समुच्चीयते इत्यादि ज्ञेयम् ।

Colophon. भट्ट रामेश्वरसुतो भट्टोनारायणः सुधीः ।
अनुष्ठानसुखार्थेमां कृतवान् दिव्यपद्धतिम् ॥
इति श्रीविद्वन्मुकुटमाणिक्य-श्रीरामेश्वरभट्टात्मज-नारायणभट्टकृता दिव्यानुष्ठानपद्धतिः समाप्ता संवत् १७८७ ।

विषयः शपथविधि-कथनम् ।

---

No. 143. दुर्गोत्सवविवेकः By श्रीनाथाचार्य्यचूड़ामणिः. Substance, country-made paper, 13 x 2 inches. Folia, 12. Lines, 5 on a page. Extent, 240 çlokas. Character, Bengali. Date ? Place of deposit, Dinājapur, Rājārāmapur, Paṇḍit Çyāmāprasanna Vidyāvācaspati. Appearance, tolerable. Prose and verse. Correct.

Beginning. अथ कालविवेकोक्तदुर्गोत्सवविधिः ।
चान्द्रमासे ऽश्वयुजि साधितं पूर्व्वं ।

आरोपार्चननिर्गमसमयस्त्वालोच्यतामधुना ॥
तत्र भगवतीपुराणम् ।
कन्यायां कृष्णपक्षे च नवम्यामार्द्रभे दिवा ।
नवम्यां बोधयेद्देवीं गीतवादित्रनिस्वनैः ॥ इत्यादि ।

End. तथा तत्रैव नवम्यां पूजां नृत्यगीतादिना जागरणञ्चोक्त्वा फलमुक्तं ।
सर्व्वपापविनिर्म्मुक्तो दिव्यतेजोमयस्तथा ।
मोदते दुर्गया सार्द्धं दुर्गा-लोके महीयते ॥

Colophon. इति महामहोपाध्याय-श्रीकरात्मज-श्रीश्रीनाथाचार्य्यचूडामणिकृत-दुर्गोत्सव-विवेकः समाप्तः ॥

विषयः । दुर्गोत्सवविध्यादि-कथनम् ।

---

**No. 144.** देवताब्राह्मणभाष्यम् . Substance, country-made paper, 15 × 5 inches. Folia, 5. Lines, 11 on a page. Extent, 220 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Govinda Bhaṭṭa. Appearance, new. Prose. Correct.

Beginning. वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥
तत्कटाक्षेण तद्रूपं दधत्बुक्कमहीपतिः ।
आदिशत्सायनाचार्य्यं वेदार्थस्य प्रकाशने ॥
ये पूर्व्वोत्तरमीमांसे ते व्याख्यायातिसङ्ग्रहात् ।
कृपालुः सायनाचार्य्यो वेदार्थं वक्तुमुद्यतः ॥
व्याख्यातावृग्यजुर्वेदौ सामवेदेऽपि संहिता ।
व्याख्याता ब्राह्मणानान्तु व्याख्यानं संप्रवर्त्तते ॥

End. अग्न्यादिदेवताकगीत्रयाणामपि छन्दसामेतद्दैवतम् । एता अग्न्यादि-देवता भवितुं युक्ताः खल्वित्यर्थः ।

Colophon. इति श्रीदैवताख्ये पञ्चमे ब्राह्मणे द्वितीयः खण्डः ।

विषयः । सामवेदान्तर्गतदेवताब्राह्मणव्याख्या ।

---

**No. 145.** देवीमाहात्म्यटीका ( श्लोकार्थदीपिका ) By केवल. Substance, country-made paper, 13×4 inches. Folia, 5. Lines, 9 on a page. Extent, 140 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garbetā, Grāma Bhaṭṭagrām, Paṇḍit Rāmahridaya Bhaṭṭācāryya. Appearance, tolerable. Verse. Correct.

**Beginning.** श्रीश्रीहरिः शरणम् ॥

या बालिका प्रतिघटे जननीकुलश्री
र्या पद्मगौप्रभृतयः शिवसेविताङ्घ्रिः ।
या जिष्णु-विष्णु-नलिनोभव-भक्ति-तुष्टा
सा मां पुनातु सततं चिदशैकमाता ॥
भगवति तव लीला मासनाथं प्रतप्तं
प्रसति यदि जगत्यां का त्वदन्या ममास्ति ।
अनुदिनमनुभक्तः कर्मपाशावकाश-
स्त्रिभुवनन्टपलक्ष्मीं त्वामहं चिन्तयामि ॥
जीवो जीवं प्राह देहप्रभेदात् कस्त्वं विप्रो ब्रूहि तत्वं श्रुतेस्त्वम् ।
जीवोद्धारः कर्मसत्त्वादनित्यात् तन्मे मिथ्या वाक्चयं किं शृणोषि ॥
अथ किल नत्युपदेशात् कलुषाकुलः श्रीकेवलः स्तौति ।
ब्रह्मेशविष्णुजननीं सृष्टिस्थित्यन्तकारिणीम् ।
स्वर्गापवर्गदां नित्यां भजे लिङ्गानुरूपिणीम् ॥
पुण्यान्यनेकानि भवन्ति भूमौ तेषां प्रशस्ताः स्तुतयः शुभाख्याः ।
सा त्वं स्तुतीनां प्रवराहि चण्डी यस्याः सुपाठात् सकलार्थसिद्धिः ॥
श्रीदुर्गाचरणाम्भोजं स्मरतामङ्घ्रिसेविना ।
द्विजानाञ्चैव माहात्म्यप्रकाशः क्रियते मया ॥
नत्वा विनोदं सकलगुणवतामपि सन्तोषशीलं ?
श्रीगोपालं प्रणम्य प्रकटितरचनाशालिनं नौमि धीरं ।
ये चान्ये वा सुपुण्या द्विजकुलमुकुटास्तानहं दण्डपाते
र्युष्माकं पादरेणुः प्रचुरकरुणया रचणीयो रसायाम् ॥
चण्डी गुप्तार्थभावार्थी शब्दार्थश्चापि कुत्रचित् ।
प्रकाश्यते पूर्व्वटीकाकाराज्ञाकारिणानिशम् ॥ इत्यादि ।

**End.** इति मार्कण्डेयपुराणे इत्यादि चूर्णकस्य ।
स्वरूपयोग्यमाहात्म्याद्दुर्ल्लभमासीद् बधादिकं ।

सावर्णिकेऽष्टममन्वन्तरे तत्प्रतिपादितम् ॥
मार्कण्डेयपुराणेऽत्र चूर्णकेन मुहुर्मुहुः ।
व्यवस्थितं श्रीमताच व्यासेन जनरञ्जकम् ॥
इत्यस्मिन् चण्डिकापाठे सर्व्वधर्म्मविवर्द्धके ।
संशयच्छेदकाः श्लोकाः भवन्तु गुणिनां मुदे ॥
यत्र श्रीकनकेश्वरी विजयते तत्पादपद्माश्रये
वासो मे बहुवत्सरं भगवती मातेव शम्भुप्रिया ।
एष श्रीयुतकेवलेन कृतिना श्रीविप्रपादाम्बुजं
नत्वालेखि सुदुष्कृतं कुरुत मे मन्दस्य धीराः शिवम् ॥
ब्राह्मणेभ्यो नमस्कृत्य चण्डिकाञ्च ब्रवीम्यहं ।
कुपुत्रकठिनारम्भः पित्रोर्दुःखाय चाभवत् ॥
सतां मुदेऽर्भकाणाञ्च ज्ञानाय संशयच्छिदे ।
श्लोकार्थदीपिका व्याख्या समाप्ता ब्राह्मणाशिषा ॥
रससिन्धुशशाङ्कमितेऽतिशुभे
शुभ भाद्रपदे सितपक्षयुते ।
हरिवासरतारकपुण्यतिथा
विदमेति समाप्तमतं × × ॥ (?)

Colophon. इति श्रीदेवीमाहात्म्यप्रकाशे श्लोकार्थदीपिका समाप्ता ॥

विषयः । देवीमाहात्म्यीयापाततो जटिलश्लोकानां व्याख्यानम् ।

---

**No. 146.** देवीमाहात्म्यटीका ( सुबोधिनी ) By माधवशर्म्मा . Substance, country-made paper, 13×3 inches. Folia, 7. Lines, 5 on a page. Extent, 170 çlokas. Character, Bengali. Date Sk. 1531. Place of deposit, Dacca, Sonārgā̃ Krisṇapura. Paṇdit S'arat Candra Bhaṭṭācāryya. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमश्चण्डिकायै ॥

प्राक् किल भगवान् बादरायणान्तेवासी जैमिनिर्महाभारतविषयेषु केषुचित् पदार्थेषु सन्दिहानो मार्कण्डेयमहर्षिमुपगम्याप्राक्षीत् अथ नायमस्माकं कथाक्षण इति सर्व्वार्थाभिज्ञान् विन्ध्याचलनिलयान् चतुरः पक्षिणः पृच्छेति मुनिनोपदिष्टोऽसावपि तथाकार्षीदिति पुनर्जैमिनिप्रश्नानुरोधात्

मार्कण्डेयभागुरिसंवादात्मकमितिहासमनुवर्णयन्तः पक्षिण ऊचुः मार्कण्डेय उवाचेति चातुर्भुजी । इदानीं स मनोः कथानन्तरं कौषिकिं मुनिं सम्बोध्य कथां कथयति मार्कण्डेय उवाचेति । इत्यादि ।

End. एवं प्रकारेण सुरथः देव्या वरं लब्ध्वा सूर्याज्जन्म समासाद्य सावर्णिर्मनुर्भविता चत्रियर्षभः चत्रियश्रेष्ठः सावर्णिर्भवितामनुरिति पुनराहृत्तिः समाप्तिं द्योतयति तथा स्वायादिति चतुर्भुजेन लिखितमिति ॥

Colophon. षड्वेताग्निवाणचन्द्रशाकेऽकारि सुबोधिनी ।
सुधियां हृदये सास्तां श्रीमन्माधवशर्म्मणा ॥

विषयः देवीमाहात्म्यव्याख्यानम् ।

---

**No. 147.** द्वारकाखण्डम् . Substance, country-made paper, 14×5 inches. Folia, 92. Lines, 9 on a page. Extent, 2,300 çlokas. Character, Bengali. Date ? Place of deposit, Dinājpur, Rājavāṭi. Appearance, fresh. Verse. Correct.

Beginning. श्रीगणेशाय नमः ॥
श्रीशौनक उवाच ।
कथं सूत युगे तस्मिन् रौद्रे वै कलिसंज्ञके ।
बहुपाषण्डसङ्कीर्णे प्राप्स्यामो मधुसूदनम् ॥
युगत्रये व्यतिक्रान्ते धर्म्माचारपरैस्तदा ।
प्राप्ते कलियुगे घोरे क्व विष्णुर्भगवानिति ॥ इत्यादि ।

End. कृत्वा पापसहस्राणि कलौ कोटिशतैरपि ।
मुच्यते सर्व्वपापेभ्यस्तद्विष्णोः पदमाप्नुयात् ॥
मद्दर्शनेन किं पुण्यं किंवा देवि मदर्चनात् ।
केवलं गोमतीं स्नात्वा कृष्णं दृष्ट्वा लभेन्नरः ॥

Colophon. इति श्रीस्कन्दपुराणे प्रह्लादसंहितायां द्वारकामाहात्म्ये षट्चत्वारिंशत्तमोऽध्यायः । समाप्तश्चायं ग्रन्थः ॥

विषयः । १ ऋः ऋषिप्रश्न कथनम् । २ दुर्व्वासस आनयनकथनम् । ३ रुक्मिणीदुःखमोचणादिकथनम् । ४ । ५ गोमतीचक्रतीर्थोत्पत्तिकथनम् । ६ । ७ द्वारकामाहात्म्यकथनम् । ८ समुद्रगोमतीमाहात्म्यकथनम् । ९ रुक्मिणीमाहात्म्यकथनम् । १० विष्णुपादोदकमाहात्म्यम् । ११ । १२ मयसरोवरमाहात्म्यादिकथनम् । १३ । १४ नदीमाहात्म्यादिकथनम् ।

१५ सिद्धेश्वरमाहात्म्यम् । १६ तीर्थकथनम् । १७ । १८ देवयात्रादिपरिचारकथनम् । १९ । २० । २१ कृष्णपूजाप्रयोगविधिफलादिकथनम् । २१ सविस्तरविमलीदर्शनफलकथनम् । २२ । २३ । २४ । २५ शङ्खोद्धारमाहात्म्यादिकथनम् । २६ पिण्डारकधर्मपद्मतीर्थमाहात्म्य-कथनम् । २७ । २८ । २९ । ३० द्वादशीमाहात्म्यादिकथनम् । ३१ तीर्थक्षेत्रदर्शनफलादि-कथनम् । ३२ देवतीर्थयात्रादिकथनम् । ३३ द्वारकादर्शनफलकथनम् । ३४ । ३५ द्वारका-भिषेकादिकथनम् । ३६ वज्रलेपपापहरादिकथनम् । ३७ । ३८ बलिदानचन्द्रप्रबोधादिकथनम् । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ । ४६ द्वारकामाहात्म्यादि कथनम् ॥

---

**No. 148.** द्वैतविवेकः. Substance, country-made paper, 14×3 inches. Folia, 4. Lines, 7 on a page. Extent, 110 çlokas. Character. Bengali. Date ? Place of deposit, Upalatāgrām, Post Mehār, Zilla, Comilla, Paṇḍit Jagadbandhu Tarkavāgīśa. Appearance fresh. Verse. Generally correct.

**Beginning.** ईश्वरेणापि जीवेन सृष्टं द्वैतं विविच्यते ।
विवेके सति जीवेन हेयो बन्धः स्फुटीभवेत् ॥
मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरं ।
स मायी सृजतीत्याहुः श्वेताश्वतरशाखिनः ॥
आत्मा वा इदमग्रेभूत् स ऐक्षत सृजा इति ।
सङ्कल्पेनासृजल्लोकान् स एतानिति वाहृचः ॥ इत्यादि ।

**End.** दर्शनादर्शने हित्वा स्वयं केवलरूपतः ।
यस्तिष्ठति स तु ब्रह्मन् ब्रह्म न ब्रह्मवित् स्वयम् ॥
जीवन्मुक्तिः पराकाष्ठा जीवद्वैतविवर्जनात् ।
लभ्यतेऽसावतोत्रेदमीशद्वैताद्विवेचितम् ॥

**Colophon.** इति श्रीद्वैतविवेकः समाप्तः ।

विषयः । द्वैतमत-स्थापनम् ।

---

**No. 149.** धूर्त्तभाष्य (११ श प्रश्न) आपस्तम्बगृह्यस्य. Substance, country-made paper, 9×4½ inches. Folia, 27. Lines, 10 on a page. Extent, 1,540 çlokas. Character, Nagara. Date ? Place of deposit, Benares, Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. प्रवर्ग्यसंभरणं कुर्व्वन् अमावस्यायां पौर्णमास्यां आपूर्य्यमाणपक्षस्येति वौण्यपि तुल्यविकल्पानि पूर्व्वं प्रातरारभ्य प्रवृज्यते इति प्रवर्ग्यः ।

End. अर्थं नाष्टनमुत्पतितमिति यथा सुराया अपि न दर्म्याणीति हरन्ति तद्देवं वयं वद्देला उपागम हृत्यभ्यासत्वेनेत्यर्थः ।

Colophon. इति धूर्त्तस्वामिविरचितापस्तम्बभाष्ये एकादशप्रश्ने षष्ठः पटलः ।

विषयः । आपस्तम्बप्रवर्ग्यसूत्रभाष्यम् ।

---

No. 150. नन्दिकेश्वरस्तववृत्ति. Substance, country-made paper, $12 \times 4\frac{1}{2}$ inches. Folia, 25. Lines, 15 on a page. Extent, 1,500 çlokas. Character, Nagara. Date ? Place of deposit, Benares, Dikmaṇḍalācāryya. Appearance, fresh. Prose. Correct.

Beginning. वर्द्धयतु वर्द्धमानः श्रीसिद्धान्तरचिवाचको वाचं ।
चित्तचमत्कृतिचतुरं चतुराणां ( ... ) चो यस्य ॥
अर्थयुगलं जिनवल्लभसूरीन्द्रकृते चरितपल्लवके ।
संचिप्तसुगमं किञ्चिद्व्याख्यानं वितनोम्यहम् ॥

End. इत्यत्र वन्दे इत्यन्तं मङ्गलमिति गाथार्थः ।
साधुसोमगणीशेनाङ्कोशेनार्थप्रबोधिनी ।
नन्दीश्वरस्तवे चक्रे वृत्तिश्चित्तप्रमोदिनी ॥

Colophon. ... ... ... ... ... ... ।

विषयः । नन्दिकेश्वरस्तवव्याख्या ।

---

No. 151. नलोदयकाव्यटीका ( यमकप्रकाशिका ). By वागीशः Substance, country-made paper, $17 \times 4$ inches. Folia, 52. Lines, 9 on a page. Extent, 2,000 çlokas. Character, Bengali. Date Sk. 1687. Place of deposit, Dinājpur, Paṇḍit Kṛṣṇadāsa Smṛtibhūsana. Appearance, old. Prose. Incorrect.

Beginning. ॐ नमोगणेशाय ।
नमो गणेशाय गुणातिगात्मने
जनेष्वनुक्रोशदृशा गुणस्पृशे ।
समीक्षयोत्पत्य वनत्रयश्रिया
क्रियाजुषे नित्यसुखस्वरूपिणे ॥

अस्ति सर्व्वमिदं वेदे सभेदे वाक्प्रपञ्चनं ।

अथासौ श्रीमान् कालिदासनामा कविः प्रारिप्सितकाव्यकरणे विघ्नध्वंसादिकमभिलषन् नारायणस्मरणरूपमङ्गलमादौ श्लोकचतुष्टयेन निबध्नाति हृदयेत्यादि । हे हृदय मानस यतो वासुदेवात् त्रिजगत् भुवनत्रयं त्वं ततो मा गाः नैव गच्छ वस्तुतः श्रीकृष्णं परित्यज्य कुत्रापि मा याहीति अभिप्रायः ॥

End. पुरोहितादिभिश्च वाक्याङ्गैः सर्व्वैः समं वुभुजेतरामिति ग्रन्थसमुदायार्थः ॥

Colophon. इति नलोदयटीकायां वागीशविरचितायां यमकप्रकाशिकायां चतुर्थोल्लासविवरणं समाप्तं । समाप्तश्चायं ग्रन्थः ॥ ... ...

श्रीरामनाथ-नरनाथविराजितायां ।

यस्यावनौ जयति नौरिव काव्यसिन्धोः ॥

व्याख्येयमुल्लसितसर्व्वगुणानुबद्धा ।

वागीश चित ? विरचितास्मिन् मङ्गलाय ॥ श्रीकृष्णचन्द्रशर्म्मणः स्वाक्षरमिदं ॥ शकाब्दाः १६८१ ।

विषयः । कालिदासकृतनलोदयकाव्यस्य व्याख्यानम् ॥

---

**No. 152.** नलोदय टीका. By रामनारायण सिद्धान्त. Substance, country-made paper, $13\frac{1}{2} \times 3$ inches. Folia, 34. Lines, 7 on a page. Extent, 900 çlokas. Character, Bengali. Date of writing Sk. 1715. Date of composition Sk. 1635. Place of deposit, Zilla Midnapur, Post Garveta Gram, Khunverā, Late Paṇḍit S̄ripati Bhaṭṭācāryya. Appearance, fresh. Prose. Correct.

Beginning. श्रीरामाय नमः ।

वामे भागे रणुरणुरवं नूपुरं रत्नकाञ्ची

सालङ्कारः कृत करभिजः कौतुकाद् दक्षिणेन ।

भूतिर्भोग्याभरणमजिनं सुभ्रु किं वेति चार्या

स्वातुर्य्यार्थं प्रमिप्रभमुखं लानयन्नः शिवोऽव्यात् ॥

हृदय इत्यनेन श्लोकेन कविरिष्टदेवतां नमस्यति । हे हृदय यादवतः यदुकुलोद्भवात् पुरुषोत्तमात् सकाशात् सदा मा गाः किंविशष्टात् दुरासदायाः पापाटव्या दवतः दवाग्निः अरिसमुदयात् त्रिजगत् अवस ।

दायादौ सुतबान्धवावित्यभिधानं । इत्यादि ।

End. नलेन । अनायता ग्लानिरहितेन नलेन सा प्रसिद्धा सम्पत् सम्पत्तिः अपूरि पूरिता यथा पूर्व्वमासीत् तथा कृता इत्यर्थः सदा अयं नलः उन्मदाः उद्धतं महस्तेजो यस्य स न मदामदा मदोत्सवां मदान् उत्सवो यत्र तां सम्पदं अदास्त त्यक्तवान् ओदाक् त्यागे आत्मनेपदार्थं यत्नः करणीयः ।

वाणराममुनिचन्द्राब्दे निःसृता कूटबोधिनी ।

रामनारायणमुखात् सुखाय पठतामियं ॥

Colophon. समाप्तेयं नलोदयटिप्पनी ॥ शकाब्दाः १७१५ ।

विषयः । नलोदयस्य व्याख्यानम् । ग्रन्थकारविषये ऽस्ति संशयः यतः प्रथमे च्छासे इत्यादित्यसुरविरचितायां नलोदयटीकायां प्रथमः । द्वितीये नास्ति पुष्पिका तृतीय-चतोर्थयोस्तु रामनारायणसिद्धान्तकृतकूटबोधिन्यां नलोदये तृतीयः —० चतुर्थः ।

---

**No. 153.** नवलिङ्गसूत्रम् **.** Substance, country-made paper, 12 × 4½ inches. Folia, 6. Lines, 13 on a page. Extent, 1,503 çlokas. Character, Nāgara. Date Sm. 1203. Place of deposit, Benares, Dikmaṇḍalācāryya Mahārāja Bālacandra. Appearance, old. Prose. Correct.

Beginning. अर्हम् ॥

पुंलिङ्गं क ट ण थ प भ म य र ष स स्वन्तमिम न लौकिस्विव्. न, नभो-थ औदः किर्भावे ख कर्त्तरिच कः स्यात् ।

End. निःशेषनामलिङ्गानुशासनान्यभिसमीक्ष्य संक्षेपात् आचार्य्यहेमचन्द्रः समास्त तदनुशासनानि लिङ्गानां ।

Colophon. इति नवलिङ्गसूत्राणि समाप्तानि । संवत् १२०३ । पौषवदि अष्टमी ।

विषयः । लिङ्गविचारः ।

---

**No. 154.** नवलिङ्गानुशासनावचूरिम् **.** Substance, country-made paper, 12 × 4½ inches. Folia, 6. Lines, 17 on a page. Extent, 1,540 çlokas. Character, Nāgara. Date, Sm. 1503. Place of deposit, Dikmaṇḍalācāryya Mahārāja Bālacandra. Appearance, old. Prose. Correct.

Beginning. अर्हम् ॥

क, ट, ण, ष, प, भ, म, य, र, षम्, इत्येतदन्तं च पुंलिङ्गं स्यात्, कादयो-

ऽकारान्ता इत्युक्ते स्त्रिति पृथक् सन्तनिर्द्देशात्, नामेति वक्ष्यमाणमिच सम्बध्यते । कान्ताः अनेकः ।

End. अत्र यदुक्तं लिङ्गस्वरूपं तदुक्तं द्रष्टव्यं । तेन कठानां धर्मः आम्नायः काठकं कालापकं इत्यादि ।

Colophon. इति लिङ्गानुशासनावचुरि समाप्तम् ।

विषयः । नवलिङ्गानुशासनव्याख्या ।

---

**No. 155.** नाभेयस्तवावचूर्णिः. Substance, country-made paper, 12 × 4½ inches. Folia, 3. Lines, 21 on a page. Extent, 270 çlokas. Character, Nāgara. Date Sm. 1659. Place of deposit, Benares. Dikmaṇḍalācāryya Mahārajā Bālacandra. Appearance, old. Prose. Correct.

Beginning. नमः श्रीसर्व्वज्ञायः ।

श्रीविजयतिलकमहोपाध्यायविहितस्यानेकविचारसार-श्रीशत्रुञ्जयशृङ्गारहारानुकार-श्रीऋषभदेवस्तोत्रस्याचरार्थो विधीयते पूर्व्वं विमलाचलस्वामिनं नाभेयं नमस्कृत्य तस्यैव भगवतः पादपद्मरजः सेवाम्बुदानमित्यादि ।

End. जीवाधकत्त्वेण तस्य गच्छकविजयतिलको यस्य सः पत्ते कविनाम निष्कलङ्कं इति ।

Colophon. इति नाभेयस्तवावचूर्णि समाप्तं । संवत् १६५९ ।

विषयः । जैनमते ऋषभदेवस्तवव्याख्या ।

---

**No. 156.** नित्यानुष्ठानम्. Substance, country-made paper, 15 × 5 inches. Folia, 11. Lines, 8 on a page. Extent, 270 çlokas. Character, Bengali. Date ? Place of deposit, District Medinipur Ayodhyā Raghunāthvāti, Post Chandrakonā, Babu Chakrapāṇi Rāya. Appearance, old. Verse. Generally correct.

Beginning. श्रीराधाकृष्णाभ्यां नमः ॥

एकदा यमुनातीरे सदासीनं जगद्गुरुं ।
नारदः प्रणिपत्याह देवदेवं सदाशिवम् ॥

श्रीनारद उवाच ।
देवदेव महादेव सर्व्वज्ञ जगदीश्वर ।
भगवद्धर्म्मतत्त्वज्ञ कृष्णमन्त्रविदां वर ॥
कृष्णमन्त्रा मया लब्धा त्वत्तो ये च पितुः पराः ।
ते सर्व्वे साधिता यत्नान्मन्त्रराजादयो मया ॥
बहुवर्षसहस्रैस्तु शाकमूलफलाशिना ।
शुष्कपर्णाम्बुवाय्वादिभोजिना च निरन्तरं ॥
स्त्रीणां सन्दर्शनालापवर्जिना भूमिशायिना ।
कामादिषड्गुणान् जित्वा वाह्येन्द्रियं निगम्य च ॥
अनन्यमनसा नित्यं कृष्णध्यानपरायणः ।
त्रिकालस्नाननियतः शौचाचारपरायणः ॥
एवमादिगणैर्युक्तो बहुवर्षशतानि च ।
संसाध्य मन्त्रान् प्रत्येकं निर्वेदं गतवानहम् ॥
न पुरश्चरणैः कश्चिद् विनाष्टादशभिर्मनुः ।
केनापि साधितः क्वापि मया दृष्टो हि भूतले ॥
कलौ किल भविष्यन्ति नराः पापपरायणाः ।
स्वल्पायुष्का मन्दभाग्या मन्दप्रज्ञाः कुमेधसः ॥
इत्थं चिन्ताकुलो देव त्वामहं शरणं गतः ।
तदुपायं कञ्चिदद्य कलिकालोचितं वद ॥
येनाञ्जसा गमिष्यन्ति तव लोकं नराः प्रभो ।
भगवन् केन मन्त्रेण संसारोत्तारणं नृणाम् ॥
तन्ममाचक्ष्व यत्नेन सर्व्वलोकहिते रतः । इत्यादि ॥

End. इति ते सर्व्वमाख्यातं नैत्यिकं चरितं हरेः ।
पापिनोपि विमुच्यन्ते श्रवणाद् यस्य नारद ॥
श्रीनारद उवाच ।
धन्योस्म्यनुगृहीतोऽस्मि त्वया देव न संशयः ।
हरेर्दैनन्दिनी लीला यतो मह्यं प्रकाशिता ॥
× × × × × × ।
× × × × × × ॥

Colophon. इति श्रीसनत्कुमारीयतन्त्रे श्रीसनत्कुमाराम्बरीषसम्वादे नित्यानुष्ठाने

श्रीकृष्णयुगलमन्त्रप्रकाशकः षट्त्रिंशत्पटलः ॥

कः सन्दग्धस्त्रिपुरजयिना कस्य कर्णस्य हन्ता

नद्याः कूलं विघटयति कः कः प्रियः कामिनीनां ।

कः सन्नद्धो भवति समये भूषणं किं कुचानां

किं वा दुःखं भवति महतां मानपूजापहारः ॥

विषयः । श्रीकृष्णस्य दैनन्दिनीलीलाकीर्त्तनमेव कलिकलुषनाशनमिति कथनम् ॥

---

No. 157. निरयावली सूत्रम् . Substance, country-made paper, 12 × 4½ inches. Folia, 43. Lines, 11 on a page. Extent, 1,075 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Dikmaṇḍalacāryya Mahārāja Bālacandra. Appearance, old. Prose. Correct.

**Beginning.** नमः श्रीवीतरागाय ॥

तेणं कालेणं तेणं समयेणं रायगिहे नामं नगरे होत्था । बिहगुणसिल

एचं इ ए वन्न उ असोगवण पायवे, पुढवि सिला पट्टये ।

**End.** निरया वलीया उवाङ्गाणं एगोसुयक्खन्धपल्लवग्गा, पल्लस दिवसेषु उहि-

स्सन्ति तत्थ चउसुवग्गे सुदस दश उद्देसगापल्लमवग्गेरायस उद्देसग ।

निरयावलीयासुयक्खन्धो सम्मत्तो ।

**Colophon.** निरयावलीसूत्रं समाप्तम् ।

विषयः । जैनधर्मोपदेशकथनम् ।

---

No. 158. निर्णयसिन्धु टीका ( रत्नमाला ) By कृष्णभट्ट . Substance, country-made paper, 8 × 4 inches. Folia, 334. Lines, 9 on a page. Extent, 8,500 çlokas. Character, Nāgara. Date ? Place of deposit, Tikāri, Dist. Gayā, Paṇḍit Çastrī. Appearance, fresh, Prose. Generally correct.

**Beginning.** श्रीगणेशाय नमः ॥

श्राद्धलक्षणं परिष्कुरुते श्राद्धमिति । एतच्च तर्पणवारणाय । तत्र विप्र-

स्वीकाराभावात् । न तु त्यागाभावात् । इन्द्र ऊर्द्धो अध्वर इतिवद्द्रव्य-

देवतासंयोगेन यागस्य तत्रापि कल्पनीयत्वात् । न ममेत्यभिलापस्तु नास्ति ध्याचाराभावात् । यत्रैव यागाग्निहोत्रादौ तदाचारस्तत्रैव तन्मूलतया श्रुतिः कल्प्यते न सर्व्वत्र ॥ इत्यादि ।

End. नित्यकर्म्म सन्ध्यावन्दन गायत्रीजपादि । तथा—

कौपीनाच्छादनं वस्त्रं कन्थां शितनिवारिणीं

अक्षमालाञ्च गृह्णीयाद्वैणवं दण्डमव्रणं ।

माधुकरमथैकान्नं परहंसः समाचरेदिति ॥

इष्टेः प्राक् कर्त्तव्यतया श्राद्धादिकन्तु प्रतिजानीते अथेति एतच विश्वेश्वर्य्यादि निबन्धेष्वतिविस्तृतमिति तत एव न्यूनाऽतिरिक्तं निश्चेतव्यमित्यु परम्यते ॥ * ॥

Colophon. इति कृष्णभट्टविरचिता रत्नमाला ॥ * ॥

विषयः । निर्णयसिन्धोर्व्याख्यानम् ॥

---

**No. 159.** नीतिमञ्जरी • Substance, country-made paper, 14 × 5 inches. Folia, 100. Lines, 9 on a page. Extent, 2,700 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Govinda Bhaṭṭa. Apperance, old. Prose. Correct.

Beginning. दिवाकरं प्रणम्यादौ मुकुन्दञ्च दिने दिनं,

वेदवेदाङ्गतत्त्वज्ञं स्मृतिज्ञं दीक्षितं प्रभुं ।

तस्य नप्ता युवा यज्वा युवधर्म्मोल्पबुद्धिमान्,

एकादशप्रकारैस्तु संहितापाठतत्परः ॥

वसंश्च श्रीमदानन्दे सुरभूसुरमण्डिते,

तेनेयं रचिता यस्मात् तन्नाम द्युवदीपिका ।

विलोक्य संहितामध्य इतिहासान् पुरातनान् ।

कृतवैधर्मसंयुक्ता श्लोकैर्बद्धा सुबुद्धिदा ॥

End. हे जनाः भिन्नबुद्धयः वो युष्माकं आकूतिः सङ्कल्पो व्यवसायो वा समाना एकविधा अस्तु, तथा वो युष्माकं हृदयानि भिन्नबुद्धियुक्तानि समानासमानानि एकविधानि सन्तु । तथा वो युष्माकं मनोऽन्तः करणं तदपि समानमस्तु प्रत्येकविवक्षया एकवचनं, यथा वो युष्माकं सुसहः शोभनसाहित्यं असति भवति तथा समानमस्त्विति ।

Colophon. इति नीतिमञ्जर्य्यामष्टमाष्टकः समाप्तः ।

विषयः । See Rāj Metra, vol. x, p. 283, No. 4183.

---

**No. 160.** नेमिचरित्रम् By हेमचन्द्र आचार्य्य. Substance country-made paper, 12×5 inches. Folia, 108. Lines, 17 on a page. Extent, 4,320 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Dikmaṇḍalācāryya, Mahārāja Bālacandra. Appearance old. Prose. Correct.

**Beginning.** ॐ नमो विश्वनाथाय जन्मतो ब्रह्मचारिणे ।
कर्मवल्ली वनच्छेदनेमये ऽरिष्टनेमये ॥
श्रीमन्नेमेरर्हतः कृष्णविष्णोरामस्य तच्छ्रीरिपोः ।
जरासन्धं प्रतिचरेस्वरितं कीर्त्तयिष्यते ॥

**End.** द्वाविंशोर्हन्नथ च नवमः शार्ङ्गभृत् सीरपाणि-
स्तद्वैरित्यनलमहसा कीर्त्तिता पर्व्वणीह ॥
चत्वारोपि प्रवचनदिशः सम्यगुद्दिश्य एषा ।
नेमौ कोऽपि श्रुतिपथगते विस्मयोत्र त्रिलोक्यां ॥

**Colophon.** इत्याचार्य्य-हेमचन्द्रविरचिते त्रिषष्ठि शलाकापुरुषचरिते महाकाव्ये अष्टपर्व्वणि बलदेवस्वर्गगमनं नाम नेमिनिर्वाणपाण्डवनिर्वाणवर्णनं नाम द्वादशः सर्गः ।

विषयः । नेमिनाथचरित्रवर्णनम् ।

---

**No. 161.** न्यायसुधा (ब्रह्मसूत्रानुव्याख्यान टीका) By जयतीर्थ. Substance, country-made paper, 8×4½ inches. Folia 1,354. Lines, 9 on a page. Extent, 27,000 çlokas. Character, Nāgara. Date ? Place of deposit, Tikari, Dist. Gayā, Paṇḍita Çāstri. Appearance, tolerable. Prose. Incorrect.

**Beginning.** प्रथमपत्रत्रयं नास्ति तेन चतुर्थपत्रप्रारम्भवाक्यं लिखितं ॥
तर्हि धर्म्माद्यसिद्धिः स्यात् । तस्य प्रमाणान्तरागोचरत्वात् । मैवं अनुव्याख्या-
दृष्ट्या धर्म्मादेरपि वेदादिवेद्यत्वादित्याशय इत्यादि ॥

**End.** यथा भगवत् स्वरूपविज्ञानं पुरुषार्थसाधनं तथा स्वस्वरूपविज्ञानमपौरुषेयत-
स्तदाविष्कुर्व्वन्नाह । यस्येति । यस्य वायोर्देवस्य वेदवचने तल्लिलित्यादौ

अलं दिव्यानि अद्भुतानि त्रीणि रूपाणि उदितानि अमुना वायुना कीदृशं तस्य मूलरूपं कथं भूतानि च त्रीणि रूपाणि इत्यत उक्तं वरिष्ठेत्यादि। यस्य तन्मूलरूपं वटवत्सात्मकं दर्शितज्ञानरूपं च हशीरीणादिकात् उप्रत्ययः। अनेन वायुशब्दो बलवाची अय् गत्यर्थः गत्यर्थास्त्ववगत्यर्थाः। तत उनवस्थामी गुरुवेति वायुरिति। किञ्च भर्गो भरणगमनयोः कृत्। डुकृञ् करणे गम्लृगतौ आभ्यां असुन् प्रत्ययोरिच। इदमपि वायुशब्द-व्याख्यानं वा गतिगन्धनयोरित्यतः कृवापादिति स्वान्दिसाद्यश्रुभ्यतन् इति तन्। अनेकार्थत्वाद्धातूनां वातिर्भरणे वर्त्तते। अपि च महत् श्रेष्ठं वयः + + + इत्यस्माद्दुन्॥ न केवलं मूलरूपमेव किन्तु यस्यावतारेषु निहितं रूपं + + + प्रथमकं प्रथमं रूपं रामविषयाणि वचांसि मूल-रामायणादीनि रामवचांसि तेषां नयं नीयते शिष्येषु प्रवर्त्त्यन्ते अनेनेति। एरडित्यच्। यस्य द्वितीयं वपुः पृचः पृशब्द पृतनावाची प्रसिद्धः तस्मिन् कर्म्मण्युपपदे चि चये इत्यस्माद्धातोरुपसर्गे क इति कः। उपपदतकारस्य लोपः छान्दसः पुलिङ्गमित्यनुसारेण असुन्वाप्रत्ययः किमिदिति नपुंसक मेवेदं रिपुपृतनाचयकारीत्यर्थः। यस्य तृतीयं वपु. एतन्मधुः। मधुशब्दः सुखवाची। मधुद्यौरस्तुनः .पिता इति प्रयोगात्। वशब्दः शास्त्रार्थे परम्परया तीर्थवाची + + + + + स्वरित्यत्र चाकार लोपः। भगवत् स्वरूपप्रतिपादनेनैव ग्रन्थोपसंहारः। इत्याशयवान्। नित्यापरोक्षं भगवन्तं सम्बोध्य स्तौति निःशेषेति। भूतिः महालक्ष्मीः॥ वचनप्रसूनमाला जयतीर्थाख्यभिक्षुणा रचिता।

प्रीयतां हृदये सदये कमलामहिलेन पुरुषेण।

अनुव्याख्यामृताम्भोधेः समुत्पन्ना विनिर्म्मला॥

इयं न्यायसुधासर्व्वैर्विबुधैः सेव्यतां सदा॥ * ॥ इति श्रीमत् पूर्णप्रमति भगवत्पादसुकृतेरनुव्याख्यानस्य प्रगुण्डजयतीर्थाख्ययतिना कृतायां टीकायां विषमपदवाक्यार्थविवृतौ चतुर्थेऽध्यायेऽस्मिन् चरमचरणः पर्य्यवसितः॥ * ।

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादाचार्य्यविरचितस्यानुव्याख्यानस्य टीकायां श्रीमज्जयतीर्थाख्याचार्य्यविरचितायां न्यायसुधायां चतुर्थाध्यायस्य चतुर्थः पादः॥ * ॥ रामकृष्णवेदव्यासाय मङ्गलम्॥ * ॥

विषयः। आनन्दतीर्थकृत-ब्रह्मसूत्रानुव्याख्यानस्य व्याख्यानम्॥

---

**No. 162.** पञ्चाङ्गकग्रहयज्ञपद्धतिः By कृष्णानन्द. Substance, country-made paper, 15×3 inches. Folia, 6. Lines, 5 on a page. Extent, 100 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garveta, Grām Khunverā, Late Paṇḍit Rāmtāraṇa Siromaṇi. Appearance, old. Prose. Correct.

**Beginning.** ॐ नमो रामचन्द्राय ॥ अथाभिषेक विधिः ।

प्रागुदका × × × × × × × × × × पताकाभिरलङ्कृते नानासुगन्धिना सुरभीकृते चन्द्रातपपरिभूषिते मण्डलद्वयं कार्य्यं एकमभिषेकमण्डलं अपरं ग्रहमण्डलञ्च । तत्राभिषेकमण्डलं × × × × × चतुर्ध्वजसमन्वितं भूपतिहस्तपरिमिताष्टनवसङ्ख्यकमुष्टीन् रक्त-पीत-नील-श्वेत-धूम्रान् गृहीत्वा तैनैवाभिषेकमण्डलं निर्म्माय पञ्चवर्ण-गुण्डिकया पूर्व्ववत् ग्रहमण्डलं × × × × × उत्तराभिमुखीकृत्य भूपतिमुपवेश्य मन्त्रिवर्गपुरःसरं शङ्खतूर्य्यादिध्वनिमङ्गलध्वनिवेदध्वनिभिः सह संस्थितं श्वेताम्बरधरं सास्त्रं सोष्णीषं × × × × × × × × × × + + यथाशक्त्युपचारैः पूजयेत् ॥ इत्यादि ।

**End.** यथा ब्रह्मयामले ।

नानाभक्ष्यविशेषैश्च तथा मिष्टान्नपानकैः ।
तद्भक्तलिङ्गिनो विप्रान् भोजयित्वा तु तोषयेत् ॥
एवं सर्व्वप्रकारेण कृतं यस्याभिषेचनं ।
तदादि तस्य पुंसस्तु ग्रहपीड़ा न जायते ।
ग्रहास्तुष्टा न कुर्व्वन्ति दुष्टरिष्टादिचेष्टितम् ॥

**Colophon.** इति कृष्णानन्दविरचिता यामलोक्तपञ्चाङ्गकग्रहयज्ञपद्धतिः समाप्ता ॥

विषयः । नृपस्याभिषेचनकविधिकथनं तत्र पञ्चाङ्गग्रहपूजाविधिकथनम् ।

---

**No. 163.** पथ्यापथ्य-निघण्टुः. Substance, country-made paper, 12×4 inches. Folia, 30. Lines, 11 on a page. Extent, 540 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Govinda Bhaṭṭa. Appearance, fresh. Verse. Correct.

**Beginning.** श्रीगणेशाय नमः ॥

अथ पथ्यापथ्यनिघण्टुर्लिख्यते ।

श्रितो रजःसत्वतमांसि विश्वं निर्माति पाति क्षिपति स्वयं यः ।

अशेषवृन्दारकवृन्दवन्द्यः पायादपायान्मनुजान् स ईशः ॥
आलोक्य वैद्यतन्त्राणि यत्नादेष निबध्यते ।
व्याधितानां चिकित्सार्थं पथ्यापथ्यविनिश्चयः ॥
भिषक् सर्वेषु रोगेषु निर्दिष्टानि यथातथं ।
निदानपथ्यापथ्यानि त्रीणि यत्नेन चिन्तयेत् ॥

End. क्रोधं विरुद्धाध्यशनं व्यवायं ताम्बूलमायासमपि प्रवातं ।
अम्लं च सर्व्वं लवणं च सर्व्वं संस्वेदनं तद्विविधानि तानि ।
निद्राभयं धूपकटुत्वधां च विषातुरो नैव भजेत् कदाचित् ॥

Colophon. इति विषरोगे पथ्यापथ्यसंग्रहः समाप्तः ।

विषयः । रोगग्रस्तानां पथ्यापथ्यनिरूपणम् ।

---

No. 164. पदावली. Substance, country-made paper, 17×3 inches. Folia, 16. Lines, 8 on a page. Extent, 500 çlokas. Character, Bengali. Date ? Place of deposit, Balihār, Dist. Rājsahi, Paṇḍit Kālicandra Bhaṭṭācāryya. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।
प्रणम्य नीरदाभासं रामं ज्ञानैकविग्रहं ।
पदावलीं प्रवक्ष्यामि बालानां बोधहेतवे ॥
सिद्धोवर्णः समाम्नायः । सिद्धः खलु वर्णानां समाम्नायो वेदितव्यः । न पुनरन्यथोपदेष्टव्य इत्यर्थः ॥

End. एकवर्गे इति किं तप्ते वर्गे इति किं भर्त्सनं । व्यञ्जनादित्येव भेत्ता ।

Colophon. इति पदावल्यां वृत्तौ सन्धौ पञ्चमः पादः । अतः परं खण्डितं ।

विषयः । संक्षेपेण कातन्त्रीयपदादिनिरूपणम् ।

---

No. 165. पद्यमाला By जयतीर्थ. Substance, country-made paper, $12 \times 4\frac{1}{2}$ inches. Folia, 8. Lines, 9 on a page. Extent, 123 çlokas. Character, Nagarā. Date ? Place of deposit, Benares, Paṇḍita Vāmanācāryya. Appearance, old. Verse. Correct.

Beginning. श्रीगुरुभ्यो नमः । हरिः ओम् ॥
प्रणम्य श्रीपतिं सर्व्वान् गुरूंश्चापि ब्रवीम्यहं ।
यथामति हरेः पूजाविधिं वैष्णवसंमतम् ।
आदौ देवगृहे न्यस्य कलशान् पञ्च-सप्तकान्,
आहरेत् तुलसीं दुर्वां पुष्पाणि चाक्षतानि च ॥

End. प्रमादतो विरोधाद्वा हरेः पूजा न चेद्भवेत् ।
पठनात् पद्यमालायाः हरेः पूजाफलं लभेत् ॥

Colophon. इति श्रीमज्जयतीर्थमुनीन्द्रविरचिता पद्यमाला समाप्तिमगमत् ।

विषयः । माध्वसम्प्रदायस्थानां पूजाप्रकारः ।

---

**No. 166.** पद्यावली-टीका. Substance, country-made paper, 16 × 6 inches. Folia, 77. Lines, 12 on a page. Extent, 1,800 çlokas. Character, Bengali. Date Sk. 1723. Place of deposit, Dinājpur, Paṇḍita Kṛṣṇadāsa Smṛtibhuṣaṇa. Appearance, fresh. Prose. Correct.

Beginning. श्रीगोपीनाथो जयति ॥
नव्याम्भोदकलेवरः कटितटे संनद्धपीताम्बरो
वंशीवादनतत्परो व्रजरमाचेतोहरः सुन्दरः ।
× × × × × × × × ।
श्रीरूपगोस्वामिपदारविन्दं वन्देऽनिशं दीनजनैकबन्धुं ।
यस्यानुकम्पालवसाहसेन व्याख्यामिमां कर्त्तुमहं प्रवृत्तः ॥

End. कोप्यनीर्व्वचनीयः श्रीकृष्णो मदभीप्सितमभिदद्यात् मादृशानां अभिलाषपूरकः स एवेति भावः । पादो ह्रन्दे तुरीयांशे शैले प्रत्यन्तपर्व्वते इति मेदिनी ॥
शाके कालायनमुनिरजनीनाथसंख्ये शुभेयं ।
टीका विद्वज्जनहृदयसमाह्लादिनीनामधेया ॥
पद्यावल्या व्रजनगरकृतावस्थितेनापि केन ।
श्रीमद्दामोदरचरणकृपाभाजनेन व्यधायि ॥
× × × × × × × ×
श्रीश्रीमद्वैष्णवराजसभासभाजितगुणगणैकपूर्णनिधीनां श्री श्रीमत् श्यामानन्दगोस्वामिपादानां शिष्योपशिष्यीभूतान्वये गृहीतदीक्षस्य ब्राह्मणकुलोद्भूत-

वैष्णवधरस्य श्रीश्रीमद्दामोदराभिधस्वामिचरणस्य शिष्येण कृतैषा व्याख्या-पूर्त्तिं गता ॥

Colophon. श्रीवृन्दावनधामतोऽलेखि हरनाथशर्म्मणा ।

विषयः । पद्यावल्या व्याख्यानं ॥

---

No. 167. परब्रह्मज्ञानसूक्तं. Substance, country-made paper, 15 × 5 inches. Folia, 4. Lines, 13 on a page. Extent, 120 çlokas. Character, Nāgara. Date Place of deposit, Benares, Paṇḍita Govinda Bhaṭṭa. Appearance, fresh. Prose. Correct.

Beginning. इदस्येत इत्येकादशर्चं तृतीयं सूक्तं आङ्गिरसस्य बृहस्पतेरार्षं नवमी जगती-शिष्टा दश त्रिष्टुभः अनेन सूक्तेन ऋषिः परमपुरुषार्थसाधनं परब्रह्मज्ञानं स्तुतवान् । अतस्तद्देवत्यमिदं । उक्तं हि बृहद्देवतायां ।
सुज्योतिः परमं ब्रह्म योगाद्यत् समुपाश्नुते ।
तज्ज्ञानमभितुष्टाव सूक्तेनाथ बृहस्पतिरिति ॥ इत्यादि ।

End. ऋचामेकः पोषमास्ते पुपुष्वान् होतर्गर्चनेत्यादि निरुक्तानुसारेणार्थोऽभ्य-धायि । एवं बृहस्पतिर्वेदितवेदार्थज्ञानं तुष्टाव । इत्यष्टमस्य द्वितीये चतुर्विंशो वर्गः ।

Colophon. वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥
श्रीपरब्रह्मज्ञानसूक्तं समाप्तं ।

विषयः । ब्रह्मविद्याकथनं ।

---

No. 168. परमहंसोपनिषद् भाष्यम्. Substance, country-made paper, 11 × 6 inches. Folia 12. Lines, 13 on a page. Extent, 320 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍita Govinda Bhaṭṭa. Appearance, fresh. Prose. Correct.

Beginning. अथ जीवन्मुक्त्युपकारिणं विद्वत्सन्यासं निरूपयामः । विद्वत्सन्यासश्च परमहंसोपनिषदि प्रतिपादितः । तस्योपनिषद्यनूद्य व्याख्यास्यामः ।
वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे ।

यं नत्वा कृतकृत्याःस्युस्तं नमामि गजाननम् ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
तत्रादौ विद्वत्संन्यासयोग्यं प्रश्नमवतारयति । अथ योगिनामिति ।

End. आहत्तिः शास्त्रार्थसमाम्नार्या ।
जीवन्मुक्तिविवेकेन बन्धं हार्द्दं निवारयन् ।
पुमर्थमखिलं देयाद्विद्यातीर्थमहेश्वरः ॥

Colophon. इति विद्यारण्यकृतं भाष्यं ।

विषयः । अथर्ववेदीयपरमहंसोपनिषद्व्याख्या ।

---

**No. 169.** पवमानयन्त्रं. Substance, country-made paper, 8×3 inchches. Folia, 8. Lines, 10 on a page. Extent, 120 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍita Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।
अथ पवमानयन्त्रदेवताप्रारम्भः । तत्र कोणदेवताः । प्रथमकोणे ब्रह्मणे नम इति ब्रह्माणं आवाहयामि, पूजाक्रमः, ब्रह्मणे नमः ब्रह्माणं ।

End. अग्निं दूतं दृणीमहे इति अग्नये अग्निं । मधुनः परापरेति, नैर्ऋत्ये निर्ऋतिं वायो शतं इति वायवे वायुं, तमीशानं इति ईशाने ईशानं, श्रीरस्तु ।

Colophon. + + + + + ।

विषयः । पवमानहोमे मण्डले देवतास्थापनविधिः ।

---

**No. 170.** पवमानन्यासः. Substance, country-made paper, 8×3 inches. Folia, 11. Lines, 7 on a page. Extent, 110 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍita Vāmanācāryya Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।
आचम्यप्राणानायम्य देशकालौ स्मृत्वा मम समस्तपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं पवमानमन्त्रन्यासपूर्व्वकं पवमानानुष्ठानमहं करिष्ये ।

**End.** विष्णोः कर्माणि पश्यत, नेत्रयोः, तद्विष्णोरित्यस्त्राय फट् । भुर्भुवः स्वरिति दिग्बन्धः । अथ देवपूजामारभेत् ।

**Colophon.** इदं पुस्तकं लिखितं गर्ई उपनामकरघुवीरशर्मणा स्वार्थं परार्थं चेति ।

विषयः । ऋग्वेदान्तर्गतपवमानमन्त्रेण न्यासकथनम् ।

---

**No. 171.** पाकतन्त्रकुशण्डिकाप्रयोगः. Substance, country-made paper, 11×3 inches. Folio, 30. Lines, 11 on a page. Extent, 950 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍita Vāmanācāryya. Appearance, old. Prose. Correct.

**Beginning.** सूत्रानुसारिमधुपर्कप्रयोगः ।

सूत्रव्याख्यां पुरा कृत्वा देवभट्टेन धीमता ।

अथर्वे पाकतन्त्रस्य प्रयोगोथ वितन्यते ॥

**End.** वैदिकानां हितार्थाय प्रयोगोऽयं मया कृतः ।

कौशिकास्तेन तुष्यन्तु सन्त्वयन्तु सुखेन हि ॥

**Colophon.** इति पाकतन्त्रे शान्तिप्रयोगः ।

विषयः । अथर्ववेदोक्त-गृह्यकर्मप्रकृतिभूतकुशण्डिका ।

---

**No. 172.** पाणिनीयशिक्षाविवरणम्. Substance, country-made paper, 10×5 inches. Folia, 7. Lines, 11 on a page. Extent, 400 çlokas. Character, Nāgara. Date Sm. 1832. Place of deposit, Tikāri, Zilla Gayā, Paṇḍita Çāstri. Appearance, tolerable. Prose. Generally correct.

**Beginning.** श्रीगणेशाय नमः ॥

पातु वो निकषग्रावा मतिहेम्नः सरस्वती ।

प्राज्ञेतरपरिच्छेदं वचसैव करोति या ॥

छन्दः-कल्प-निरुक्तानि विहतानीह सूरिभिः ।

शिक्षात्वविहता यस्मात् तस्मात् तां विदधोम्यहम् ॥

अथ शिक्षां प्रवक्ष्यामि । अधेत्ययमानन्तर्य्यो वेदाध्ययनस्यानन्तरमङ्गपाठः ॥

इत्यादि ।

**End.** स्वर्गादीनि परिमितकालत्वात्तोलयितुं शक्यन्ते ।

मोक्षाख्यन्तु अपरिमितकालावच्छिन्नं सुखरूपमित्यर्थः ॥

**Colophon.** इति श्रीपाणिनीयशिक्षा-व्याख्या समाप्ता ॥ * ॥

संवत् १८३२ ॥

विषयः । पाणिनीय शिक्षायाव्याख्यानम् ॥

---

**No. 173.** पार्थिवशिवकवचं ( उन्मत्तभैरवीतन्त्रोक्तं ). Substance, country-made paper, 10 × 2½ inches. Folia, 3. Lines, 6 on a page. Extent, 36 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā, Paṇḍit Hārāṇ Candra Tarkavāgīsa. Appearance, fresh. Verse. Correct.

**Beginning.** ॐ नमः शिवाय । अथ पार्थिवशिवकवचं ।

देव्युवाच ।

देवदेव महादेव विरूपाक्ष त्रिलोचन ।
कृपया कथ्यतां देव पार्थिवस्य महात्मनः ।
कवचं दुर्लभं तस्य श्रोतुमिच्छामि साम्प्रतम् ॥

श्रीईश्वर उवाच ।

देवेशि शृणु चार्व्वङ्गि जगद्धात्रि मनोरमे ।
कवचं तस्य गिरिजे त्रिषु लोकेषु गोपितं ॥
तव स्नेहान्मया देवि कथितं कवचं शुभं ।
अप्रकाश्यं परं गुह्यं साधकाभीष्टदायकं ॥
कवचस्य ऋषिरुन्मत्तभैरवोऽनुष्टुप्छन्दः पार्थिवशिवो देवता सर्व्वकामार्थ-सिद्धये विनियोगः ॥ इत्यादि ।

**End.** कवचं धारयेद् यस्तु साधको दक्षिणे भुजे ।
देवा मनुष्या गन्धर्व्वा वश्यास्तस्य न संशयः ॥
कवचं शिरसा यस्तु धारयेद् यतमानसः ।
करस्थास्तस्य देवेशि अणिमाद्यष्टसिद्धयः ॥
काम्यस्वस्त्ययने देवि पूजयेत् पार्थिवं शिवं ।
तत्रैव प्रपठेद् देवि फलार्थी फलभाग् भवेत् ॥

**Colophon.** इत्युन्मत्तभैरवीतन्त्रे देवीश्वरसंवादे पार्थिवशिवकवचं समाप्तं ॥ ॐ तत् सत् ॥

विषयः । पार्थिवशिवकवचस्य माहात्म्यादिकीर्त्तनम् ।

---

**No. 174.** पाश्चात्यवैदिककुलपञ्जिका. Substance, country-made paper, 20×4 inches. Folio, 123. Lines, 6 on a page. Extent, 2,460 çlokas. Character, Nāgara. Date Place of deposit, Benares, Paṇḍit Çambhu Candra Vidyāsāgara. Appearance, old. Verse. Correct.

**Beginning.** पाशाङ्कुशसुधापूर्णं विध्वंसत जयद्रुजाः (?) ।
विघ्नं निघ्नन्तु नो ऽभक्तनिघ्नविघ्नपते भुजाः ॥
देवेन्द्रोपेन्द्रचन्द्राद्यैर्वन्द्यां वृन्दारकैर्मुदः ।
गिरीन्द्रनन्दिनीं वन्दे सच्चिदानन्दरूपिणीम् ॥
रविशशिदहनाक्षः कोपविध्वंसदक्षः
प्रहतसुरविपक्षः स्वानुरक्तैकरक्षः
प्रमथदनुजरक्षः प्रेतवेतालयक्ष-
प्रभृतिदमनदक्षः पातु नः सर्व्वभक्षः ॥
वन्दे शौनकमादरान्मुनिवरं श्रेष्ठं वशिष्ठं तथा
शाण्डिल्यं श्रुतिमण्डितं वरभरद्वाजं यशोभाजनं
सावर्णिञ्च सुवर्णतः श्रुतिगुणं पञ्चैव ते वन्दिताः ॥

**End.** इति रामकान्तस्य. तद्भ्रातुः श्रीकण्ठस्य यथा—
श्रीकण्ठकः परिणिनाय × × ×
× × × जननस्य महाधनस्य
श्रीयुक्त रामनवसिंहसमाह्वयस्य
कौमारिणीं गुणगणाकलितां तनूजां ॥ इति श्रीकण्ठस्य ।

**Colophon.** ... ... ... ... ... ...

विषयः । वङ्गीयपाश्चात्यवैदिकानामागमनकालनिर्णयस्तेषां वंशपरम्पराकथनञ्च ।

---

**No. 175.** पितृमेधसूत्रम्. Substance, country-made paper, 12×4 inches. Folio, 10. Lines, 11 on a page. Extent, 250 çlokas. Character, Nāgara. Date Sм. 1804. Place of deposit, Benares, Vāmanācāryya. Appearance, old. Prose. Correct.

**Beginning.** श्रीगणेशाय नमः ।
अथातः पैतृमेधिकं दहनं पुरुषो( . . )स्य प्रियतमेति विज्ञायते ।
आहिताग्नेर्मरणसंशये प्राचीनावीती दहनदेशं जोषयते ॥

End. अथातः पैतृमेधिकं इत्युक्तं, अथातः पैतृमेधिकमपरेद्युरथात उत्तरं नवस्थां (.)छायामिष्टकाः प्रतिदिशमथाजस्रां द्वादश षट्. हरिः ओम्।

Colophon. भारद्वाजसूत्रे पितृमेधसूत्रं सम्पूर्णम्। संवत् १८०४।

विषयः। आपस्तम्बशाखीयानां पितुरन्त्येष्टिक्रियाकथनम्॥

---

**No. 176.** पिष्टपशूज्जीवनम्. Substance, country-made paper, 10 x 4 inches. Folio, 36. Lines, 9 on a page. Extent, 540 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, fresh. Prose. Correct.

Beginning. श्रीरामचन्द्राय नमः।
ॐ श्रीमदानन्दतीर्थार्य्यहृदयाम्भोजविष्टरम्।
श्रीनन्दनन्दनं वन्दे नन्दनानन्ददायिनम्॥

End. अग्नीषोमीयदेवताकपशूद्देश्यकमालभनं विधीयते इति चेत् अत्रापि पिष्टपशूद्देश्यकं करणं विधीयते इति ब्रूम इति न कोऽपि शङ्काकलङ्कः (इतो नास्ति)।

Colophon. — — . — — — —

विषयः। माध्वमते पिष्टपशुविधानम्।

---

**No. 177.** पिष्टपशुप्रतिपादकविधिवाक्यप्रकरणम्. Substance, country-made paper, 10 x 4 inches. Folia, 16. Lines, 16 on a page. Extent, 640 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍita Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. मोक्षधर्मेषु यज्ञप्रकरणे पिष्टपशुप्रतिपादकानि विधिवाक्यानि।
एषोऽस्माभिर्न दृष्टः स कथं त्वं द्रष्टुमर्हसि।
नारायणो महोद्भूतं विश्वहृक् हव्यकव्यभूक्॥

End. न च पुरोडाश एवाचोच्यते न पश्वाकारसिद्धिरिति वाच्यम्। तत्र पशुपदप्रयोगात्. न चायमर्थवादः, लिङ्-श्रवणात्, अतएव न लक्षणा, विधौ लक्षणायोगात्. अत्र बहुवक्तव्यमस्ति विस्तरभिया नोच्यत इत्यलमति विस्तरेण।

Colophon. — — — — — —

विषयः । माध्वमतानुयायी पिष्टपशुप्रतिपादकविधिवाक्यसंग्रहः ॥

---

No. 178. पिष्टपशुखण्डनम् . By टीकाकारशर्म्मा . Substance, country-made paper, 12 × 4½ inches. Folio, 19. Lines 5 on a page. Extent, 228 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. सिंहस्थामथिमुण्डनिर्भयवरान् हस्ते दधानां शिवां
दन्तोष्ठाधरयोः क्रमेण जगतां धात्रीं तथा वामतः ।
स्कन्धे सर्पधरां गलद्रुधिरया सर्व्वाङ्गरागोज्ज्वलां
दिग्वस्त्रां मनुजाकृतिं च दशभिर्व(.)र्युतां कालिकाम् ॥

End. अहिंसाधर्मतात्पर्य्योद्भूतस्वकुलोत्पन्नपुरुषशतकेन यद्धर्मपालप्रभालज्जितचन्द्रि-(.)कालिकापादपद्मपरायण(.)व्यापनोद्बोधितशक्तेन्द्रवर्य्यहृत्पद्माङ्कादेन गङ्गा-नीरतीर(...)तुलीकृत(..)भ्रुकुटिभीषणान्तकभट्टोग्रशर्म्मारभट्टोद्भवेन टीका-कारशर्म्मणा कृतः पिष्टपशुखण्डनाख्योयं ग्रन्थः समाप्तः ।

Colophon. — — — — — —

विषयः । माध्वमते अग्निष्टोमादौ साक्षात् पशुहननमविधेयं किन्तु पिष्टपशुहननमेव कर्त्तव्यं; तद्विरुद्धप्रमाणान्युक्तान्यस्मिन् ग्रन्थे ।

---

No. 179. पिष्टपशुखण्डनवाक्यार्थदीपिका . By रत्नपाल . Substance, country-made paper, 12 × 4½ inches. Folio, 19. Lines, 10 on a page. Extent, 175 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍita Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।
प्रसादं शङ्करं नत्वा परानन्दं दयाकरम् ।
× × + × ×
ग्रन्थसमाप्ति-ग्रन्थप्रचारादिप्रतिबन्धकदुरितप्रशमनाय समुचितस्वेष्टदेवता-लक्षणरूपं मङ्गलाचरणं शिष्यशिक्षायै व्याख्यातृश्रोतॄणां प्रसङ्गतो ग्रन्थतो मङ्गलाय च निबध्नाति सिंहस्थामित्यादि ।

End. परमानन्दसन्दोहतुष्टये दीपिका मया ।
रत्नपालेन रचिता कुर्वे(..) यथा पुरा ॥

Colophon. इति पिष्टपशुमण्डनवाक्यार्थदीपिकासमाप्तिमगमत् । फाल्गुणे कृष्णपक्ष शिवरात्रौ ।

विषयः । पिष्टपशुमण्डनव्याख्या ॥

---

No. 180. पुण्यलक्ष्मीसम्वादः. Substance, country-made paper, 12 × 4½ inches. Folio, 4. Lines, 13 on a page. Extent, 160 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Dikmaṇḍalācāryya Mahārāja Bālacandra. Appearance, old. Prose. Correct.

Beginning. अथ पुण्यलक्ष्मीसम्वादो लिख्यते ।
अङ्गदेशे महादेशे कनकाख्यं पुरोत्तमम् ।
कनकसिंहो राजाभूत् वल्लभा कनकावती ॥

End. सुन्दरं धर्मकर्त्तव्यं दयामूलं जिनोदितम् ।
विश्वत्रयेऽपि विख्यातं दानशीलतप ( . . ) ॥

Colophon. इति श्रीपूण्यलक्ष्मीविवाददृष्टान्तः समाप्तः ।

विषयः । जैनधर्ममाहात्म्यकीर्त्तनम् ।

---

No. 181. पुत्रदस्तोत्रम्. Substance, country-made paper, 11 × 2 inches. Folio, 1. Lines, 6 on a page. Extent, 9 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetā Grām Khunverā, Paṇdit Hārān Chandra Tarkavāgisā. Appearance, old. Verse. Correct.

Beginning. श्रीरामाय नमः ।
श्रीईश्वर उवाच ।
शृणु देवि प्रवक्ष्यामि रामस्य परमात्मनः ।
स्तोत्रं द्वादशनाम्ना च पुत्रदं वाञ्छितप्रदम् ॥
जानकीवल्लभः श्रीशः कौशल्यानन्दवर्द्धनः ।
रावणारिः खरध्वंसी दयालुः सेतुबन्धकृत् ॥
हनूमत्प्रीतिकर्त्ता च सुग्रीवेशः सतां पतिः ।
रामो दाशरथिश्चैव ह्येतद्द्वादशनामकम् ॥
इमं स्तोत्रं महापुण्यं यः पठेद्धारयेत् सदा ।

फलं तस्य प्रवक्ष्यामि शृणु देवि वरानने ॥
अपुत्रो लभते पुत्रं गुर्व्विणी जनयेत् सुतम् ।
मृतवत्सा च या नारी जीववत्सा भवेद्ध्रुवम् ॥
पठेद्वा पाठयेद्वापि त्रिकालं नियतः शुचिः ।
संवत्सरस्य मध्ये तु पुत्रवान् नात्रसंशयः ॥
न प्रकाश्यं न देयञ्च गोपनीयं प्रयत्नतः ।
देयं शिष्याय भक्ताय वैष्णवाय विशेषतः ॥

**Colophon.** इति श्रीरामतापनीये उमामहेश्वरसंवादे पुत्रदस्तोत्रं समाप्तम् ।

---

**No. 182.** पुत्रप्रतिग्रहविधिः. Substance, country-made paper, 8 × 3 inches. Folio, 3. Lines, 11 on a page. Extent, 75 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya Appearance, old. Prose. Correct.

**Beginning.** अथ दत्तकविधिमाह । शौनकः ।
ब्राह्मणानां सपिण्डेषु कर्त्तव्यः पुत्रसंग्रहः ।
तदभावेऽसपिण्डे वा अन्यत्र तु न कारयेत् ॥
क्षत्रियाणां स्वजातौ वा गुरुगोत्रसमोऽपि वा ।
वैश्यानां वैश्यजातिषु शूद्राणां शूद्रजातिषु ॥

**End.** यद्येवं कृत्वौरसः पुत्र उत्पाद्यते तृतीयभागे प्रभवतीति हस्माह बौधायन इति ।

**Colophon.** इति पुत्रप्रतिग्रहविधिः ।

विषयः । दत्तकग्रहणविचारः ॥

---

**No. 183.** पुष्पमाला. Substance, country-made paper, 12 × 4½ inches. Folio, 9. Lines, 19 on a page. Extent, 720 çlokas. Character, Nāgara. Date Place of deposit, Benares, Dikmaṇḍalācāryya Mahārāja Bālacandra. Appearance, old. Verse. Correct.

**Beginning.** सिद्धम्, कम्मविग्गहमकलङ्कमस( . . )रं
पणमामि सुगइपेच्छलपयमखेपयासनं वीरम् ॥

**End.** जाव जिन सासनमि( . . ) जावय धम्मो
जयम्मि विस्कु( . ) इ, ताव । परिभुभउ एषा भव्वे हिंसया सुइम्मिह ।

Colophon. पुष्फमालासम्मत्ता ।

विषयः । जिनस्तुतिः ॥

No. 184. पूर्व्वपक्षसमाधानम् . By हेरिलशर्म्मा . Substance, country-made paper, 11 × 5 inches. Folio, 43. Lines, 12 on a page. Extent, 1,700 çlokas. Character, Nāgara. Date Place of deposit, Tikāri, Diṭṭ. Gayā, Paṇḍita Çastri. Appearance, fresh. Prose. Incorrect.

Beginning. श्रीगणेशाय नमः ।

नमस्कृत्य शिवं साम्बं गणनायकसंयुतम् ।
लभन्ते यत् प्रसादेन लोकाः सर्व्वमनोरथम् ॥
पुरा रामसभायां ये व्याकृताः मम सन्निधौ
पूर्व्वपक्षाः कृताः लोकैः पण्डितानां समाधयः
लिख्यन्ते ते मया यत्नैरुपकाराय धीमतां
छात्राणां सुगमैः पद्यैः श्रीमद्धेरिलशर्म्मणा ॥

End. तस्मात् पूर्व्वापरविरोधो दुष्परिहरः भाष्यपरिशीलनशालिनो विवेचयन्तु सुधियः ॥

विषयः । महाभाष्यस्य पूर्व्वपक्षकथनं तत्समाधानञ्च ॥

No. 185. पूर्व्वमीमांसापरिभाषा . By कृष्णयज्वा . Substance, country-made paper, 12 × 4½ inches. Folio, 27. Lines, 9 on a page. Extent, 459 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍita Govinda Bhaṭṭa, Appearance, old. Prose. Correct.

Beginning. सूर्य्यनारायणं वन्दे देवीं त्रिपुरसुन्दरीम् ।
गुरूनधिगतार्थांश्च निरन्तरमहं भजे ॥ १ ॥
बालानां शास्त्रसिद्धार्थलेशबोधाय धीमताम् ।
मीमांसापरिभाषेयं क्रियते कृष्णयज्वना ॥ २ ॥
इह खलु महर्षिणा जैमिनिना द्वादशलक्षण्यां पूर्व्वमीमांसायां धर्माधर्मा-वेवानुष्ठानोपयोगितया विचारितौ तत्र वेदबोधितेष्टसाधनताको धर्मः ।

End. पुरोडाशस्य प्रयाजशेषेणाभिघारणं ततः पयसोऽभिघारणमिति मुख्यगाग-

क्रमादाभिघारणक्रमः । इत्येवं श्रुत्यर्थपाठस्थानमुख्यार्थप्रवृत्तिक्रमैरेव कर्मानुष्ठानम् । अन्यथानुष्ठाने वैगुण्यमित्यलम् ।

**Colophon.** इति श्रीकृष्णयज्वकृता पूर्व्वमीमांसापरिभाषा सम्पूर्णा ।

विषयः । जैमिनिसूत्रोक्तकर्म्मणां संक्षेपेण विनियोगकथनम् ॥

---

**No. 186.** पृथ्वीवराहसंवादः. (आदिवाराहीयः) Substance, country-made paper, 8×3 inches. Folio, 11. Lines, 8 on a page. Extent, 250 çlokas. Character, Bengali, Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grām Telivani, Paṇḍit Nilkumar Gosvāmi. Appearance, old. Verse. Incorrect.

**Beginning.** ॐ नमः श्रीकृष्णाय । आदिवराहतन्त्रे ।

पृथिव्युवाच ।

अनन्तकोटिब्रह्माण्डं तद्वाह्याभ्यन्तरस्थितम् ।
विष्णोः स्थानं परं तेषां प्रधानप्रियमुत्तमम् ॥
मत्परं नास्ति कृष्णस्य प्रियस्थानमहोत्तमम् ।
तदहं श्रोतुमिच्छामि कथयस्व कृपानिधे ॥

श्रीवराह उवाच ।

गुह्याद्गुह्यतमं हृद्यं परमानन्दकारणम् ।
अत्यद्भुतं रहस्यानां रहस्यं परमं शिवम् ॥
... ... ... ...
सात्वतां स्थानमूर्द्धण्यं विष्णोरेकान्तवल्लभम् ।
नित्यवृन्दावनं नाम ब्रह्माण्डोपरि संस्थितम् ॥

**End.** गौरं चतुर्भुजं विष्णुं शङ्खचक्रगदायुधम् ।
किरीटकुण्डलाद्यैश्च शोभितं वनमालिनम् ॥
पूर्व्वद्वारे द्वारपालं गौरं विष्णुं प्रकीर्त्तितम् ।
कृष्णवर्णं चतुर्बाहुं शङ्खचक्रादिभूषितम् ।
दक्षिणद्वारपालश्च श्रीविष्णुं कृष्णवर्णकम् ॥

**Colophon.** इति आदिवराहतन्त्रे श्रीवराहपृथ्वीसंवादे श्रीमद्गोविन्दलीलायां परिपूर्णास्तवं समाप्तम् ॥

विषयः । वृन्दावनस्य माहात्म्यादिवर्णनम् ॥

---

**No. 187.** प्रतिष्ठामयूखः. By नीलकण्ठभट्ट. Substance, country-made paper, 10 × 3 inches. Folio, 49. Lines, 8 on a page. Extent, 750 çlokas. Character, Nāgara. Date S.M. 1898. Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose and Verse. Correct.

**Beginning.** नृसिंहो जयति ।
मत्वो मद्दत्नमाराध्यं जलोत्सर्गमथोक्तवान् ।
प्रतिष्ठाः सर्व्वदेवानां नीलकण्ठो वदत्यसौ ॥
तत्र विष्णुधर्मोत्तरे ।

**End.** कर्पूरास्त्रः प्रजानाञ्च शान्तिर्भवतु सर्व्वदा ।
अस्माकं शिल्पिनाञ्चैव सुप्रीतो भव सर्व्वदा ॥

**Colophon.** इति विश्वामित्रवंशावतंसश्रीमहाराजाधिराजपूजितचरणकमल-मीमांसक-शङ्करभट्टात्मजभट्टनीलकण्ठकृते प्रतिष्ठामयूखेऽष्टमः समाप्तः । संवत् १८९८ ॥

विषयः । सर्व्वप्रतिष्ठाकथनम् ।

---

**No. 188.** प्रत्यङ्गिरास्तोत्रम्. Substance, country-made paper, 9 × 4 inches. Folio, 6. Lines, 11 on a page. Extent, 200 çlokas. Character, Nāgara. Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunvera, Paṇḍit Harān Chandra Tarkavāgīśa. Appearance, fresh. Verse. Correct.

**Beginning.** श्रीगणेशाय नमः । अथ प्रत्यङ्गिरास्तोत्रं लिख्यते ।
यो मे इत्यादिमन्त्राणां प्रत्यङ्गिरा ऋषिः जगतीच्छन्दः इन्द्रादयो देवता आत्मरक्षार्थे पाठे विनियोगः ।
यो मे पूर्व्वगतः पद्मा पापमेकेन कर्म्मणा । ?
इन्द्रादिदेवो राजा तं जृम्भयतु जृम्भयतु स्तम्भयतु मारयतु कलिं तस्मै प्रयच्छतु कृतं मम शिवं मम शुभं मम शान्तिस्वस्त्ययनं इन्द्राय नमः । इन्द्रो मे देवः सुप्रीतो वरदो भवतु ॥ इतिपूर्व्वे ॥ यो मे आग्नेये अग्निस्तं भापयतु शापयतु मारयतु कलिं तस्मै प्रयच्छतु कृतं मम शिवं मम शुभं मम शान्तिस्वस्त्ययनं अग्नये नमः ॥ इत्यादि ॥

**End.** पुष्पैस्तु रक्तवर्णैस्तु ध्यायेत् प्रत्यङ्गिरां पराम् ।
वर्षादूर्द्धमजं मेषं × × × विधिवद्दत्वलिम् ॥

मरीचलाजलवणे र्वर्षेण मरणं भवेत् ।
महासङ्कटरोगे च न भयं विद्यते क्वचित् ॥
प्रेतपिण्डं समागम्य गोलोकं कारयेत् ततः ।
साध्यामात्रां + + कृत्वा शत्रुमायावी पुत्तलीम् ॥ ?
जीवतन्त्रं निधायैव चिताग्नौ प्रक्षिपेत् ततः ।
एकायुतं जपं कृत्वा विरात्रे मारणं रिपोः ॥
महाज्वरो भवेत् तत्र तायस्य च शलाक + ।
++ द्वारे क्षिपेत् तस्य + + + मारणं ध्रुवम् ॥

Colophon. इति श्रीप्रत्यङ्गिरास्तोत्रं सम्पूर्णम् ।

विषयः । प्रत्यङ्गिरास्तवकथनम् ॥

---

**No. 189.** प्रत्याख्यानभाष्यचन्दनकभाष्यावचूर्णिः. By सोमसुन्दरसूरि. Substance, country-made paper, 12 × 5 inches. Folio, 11. Lines, 23 on a page. Extent 1,012 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Dikmaṇḍalācāryya Mahārāja Bālacandra. Appearance, old. Prose. Correct.

Beginning. सिद्धिसूरिगुरुभ्यो नमः ।
वन्दे इति वन्दनीयान् सर्व्वान् सर्व्वज्ञान् स्तुत्वा । दश इति । दश- निकानि नैषेधकौ चयादिरूपाणि यत्र द्वारे तद्दशनिकम् ।

End. श्रीआवश्यकप्रत्याख्याननिर्युक्तिवृत्यादिभ्योऽवगन्तव्या । प्रधानफलमाह पत्त- सुगमा । इति ।

Colophon. श्रीसोमसुन्दरसूरिविरचिता प्रत्याख्यानभाष्यचन्दनकभाष्ययोरवचूर्णिः । श्रीआवश्यकवृत्तितः कृता संक्षिप्ता ।

विषयः । प्रत्याख्यानभाष्यचन्दनकभाष्यव्याख्या ॥

---

**No. 190.** प्रबोधोदयनाटकम्. By शुक्लेश्वरनाथ. Substance, country-made paper, 12 × 5 inches. Folio 62. Lines, 11 on a page. Extent, 2,000 çlokas. Character, Nāgara. Date S.K. 1823. Place of deposit, Tikāri, Dist. Gayā, Paṇḍita Çāstri. Appearance, tolerable. Prose and Verse. Incorrect.

**Beginning.** श्रीगणेशाय नमः ॥

ज्ञातं (ज्ञानं) हष्मामुनीन्द्रनिवहैर्निर्द्धर्म्मकं यत् सदा
कर्त्ता तर्कविलासिभिर्निगदितो मायागुणैः संयुतः ।
मीमांसारसिकैस्तु कर्म्मपुरुषः सांख्यैः प्रकृत्यान्वितो
भूयाच्छर्म्मकरं विचित्रमतिदं तच्छब्दरूपं महः ॥

× × × × नान्द्यन्ते सूत्रधारः ॥ आर्य्येऽद्य श्रीमत् प्रचण्डदोर्द्दण्ड × × × × श्रीमद्वीचीर? वंशावतंसेन श्रीमहाराजभगवन्नारायदेवेन आदिष्टोऽस्मि, सकलशास्त्रविषयकज्ञानप्रागल्भ्यभाजां गीर्व्वाणवाणेव व्यवहारमाचरतां पावाणां प्रवेशेनानुरज्यतामियं परिषदिति ॥ नटी । यद्यपि वेद एवार्य्यपुत्रवचनेनार्थसिद्धिसन्देहावकाशस्तथापि दुष्प्राप्ये वस्तुनि विज्ञाप्यन्त एव प्रभवोऽनुचरैः, प्राय एव तादृशः प्रबन्ध इति ॥ सूत्रधारः । आर्य्येऽतीते बहुतरे काले न कर्णगोचरीकृतंभवत्या × × × × × भारद्वाजवंशप्रथितमहाजनक्रियादिसम्पादितयशोऽनुरागिणा तद्वंशकरीरेण श्रीशुक्लेश्वरनाथेन रचितं प्रबोधोदयनाटकमिति ...... त्वणिकाकाशगुणशब्दरूपेण व्याहृतं । नटी । आर्य्यपुत्रकस्यायं क्रोधकटोच्छलनरूषिताचरस्य शब्दाडम्बरः ॥ सूत्रधारः । आर्य्ये भगवत्तादात्म्यतापन्नशब्दनित्यताश्रवणसञ्जातक्रोधच्छटाघूर्णितारुणितनयनावलोकनसन्त्रासितसमस्तसभासत्त्वभाजः शिष्याक्रान्तोभयपार्श्वको नैयायिक इत एवाभिवर्त्तते । तस्मात् नोचितमस्य समीपे स्थातुमिति निष्क्रान्ताः सर्व्वे । प्रस्तावना ॥

**End.** पण्डितपुरुषः । यद्येवं तर्हि साम्प्रतमेव भवदुक्तिशब्दात् श्रवणाभ्यामनुमिता श्रुता एतद्भन्यावदाततता ॥ हा राजन् अहो प्रभातकल्पेयं रजनीति तथा हि ।

लज्जानम्रमुखी विभाति सुरतानेहोध्वनिं सारिका-
वक्त्रोद्गारितमाकलय्य रहसि प्रोक्तं प्रियोऽयं प्रियां
वेदान् विप्रमुखो × × × प्रति × वन्द्यन्ते × × × ×
गायन्ते द्विजसत्तमाः सुरधुनी × × × विद्याधनाः ॥ भवतु श्रीमद्भिरपि गम्यतां स्वस्मै स्वस्मै शिविरायेति महाराजाज्ञया गताः सर्व्वे ॥ षष्ठोऽङ्कः समाप्तश्चायं ग्रन्थः । अग्निलेकुगजदुर्मिमितेऽब्दे? १८२७ ,,, गुरुवासरे लेखि इदं पुस्तकम् ॥

विषयः । महाराजभगवन्तरायस्य-सभायां समागत-वैयाकरण-मीमांसक-नैयायिक-तान्त्रिकादीनां पूर्व्वपक्षसिद्धान्तादिकथनम् ॥

---

**No. 191.** **प्रयोगसारः .** Substance, country-made paper, 10×3½ inches. Folia, 99. Lines, 18 on a page. Extent, 3960 çlokas. Character, Nāgra. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

**Beginning.** श्रीगणेशाय नमः ।

गजाननं तथा साम्बं शिवं संसारमोचनं,
आश्वलायनमाचार्य्यं मातरं पितरं तथा ।
विश्वेश्वरं गुरुं वापि प्रणिपत्य यथाक्रमं,
प्रयोगसारं कुरुते मन्दानां कर्म्मसिद्धये ।

**End.** नोपवासादित्यत्रप्रधानदेवतास्वत्तत् पाकयज्ञोक्तदेवताः द्रष्टव्याः । इति स्थालीपाकप्रयोगः ।

**Colophon.** इति गर्भाधानप्रभृति-स्थालीपाकान्तप्रयोगः ( ... ... ) इति प्रयोगसारे गर्भाधानादिस्थालीपाकान्तप्रयोगः समाप्तः ।

विषयः । संक्षेपेन गर्भाधानादि-स्थालीपाकान्तप्रयोगकथनम् ।

---

**No. 192.** **प्रयोगसारः .** Substance, country-made paper, 8×4½ inches. Folia, 204. Lines, 10 on a page. Extent, 3,060 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍita Vāmanācāryya. Appearance, very old. Prose and verse. Correct.

**Beginning.** ( अस्य प्रथमतः सप्तश्लोकाः विलुप्ताः । )

प्रत्यक्ष देवतायान्तु होमं कुर्य्याद्विचक्षणः ।
तस्य नाम गृह्णीत्वाथ प्रीयतामिति भाषते ।

**End.** अनेन यथाविभवं गजाश्वादियानमारोहयेत् । यानेन प्रयाननियमः

× × × × × ×
+ × × × × +
× × ×रोहयेत् । ( इतो नास्ति । )

**Colophon.** — — — — — —।

विषयः। सर्व्वविषसंस्कारकथनम्।

---

**No. 193.** प्रश्नविद्या. By चण्डेश्वर. Substance, country-made paper, 16×3 inches. Folia, 17 Lines, 6 on a page. Extent, 600 çlokas. Character, Bengali. Date S.K. 1744. Place of deposit, Zilla Midnapur, Post, Garveta gram Khunvera, Late Paṇḍit S'rīpati Bhaṭṭācaryya. Appearance, tolerable. Verse. Generally correct.

**Beginning.** नत्वा कृष्णपदारविन्दयुगलं सर्व्वार्थसिद्धिप्रदं।
कल्याणं कलिकल्मषक्षयकरं त्रैलोक्यपूज्यं किल॥
श्रीचण्डेश्वरशर्म्मणा बहुविधं शास्त्रार्थमालोच्य च।
प्रश्ने लग्नबलाबलं ग्रहवशात् तत्त्वार्थमातन्यते॥
दीप्तः स्वतुङ्गे खचरः सुनीचो दीनो विरश्मिर्मुषितो निरुक्तः।
प्रपीड़ितो व्योमचराभिभूतः सुस्थो निजक्षेत्रमनुप्रयातः॥ इत्यादि

**End.** सौगन्ध्यं शरलं तुलामलयजं चैलाद्रकं पूगकं
डिम्बं लड्डुकपर्णचूर्णनखरं लौहासवः स्यात् क्रमाः।
लाक्षा स्याद्रजनी च हिङ्गु जिरकं तैलं मरीचं निधौ
गोधूमान् पक्षिवीजकं श्रुतिपुटे वाग्देवता मे वद॥ (?)
कृत्वाष्टकोष्ठकं देवि गणयित्वा पुनः पुनः।
खे शङ्कितस्य कथयेत् द्रव्यं नास्ति न संशयः॥

**Colophon.** इति श्रीनामवन्दाद्यध्यायः सप्तविंशतितमः। समाप्तश्चायं ग्रन्थः।
श्रीहलधरशर्म्मणा लिखितं। शकाब्दाः १७४४।

विषयः। भावफलकथनं। ग्रहस्वरूपनिरूपणं। भावज्ञानकथनं। भवफलचिन्तनं। लाभालाभनिर्देशनं। गर्भादिचिन्तनं पथिकगमागमनिरूपणं। देशान्तरगतस्य मरणादिचिन्तनं। पदलाभनिरूपणं। मृगयाचौर्य्यादिचिन्तनं। मरण-भोजन-हस्तिवस्त्र-मोक्षण-नौ-रोग दिनाफलादिचिन्तनं। फलपाककालनिर्णयनं। कुसुमशकटिकाध्यायो नाम वन्दाद्यध्यायश्च।

---

**No. 194.** "प्रश्नोत्तररत्नमाला". By सितपटगुरु. Substance, country-made paper, 12×4½ inches. Folia, 6. Lines, 3 on a page. Extent 36 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Dikmaṇḍalācāryya, Māharāja Bālacandra. Appearance, old. Prose. Correct.

Beginning. प्रणिपत्य जिनवरेन्द्रं प्रश्नोत्तरमालिकां वक्ष्ये,
नागनरामरवन्द्यं देवं देवाधिपं प्रथमं।

End. रचिता सितपटगुरुणा विमला विमलेव रत्नमालेव,
प्रश्नोत्तरमालेयं कण्ठगता कं न भूषयति ।

Colophon. इति प्रश्नोत्तररत्नमाला सम्पूर्णा ।

विषयः । जैनगुरुशिष्यसंवादः ।

---

No. 195. प्रायश्चित्तसारसंग्रहः. By आनन्द चन्द्र. Substance, country-made paper, 18×3 inches. Folia, 31. Lines, 6 on a page, Extent, 750 çlokas. Character, Bengali. Date ? Place of deposit, Dinajpur, Paṇḍita Kṛṣṇadās Smṛtibhusana. Appearance, fresh. Prose and Verse. Correct.

Beginning. ॐ नमो गणेशाय ।
प्रणम्य पार्व्वतीनाथं प्रायश्चित्ते च सारकं ।
आनन्दचन्द्रो विप्रेन्द्रः कुरुते बालबोधकं ॥
पापक्षयमात्रसाधनं प्रायश्चित्तं इत्यादि ॥

End. मासोपवासव्रतं पञ्चदशधेनुसमं पक्षोपवासव्रतं सार्द्धसप्तधेनुसमं सर्व्वत्र प्रमाणन्तु प्रायश्चित्तविवेकादौ द्रष्टव्यं ॥

Colophon. इति श्रीआनन्दचन्द्रकृत-प्रायश्चित्तसारसंग्रहः समाप्तः ॥

विषयः । प्रायश्चित्तलक्षणं । बालत्वादिना प्रायश्चित्तह्रासकथनं ॥ ब्रह्मवधादिप्रायश्चित्त-कथनं ॥ गोवधस्त्रीवधादिप्रायश्चित्तकथनं ॥ अभक्ष्यभक्षणप्रायश्चित्तकथनं ॥ अगम्यागमनादि-प्रायश्चित्तकथनं ॥

---

No. 196. वङ्कृचोपनिषत्. Substance, country-made paper, 11×5 inches. Folia, 1. Lines, 12 on a page. Extent, 30 çlokas. Character, Nāgara. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, old. Prose. Correct.

Beginning. ओम् देवो ह्येकाग्र आसीत् सैव जनपदं उपद्दजत कामकलेति विज्ञायते शृङ्गारकलेति विज्ञायते तस्या एव ब्रह्मा अजीजनत् विष्णुरजीजनत् सर्वे मरुत्गणा अजीजनन् ।

End. ऋचोऽक्षरे परमे व्योमन् यस्मिन् देवा अधिविश्वे निषेदुः यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासत इत्युपनिषत् ।

Colophon. इति बह्वृचोपनिषत् समाप्ता ।

विषयः । ब्रह्मविद्याकथनम् ।

---

No. 197. बृहच्छान्तिटीका (सुबोधा). By हर्षकीर्त्तिसूरि. Substance, country-made paper, 11 × 5 inches. Folia, 9. Lines, 14 on a page. Extent, 540 çlokas. Character, Nāgara. Date ? Place of deposit, Benares City, Dikmaṇḍalācārya Māhārāja Bālacandra Sūri. Appearance, new. Prose. Correct.

Beginning. नमो जिनेभ्यः ।

श्रीपार्श्वं सर्व्वसिद्धार्थं स्तुत्वा सर्व्वामरैः स्तुतं,
व्याख्याशान्तिस्तवस्यैषा सुबोधा क्रियते मया ।
तत्र पूर्व्वं अस्य स्तवस्योत्पत्तिर्लिख्यते ।

End. इति सुष्ठु आह ब्रूते इति स्वाहा नागपुरीयतपोगणराजा श्रीचन्द्रकीर्त्तिसूरिवरसच्छिष्यहर्षकीर्त्तिसूरिरकार्षीदिमां टीकां । विरचितमङ्गल-( .... ) जायच्छतेः प्रदत्त × × × शान्तिजिनसुप्रसत्तो × × × विरचिता बृहच्छान्तिः ॥

Colophon. इति बृहच्छान्तिटीका सम्पूर्णा ।

विषयः । जैनमतानुयायिबृहच्छान्तिव्याख्या ।

---

No. 198. बृहच्छान्तिवृत्तिः. By हर्षकीर्त्तिसूरि. Substance, country-made paper, 11 × 5 inches. Folia, 6. Lines, 16 on a page. Extent, 300 çlokas. Character, Nāgara. Date ? Place of deposit, Benares City, Dikmaṇḍalācārya Māhārāja Bālacandra Suri. Appearance, new. Prose. Correct.

Beginning. अथ बृहच्छान्तिवृत्तिर्लिख्यते ।

शान्तिः शान्तिर्बृहच्छान्तिः क्षुद्राक्रान्तिसमुच्छ्रयी,
यस्यासाद्य × × वापद्रक्ष सिंहासनं सनत् ।
श्रीशान्तिं शान्तिकर्त्तारं हर्षकीर्त्तिगुणाकरं,
नमस्कृत्य बृहच्छान्तेर्वृत्तिरेषा विधीयते ।

End. पुनः अशिवोपशमो भवतु अशिवस्य अकल्याणस्याविद्यादेरुपशमः चयो भवतु, पुनः शिवं कल्याणं मङ्गलं भवतु इति सुष्ठु आह, ब्रूते इति स्वाहा ।

Colophon. नागपूरीयतपोगणराजा श्रीचन्द्रकीर्त्तिसूरिवरस्तच्छिष्यहर्षकीर्त्तिसूरिरकार्षीदिमां टीकां । इति श्रीबृहच्छान्तिना स्तोत्रटत्तिः ।

विषयः । जैनबृहच्छान्तिस्तोत्रव्याख्या ।

---

**No. 199.** **बृहत् संग्रहः.** By **रेवतीशर्म्मा.** Substance, country-made paper, 9×5 inches. Folia, 89. Lines, 29 on a page. Extent, çlokas. Character, Nāgara. Date S.M. 1900. Place of deposit, Belsārā, Hanumān Tewari. Appearance, new. Verse. Generally correct.

**Beginning.** श्रीगणेशाय नमः ।

आदौ विनायकं नत्वा सारदां भारतीं सदा
रामं कृष्णञ्च गोविन्दं नत्वा भास्करादिग्रहान् नव ।
दीर्घसंग्रहं वक्ष्येऽहं रेवतीशर्म्मा द्विजः ।
चातुर्वर्ण्यं द्विजादीनां सर्व्वकामार्थसिद्धये ॥
अथातः संप्रवक्ष्यामि चक्रं मातङ्गनायकं ।
येन विज्ञानमात्रेण यात्रायुद्धे जयो भवेत् ।

**End.** विद्वत्सभा विराजन्ते यथा तारा निशि स्मृता ।
गणको यदि आयाति सप्तद्वीपे रविर्यथा ॥
यत् यत् जन्मकृतं पुण्यं पापञ्च शुभाशुभं ।
तत् सर्व्वं प्रकटीज्ञानं यस्य लग्नस्य पत्रिका ॥
इति ज्योतिःशास्त्रवर्णनं ॥
श्रीशाण्डिल्यगोत्रजामितशितदेवलं प्रवरत्रयं
शाखा कौथुमसूत्र × सामवेद × × कीर्त्तिता
नाम्ना नारायणत्रिपद इति विभुः पृथ्वीजजाश्वादिकं । ?
ज्योतिर्वित् तिलकं मान्यो × × × भूभृतां ।
तत् सूनुश्चैतन्यकृष्णः । तत् पुत्रो देवीदत्तः तत् पुत्रो रेवतीशर्म्मोहनूमान्
प्रख्यायिकापुरे पण्डितटोलेतिख्याता ।

**Colophon.** इति श्रीरेवतीशर्म्मकृते बृहत्संग्रहे नारायणवर्णनं, विद्यावर्णनं, वैयाकरण-वर्णनं, ज्योतिःशास्त्रवर्णनं, रेवतीशर्म्मणो गोत्रवासवर्णनं, खपुरवर्णनं नाम षोड़शोऽध्यायः सम्पूर्णः ॥ संवत १९०० ॥

विषयः । १ अध्यायचक्रप्रकरणं । २ वास्तुप्रकरणं । ३ जातकप्रकरणं । ४ ग्रहण-प्रकरणं । ५ प्रश्नप्रकरणं । ६ तिथिनिर्णयप्रकरणं । ७ अशौचनिर्णयप्रकरणं । ८ रविगुर्व्वा-दिशान्तिप्रकरणं । ९ ज्वरादिशान्तिप्रकरणं । १० दत्तात्रेयप्रकरणं । ११ ग्रहणमालाकथनं । १२ सरोजव्यालिकादिकथनं । १३ अर्जुनगीता । १४ ब्रह्मनिरूपणं । १५ चंपटपञ्जरिका-कथनं । १६ ज्योतिःशास्त्रादिवर्णनं ग्रन्थकर्त्तुर्गोत्रवंशादिवर्णनं ॥

---

**No. 200.** ब्रह्मखण्डं । Substance, country-made paper, 11×6 inches. Folia, 450. Lines, 25 on a page. Extent, 5,500 çlokas. Character, Bengali. Date ? Place of deposit, Calcutta Viśvakoṣa Office, Babu Nagendranāth Vasu. Appearance, new. Verse. Generally correct.

**Beginning.** कुमारिकाखण्डमध्ये राज्ये च भरतस्य च ।
पञ्चविंशदेकशतं देशानां मुनिसत्तमाः ।
पञ्चदशपत्तनानां शतं वेलाकुलस्य च ।
ग्रामाणां परिसंख्या च ब्रह्मखण्डेषु क्रियते
देशस्तु जाङ्गलोऽनूपः साधारण इति त्रिधा ॥

**End.** चेटकिर् ग्राममुख्यश्च स्वर्गभूमौ भविष्यति ।
यवनग्रामनिकटे सरपुराद्द्विजास्पदं ॥
वारत्रयं लुण्ठनं हि ग्रामस्य यवनैर्द्विजाः ।
कर्त्तव्यश्च कलेः सन्ध्या द्विशताब्दे स्थिते क्षुधा ॥
चौकियग्रामनाशं हि रुद्रवर्षसहस्रगे ।
प्राप्स्यति शीतला रोगी वसन्तो जन्तुभिः सह ॥
शीतलाभयभीत्या च केचिच्च ग्रामवासिनः ।
नेपालप्रान्तभूमिश्च यास्यन्ति च ततः कलौ ॥

**Colophon.** इति भविष्यपुराणे ब्रह्मखण्डे स्वर्गभूमिवर्णने सप्तपञ्चाशत्तमः सर्गः ॥ अतःपरं किञ्चित् खण्डितं ।

विषयः । १ पौण्ड्रदेशमध्ये गौड़देशवर्णनं ॥ २ बरेन्द्रदेशवर्णनं ॥ ३ नीवृन्तिदेशादि-वर्णनं ॥ ४ नारिखण्डदेशादिवर्णनं ॥ ५ वरादेशवर्णनं ॥ ६ । ७ वर्द्धमानदेशवर्णनमुखेन

विद्यासुन्दरयो रुपवर्णनं ॥ ८ । ९ । विन्ध्यपार्श्वस्थितदेशादिवर्णनं ॥ १० । ११ यशोरदेश-वर्णनं ॥ १२ । १३ चन्द्रद्वीपविवरणं ॥ १४ । १५ चोट्टलदेशविवरणं ॥ १६ । १७ आसामदेशवर्णनं ॥ १८ । १९ वरदयोगदेशवर्णनं ॥ २० कौकटान्तर्गतवङ्गदेशविवरणं ॥ २१ । २२ कौकटान्तर्वर्त्ति-अङ्गदेश-विवरणं ॥ २३ । २४ २५ २६ २७ २८ मगधदेश-विवरणं २९ । ३० । ३१ भोजदेशविवरणं ॥ ३२ राजगृहवर्णनं ॥ ३३ । ३४ जरासन्धदेशवर्णनं ॥ ३५ । ३६ । ३७ गयाप्रदेशविवरणं ॥ ३८ ३९ विशालदेशान्त-वर्त्तिदीर्घद्वारदेशविवरणं ॥ ४० ४१ । ४२ चम्पादेशविवरणं ॥ ४३ चम्पापुरवर्णनं ॥ ४४ । ४५ । ४६ मिथिलादेशवर्णनं ॥ ४७ । ४८ तीरभुक्तिदेशविवरणं ॥ ४९ । ५० । ५१ काशीमाहात्म्यकथनमुखेन काशीप्रदेशविवरणं ॥ ५२ । ५३ काशीसारोद्धाररत्नेश्वर माहात्म्यादिकथनं । ५४ ५५ काशीमाहात्म्यविश्वेश्वरमाहात्म्यादिकथनं । ५६ काशी माहात्म्यतद्देवतादीनां माहात्म्यकथनं ॥ ५७ मध्यदेशान्तर्वर्त्तिस्वर्गभूप्रदेशवर्णनं ॥

---

**No. 201.** ब्रह्मानन्दः । Substance, country-made paper, 14 × 3 inches. Folia, 19. Lines, 7 on a page. Extent, 500 çlokas. Character, Bengali. Date S.K. 1764. Place of deposit, Upalatāgram Post Mehar, Zilla Comilla, Paṇḍit Jagabandhu Tarkavāgīśa. Appearance, fresh. Verse. Generally correct.

**Beginning.** ब्रह्मानन्दं प्रवक्ष्यामि ज्ञाते तस्मिन्नशेषतः ।
ऐहिकामुष्मिकानर्थव्रातं हित्वा सुखायते ॥
ब्रह्मवित् परमाप्नोति शोकं तरति चात्मवित् ।
रसो ब्रह्मरसं लब्ध्वानन्दी भवति नान्यथा ॥
प्रतिष्ठां विन्दते स्वस्मिन यदा स्यादथ सोऽभयः ।
कुरुतेऽस्मिन्नन्तरं चेदथ तस्य भयं भवेत् ॥
वायुः सूर्य्यो वह्निरिन्द्रो मृत्युर्जन्मान्तरेऽन्तरं ।
कृत्वा धर्म्मं विजानन्तोऽप्यस्माद्भीत्वा चरन्ति हि ॥
इत्यादि ।

**End.** निरुपाधौ ब्रह्मतत्वे भासमाने स्वयंप्रभे ।
अद्वैते त्रिपुटी नास्ति भूमानन्दोऽत उच्यते ॥
ब्रह्मानन्दाभिधे ग्रन्थे पञ्चमोध्याय ईरितः ।
विषयानन्द एतेन द्वारेणान्तःप्रविश्यतां ॥
पायाद्धरिहरोनेन ब्रह्मानन्देन सर्व्वदा ।

पायाच्च प्राणिनः सर्व्वान् स्वाश्रितान् शुद्धमानसान् ॥

Colophon. इति श्रीब्रह्मानन्दे विषयानन्दो नाम पञ्चमोध्यायः ।
शाके वेदरसाद्रिचन्द्रगणिते पञ्चानने तारणे
बौधाह्वे युगयौनवे निजगुरोः पादारविन्दद्वयं । (?)
ध्यात्वा हृत्सरसीरुहे श्रुतिशिरः श्रीपञ्चदश्याख्यकेऽ·
लिखि श्रीवनमालिनामवटुना स्वज्ञानसन्दीपकः ॥

विषयः । इति श्री ब्रह्मानन्दे योगानन्दोनाम प्रथमोध्यायः ।
,, ,, आत्मानन्दो नाम द्वितीयोध्यायः ।
,, ,, अद्वैतानन्दो नाम तृतीयोध्यायः ।
,, ,, ब्रह्मानन्दाभिधे ग्रन्थे चतुर्थोध्याय ईरितः ।
,, ,, विद्यानन्दस्तदुत्पत्तिपर्य्यन्तोऽभ्यास ईष्यतां ॥
,, ,, इति श्रीब्रह्मानन्दे विषयानन्दो नाम पञ्चमोध्यायः ।

---

**No. 202.** ब्रह्मानन्दः (सटीकः) टीका. By रामकृष्ण. Substance, country-made paper, 11 × 6 inches. Folia, 39. Lines, 16 on a page. Extent, 950 çlokas. Character, Bengali. Date ? Place of deposit, Dinājpur, Rajārampura, Pandit Maheśacandra Tarkacūḍāmaṇi. Appearance, tolerable. Verse and Prose. Generally correct.

Beginning. मूलस्य ब्रह्मानन्दं प्रवक्ष्यामि ज्ञाते तस्मिन्नशेषतः ।
ऐहिकामुष्मिकानर्थव्रातं हित्वा सुखायते ॥
ब्रह्मवित् परमाप्नोति शोकं तरति चात्मवित् ।
रसो ब्रह्मरसं लब्ध्वानन्दी भवति नान्यथा ॥ इत्यादि

टीकायाः नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
ब्रह्मानन्दाभिधं ग्रन्थं व्याकुर्व्वे बोधसिद्धये ॥

End. मूलस्य ब्रह्मानन्दाभिधे ग्रन्थे पञ्चमोऽध्याय ईरितः
विषयानन्द एतेन द्वारेणान्तःप्रविश्यतां ॥
प्रीयाद्धरिहरोऽनेन ब्रह्मानन्देन सर्व्वदा
पायाच्च प्राणिनः सर्व्वान् स्वाश्रितान् शुद्धमानसान् ॥
इति श्रीविषयानन्दे पञ्चमोऽध्यायः ॥
श्रीसीतारामाभ्यां नमः ॥

टीकायाः फलितमाह निरुपाधीति त्रिपुटीभानाभावाद्भूमानन्दोऽयं इत्युच्यते इत्यर्थः । इदानीं ग्रन्थमुपसंहरति ब्रह्मानन्देति । इदानीं ग्रन्थसमाप्तौ अभेदेन हरिहरं स्मरन् प्रार्थयति प्रीयादिति ॥

**Colophon.** इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्य्य-किङ्करेण रामकृष्णाख्येन विदुषा विरचितायां ब्रह्मानन्दे विषयानन्दो नाम पञ्चमोऽध्यायः ॥ इति श्रीब्रह्मानन्दनामकग्रन्थःसमाप्तः ॥

विषयः । १ अध्याये योगानन्दनिरूपणं ॥ २ अध्याये आत्मानन्दनिरूपणं ३ अध्याये अद्वैतानन्दनिरूपणं ॥ ४ अध्याये विद्यानन्दनिरूपणं ५ अध्याये विषयानन्दनिरूपणं ॥

---

**No. 203. भर्त्तृहरिनिर्व्वेदनाटकं.** By **हरिहरोपाध्याय.** Substance, country-made paper, 13 × 3 inches. Folia, 21. Lines, 5 on a page. Extent, 325 çlokas. Character, Nagara. Date ? Place of deposit, Dinājpura, Paṇḍit Krisṇadāsa Smṛtibhūṣaṇa. Appearance, tolerable. Prose and verse. Correct.

श्री शम्भवेनमः ।

**Beginning.** नैत्याथाहत्य मूर्द्ध्ना रजनिकरकलाजाह्नवी चोपनीता ।
यत्राङ्गोत्तापभीता पदमपि न जटाजूटतोऽधः प्रपेदे
× × × × ×
× × × + ×

नान्द्यन्ते सूत्रधारः । अलमतिविस्तरेण भो भोस्त्रिभुवनतरुप्रभृतिवीजस्य भूतस्य भगवतो भूतपते भैरवेश्वरस्य यात्रायां सुलभाः सामाजिकाः श्रीहरिहरप्रणीतेन भर्तृहरिनिर्व्वेदनाम्ना शान्तिरसप्रधानवीन नाटकेनो-पासितुमीहामहे तत्र भवन्तः सावधाना भवन्तु ॥

**End.** गोरक्षः । तथापीदमस्तु
साधोः सिध्यतु कार्य्यमध्यतु चिरं राजा प्रजारञ्जनात्
लक्ष्मी रचतु पचपातमधुरा भूयादुदारात्मनां
त्वद्दोषापनमार्गनादथ सुहृत्सार्थात् सदर्थार्पणा-
दस्मिन् हारिहरे परीक्षितगुणा क्षीणातु गौर्गौरवं ॥
इति निष्क्रान्ताः सर्व्वे ॥

**Colophon.** इति पञ्चमोऽङ्कः ॥ इति श्री हरिहरोपाध्यायकृत-भर्तृहरिनिर्व्वेदनामक-नाटकं समाप्तं ॥

विषयः। स्वप्रियाया भानुमत्या मृत्युश्रवणेन निर्विन्नस्य भर्तृहरिनामकस्य राज्ञो ज्ञान-प्राप्तिकथनं ॥

---

No. 204. भावशतकम्. By नागराज. Substance, country-made paper, 8×5 inches. Folia, 19. Lines, 6 on a page. Extent, 225 çlokas. Character, Nāgara. Date ? Place of deposit, Tikari, District Gayā, Paṇḍit Mahavīraprasād. Appearance, tolerable. Verse. Generally correct.

**Beginning.** श्री गणेशाय नमः।

स्वभ्रं क्वचित् क्वचिदतीव सितेतराभं।
क्वापि प्रफुल्लनवपल्लवसन्निकाशं।
तप्तं क्वचित् क्वचन शीतलमस्तुतेजः
कैवल्यसंहतिपथानुगतं सुदेव ॥

**End.** सोयं दुर्जयदोर्भुजङ्गजनितप्रौढप्रतापानल-
ज्वालाजालखिलीकृतारिनगरः श्रीनागराजो जयी ॥

**Colophon.** इति श्रीनागराजविरचितं भावशतकं सम्पूर्णं ॥

विषयः। भावादिनिरूपणं ॥

---

No. 205. भाषिकसूत्रव्याख्या. By अनन्तभट्ट. Substance, country-made paper, 12×5 inches. Folia, 20. Lines, 10 on a page. Extent, 230 çlokas. Character. Nāgara. Date ? Place of deposit, Benares City, Paṇḍit Govinda Bhaṭṭa. Appearance, old. Prose. Correct.

**Beginning.** वन्दे विष्णुं महानन्दं भक्तकल्पमहीरुहं।
यच्छायासंश्रितैर्लभ्यं नरैरर्थचतुष्टयं ॥
कुपिताद्विपणाच्छायां समीकृत्य परं सुखं।
सेवन्ते तत् पदं धीरास्तमनन्तं भजेन्वहं ॥

**End.** वचनप्रसूनमालानन्ताख्येन सूरिणा रचिता,
भ्रियतां हृदये सदये कमलामहिलेन पुरुषेण।

**Colophon.** इति श्रीमत्प्रथमशाखिनागदेवभट्टात्मजेन श्रीमदनन्तभट्टेन विरचितं भाषिकसूत्रव्याख्यानं समाप्तं।

विषयः। शतपथब्राह्मणस्वरसंस्कारकभाषिकसूत्रव्याख्या।

---

**No. 206.** भुवनेश्वरीस्तवटीका. By गौरमोहनविद्यालङ्कार. Substance, country-made paper, 14×3 inches. Folia, 5. Lines, 8 on a page. Extent, 130 çlokas. Character Bengali. Date S.K. 1764. Place of deposit, Zilla Midnapur, Post Garveta gram Medrā, Babu Parbaticaraṇ Bhaṭṭācāryya. Appearance, old, Prose. Generally Correct.

**Beginning.** ॐ नमो भुवनेश्वर्य्यै ॥

कालीपादयुगं रम्यं ध्यात्वा श्रीगौरमोहनः ।
टीकां तनोति विमलां धीरैरेषा प्रगृह्यताम् ॥
सन्त्यत्र बहवो दोषा गुणलेशो न विद्यते ।
तथापि गृह्यतां कृत्वा बालके मयि नैर्घृणाम् ॥
अथ सर्व्वविद्याप्रधानाया भुवनेश्वर्य्या स्तवस्यार्थसुबोधाय व्याख्यायते, अथानन्दमयीमित्यादि अथ पूजाद्यनन्तरं आनन्दमयीं नित्यानन्दविशिष्टां साक्षात् शब्दब्रह्मस्वरूपिणीं पूर्णब्रह्मस्वरूपिणीमिति च पाठान्तरं जगत्कारणमम्बिकां जगतां ब्रह्मादीनां कारणं वीजं अम्बिकां जगन्मातरं अथवा अम्बिकानाम्नीं अहं ईडे स्तुतिं करोमीत्यादि ।

**End.** श्रुतिसुरचितपाकमित्यादि, श्रुत्या सुरचितमिव पाकं निष्पन्नं यत्र तदेतत् स्तोत्रं धीमतां बुद्धिशालिनां मध्ये इह जगति यो मर्त्यः मनुष्यः आर्द्रान्तरात्मा आर्द्रो द्रवीभूतोऽन्तरात्मा यस्य स्नेहयुक्तः सन् नित्यं पठति स जनः × × × × विभूतीनां उच्चैःपदं यथा स्यात् तथा भवति श्रुतिसुचरितपाकमिति च पाठान्तरं ।

**Colophon.** इत्युपेन्द्र भट्टवंशोद्भवश्रीगौरमोहनविद्यालङ्कारभट्टाचार्य्यविरचिता श्रीमद्-भुवनेश्वरी-स्तवटीका समाप्ता । शकाब्दा १७६४ ।

विषयः । भुवनेश्वरी स्तवस्य व्याख्यानं ।

---

**No. 207.** भूखण्ड (स्कान्दपुराणीय). Substance, country-made paper, 14×5 inches. Folia, 42. Lines, 9 on a page. Extent, 1,400 çlokas. Character, Bengali. Date ? Place of Deposit, Dinājpura Rājvāḍi. Appearance, new. Prose. Correct.

**Beginning.** ॐ नमो गणेशाय ।

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥

चिदशानां यथाविष्णुस्तीर्थानां तीर्थराड़िव ।
तथा जयति भूखण्डे शम्भलग्राम उत्तमः ॥

स्कन्द उवाच ।

End. नन्दिग्रामस्य माहात्म्यं हरेश्चैव द्विजोत्तम ।
कथितञ्च मया पुण्यं शालग्रामे शिलामये ॥

Colophon. इति श्रीस्कन्दपुराणे भूखण्डे शम्भलग्राममाहात्म्यं ॥ समाप्तोयं ग्रन्थः ॥

विषयः । १ । २ । ३ अध्याये शम्भलमाहात्म्यकथनेन ययातेर्वरलाभकथनं ॥ ४ अर्ककुण्डमन्दिमवर्णनं ॥ ५ दशाश्वमेधवर्णनं ॥ ६ पिशाचमोचनं ॥ ७ एकान्तिवर्णनं ॥ ८ अवन्तीश्वरवर्णनेन यज्ञदत्तमोक्षनिरूपणं ॥ ९ यमतीर्थवर्णनं ॥ १० । ११ प्रयागवर्णनं ॥ १२ । १३ भविष्यगङ्गावर्णनं ॥ १४ गोमतीतीर्थवर्णनं ॥ १५ रेवाकुण्डवर्णनं ॥ १६ गोपालमाहात्म्यवर्णनं ॥ १७ । १८ मोक्षतीर्थवर्णनं ॥ १९ चक्रतीर्थ-वर्णनं ॥ २० गुप्ततीर्थ-वर्णनं ॥ २१ गयावर्णनं ॥ २२ । २३ । २४ कूपादिवर्णनं ॥

---

**No. 208.** भैरवस्तवराजः . ( विश्वसारोद्धारीयः ) Substance, country-made paper, 16 × $3\frac{1}{2}$ inches. Folia, 3. Lines, 8 on a page. Extent, 72 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Candrakonā Ayodhyā Raghunāthvāṭi, Babu Cakrapāṇi Rāya. Appearance, old. Verse. Generally correct.

**Beginning.** अथ वटूकस्तोत्रं ।
कैलासशिखरासीनं देवदेवं जगद्गुरुं ।
शङ्करं परिपप्रच्छ पार्व्वती परमेश्वरं ॥

श्रीपार्व्वत्युवाच ।

भगवन् सर्व्वधर्म्मज्ञ सर्व्वशास्त्रागमादिषु ।
आपदुद्धारकं मन्त्रं सर्व्वसिद्धिप्रदं न्टणां ॥

श्रीभगवानुवाच ।

शृणु देवि महामन्त्रमापदुद्धारहेतुकं ।
सर्व्वदुःखप्रशमनं सर्व्वशत्रुनिवर्हणं ॥ इत्यादि ।

End. एतत् श्रुत्वा ततो देवी नामाष्टशतमुत्तमं ।
भैरवाय प्रहृष्टाभूत् स्वयञ्चैव महेश्वरी ॥

**Colophon.** इति विश्वसारोद्धारे आपदुद्धारकल्पे भैरवस्तवराजः समाप्तः ।

विषयः । वटुकभैरवस्य स्तवकथनं ॥

---

**No. 209.** भ्रमरगीतं. Substance, country-made paper, 14×5 inches. Folia 5. Lines 4 on a page. Extent, 25 çlokas. Character, Nāgara. Date ? Place of deposit, Benares City, Paṇḍit Gobinda Bhaṭṭa. Appearance, new. Verse. Correct.

अथ प्रजल्पः ।

**Beginning.** असूयेर्ष्यामदयुजा यत्तिरस्करणं भद्गया प्रियस्या
कौशलोद्गारः प्रजल्पः स तु कीर्त्तितः ।? यथा ।
मधुप कितव बन्धो मा स्पृशांघ्रिं सपत्न्याः
कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः,
वहतु मधुपतिस्तन्मानिनीनां प्रसादं
यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदक् ॥

अथ सुजल्पः ।

**End.** यचार्जवात् सगाम्भीर्य्यं सदैन्यं सचापलं
त्वत्कण्ठश्च हरिः स्पृष्टः स सुजल्पो निगद्यते ॥ यथा-
अपिवत मधु पूर्य्यामर्य्यपुत्रोधनास्ते ?
स्मरति स पितृगेहान् सौम्यबन्धुंश्च गोपान्
क्वचिदपि स कथां नः किंकरीनां गृणीते,
भुजमगुरुसुगन्धं मूर्ध्न्यधास्यत् कदा नु ॥

**Colophon.** × × × ×

विषयः । सोदाहरणप्रजल्पादिसुजल्पान्तलक्षणान्युक्तानि ।

---

**No. 210.** भ्रमरगीतव्याख्या. Substance, country-made paper, 14×5 inches. Folia 5. Lines, 15 on a page. Extent, 305 çlokas. Character, Nāgara. Date ? Place of deposit, Benares city, Gobinda Bhaṭṭa. Appearance, new. Prose. Correct.

अथ चित्रजल्पः ।

**Beginning.** प्रेष्ठस्य सुहृदालोके गूढ़रोषाभिजृम्भितः ।
भूरिभावमयो जल्पो यत्तीव्रोत्कण्ठितो यमः ॥

चित्रजल्पो दशाङ्गोयं प्रजल्पः परिजल्पितं ।
विजल्पोजल्पसंजल्पा अवजल्पोऽतिजल्पितं ॥
आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्त्तितः ।
एष भ्रमरगीताख्यो दशमे प्रकटीकृतः ।
असंख्यभाववैचित्र्य-चमत्कृतिसुदुस्तरः ॥

End. अत्र प्रथमचरणे आर्जवं। द्वितीये स्वप्रसङ्गानुपस्थापनेन गाम्भीर्य्यं । तृतीये, दैन्यं। चतुर्थे, चापलमुत्कण्ठा च । अत्र चित्रजल्पलपनमाधुर्य्यश्रवणोत्कण्ठया कृष्ण एव भ्रमररूपेण तत्रागत इत्यैश्वर्य्यपक्षीया आहुः ॥

Colophon. इति भ्रमरगीतव्याख्या .

विषयः । उज्ज्वलनीलमन्युक्तरीत्या भ्रमरगीतव्याख्या ।

---

**No. 212.** माध्यन्दिनदक्षिणाद्वारनिर्णयः. By नारायणदेव. Substance, country-made paper, 12×5 inches. Folia, 5. Lines, 10 on a page. Extent, 120 çlokas. Character, Nagara. Date ? Place of deposit, Bibihāṭi. Benares City, Paṇḍit Vāmanācārya. Appearance, new. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

क्षीराम्भोनिधिमध्यगे सुललिते चिन्तामणेरालये ।
गीर्वाणद्रुमवाटिकापरिवृते सिद्धाष्टकेनावृते ।
वैदूर्य्याष्टदलाम्बुजे जनकजायुक्तं बृहत् तारकं,
सानन्दं तदुपास्महे परतरं रामाभिधानं महः ।

End. यद्वा मयात्र लिखितं सदयासद्वा
ग्रन्थान् विलोक्य विविधान् स्वमतानुरूपं ।
माध्यन्दिनीयविबुधा ह्यवलोक्य तत्र
दीने मयि प्रददतु ध्रुवमाशिषोर्घ्याः ।

Colophon. श्रीमच्छुक्लयजुर्वेदान्तर्गतमाध्यन्दिनीयशाखाध्यायि-देवोपाभिधनारायणसूरिकृतो दक्षिणाद्वारनिर्णयः समाप्तः ॥

विषयः । माध्यन्दिनदक्षिणाद्वारे यजुर्वेदीयोभयोः शाखयोः कस्या ग्रहणं इति सन्देहे तन्निरूपणम् ।

---

**No. 213.** मन्त्रकाशीखण्डटीका (मन्त्ररहस्यप्रकाशिका). By नीलकण्ठ. Substance, country-made paper, $14 \times 4\frac{1}{2}$ inches. Folia 17. Lines, 13 on a page. Extent, 850 çlokas. Character, Nāgara Date ? Place of deposit, Benares City, Pandit Gobinda Bhatta. Appearance, new. Prose. Correct.

**Beginning.** विश्वेशं माधवं ढुण्ढिं दण्डपाणिञ्च भैरवं ।
वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकां ॥
प्रतेरथमिति द्वादशर्चं सूक्तं । अथ बृहद्देवताबु-
धेतिहासं प्रतेसूक्तं मन्यते शाकटायनः ।
यास्को द्रौघनमैन्द्रं वा वैश्वदेवन्तु शौनकः ॥

**End.** ततो लब्धज्ञानेनानारब्धकार्य्याणि काश्यां कृतान्यपि पुण्यानि पापानि च नश्यन्ति इतरे तु पुण्यपापे उक्तरीत्या भोगेन क्षपयित्वा कैवल्यमश्नुते । तदेवं काश्यां तनुत्यजो जन्तुमात्रस्य श्रुतिस्मृतिन्यायैः परमानन्द-प्राप्तिर्भवेति सिद्धम् ॥

**Colophon.** इति श्रीमत्पदवाक्यप्रमाणमर्य्यादाधुरन्धरचतुर्धरवंशावतंस-गोविन्दसूरि-सूनोर्नीलकण्ठस्य कृतिः स्वोद्धृतमन्त्रकाशीखण्डव्याख्या रहस्यप्रकाशिकाख्या समाप्तिमगमत् ।

विषयः वेदस्थकाशीविषयकमन्त्राणां व्याख्या.

---

**No. 214.** तन्त्रसारोक्तमन्त्रमुक्तावलीविधिः Substance, yellow foolscap paper, $6 \times 3$ inches. Folia, 24. Lines, 6 on a page. Extent, 575 çlokas. Character, Bengali. Date ? Place of deposit, Upalatāgrām Post Meher, Zilla Comilla, Pandit Jagadbandhu Tarkavāgīs. Appearance, fresh. Prose and verse. Correct.

**Beginning.** ॐ नमो गणेशाय । ॐ नमः शिवाय ।
अथ तन्त्रसारोक्तमन्त्रमुक्तावलीविधिः ।
तत्र प्रथमं भुवनेश्वरीमन्त्राः । ह्रीँ ऐँ क्रीँ ऐँ ऐँ ह्रीँ श्रीँ । श्राँ ह्रीँ क्रीँ ॥ अथान्नपूर्णा मन्त्राः ह्रीँ नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा । ॐ नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा । ॐ नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा । ॐ नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा । ॐ ह्रीँ नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा । ह्रीँ श्रीँ नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा ॥ इत्यादि ।

End. अघादर्शनमन्त्राः। ॐ ह्रूँ फट् कालि कालि मांसशोणितरक्तं खादय देव मापश्यतु माद्दति ह्रूँ फट् स्वाहा। स्तम्भिनि अमुकस्य मनः स्तम्भय स्तम्भय ऊँ फट्।

Colophon. इति तन्त्रसारोक्तमन्त्राः। ॐ नमो गुरवे।

विषयः भुवनेश्वरीमन्त्राः। अन्नपूर्णामन्त्राः। त्रिपुरामन्त्राः। अदूरितामन्त्राः। महिषमर्द्दिनीमन्त्राः। जयदुर्गामन्त्राः। श्रीमन्त्राः। हरिद्रागणेशमन्त्राः। सूर्य्यमन्त्राः। अग्निमन्त्राः। विष्णुमन्त्राः। रामचन्द्रमन्त्राः। वासुदेवमन्त्राः। नृसिंहमन्त्राः। वराहमन्त्राः। कृष्णमन्त्राः। शिवमन्त्राः। क्षेत्रपालमन्त्राः। भैरवमन्त्राः। भद्रकाल्यादीनां मन्त्राः। चौरसाधनादिमन्त्राः। मारणवशीकरणोच्चाटनादिमन्त्राः॥ अदर्शनमन्त्राश्चेति कतिपयमन्त्राणां सङ्ग्रहः।

---

**No. 215. मन्त्ररामायणम्.** Substance, country-made paper, 14 × 4½ inches. Folia, 43. Lines, 2 on a page. Extent, 146 çlokas. Character, Nāgara. Date ? Place of deposit, Benares City, Gobinda Bhaṭṭa. Appearance, new. Verse. Correct.

Beginning. शिरो मे राघवः पातु भालं दशरथात्मजः।
कौशल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती॥ १।
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः,
जिह्वां विद्यानिधिः पातु कण्ठं भरतवन्दितः। २।
स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेशकार्म्मुकः
करौ सीतापतिः पातु हृदयं जामदग्न्यजित्। ३।
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः,
सुग्रीवेशः कटिं पातु सक्थिनी हनूमत्प्रभुः। ४।
जानुनी सेतुकृत् पातु जङ्घे दशमुखान्तकः।
पादौ विभीषणश्रीदः पातु रामोखिलं वपुः। ६।

End. नावा न क्षोदः प्रदिशः पृथिव्याः स्वस्तिभिरतिदुर्गाणि विश्वा,
स्वां प्रजां बृहदुक्थो महित्वावरेष्वदधदापरेषु।

Colophon. × × × × ×

विषयः। प्रथमतो रामरक्षास्तोत्रं ततो वेदस्थरामविषयकमन्त्राः।

---

**No. 216.** मन्त्ररामायणव्याख्या (मन्त्ररहस्यप्रकाशिका). By नीलकण्ठ. Substance, country-made paper, 11 × 2½ inches. Folia, 43. Lines, 12 on a page. Extent, 1,545 çlokas. Character, Nāgara. Date ? Place of deposit, Benares City, Gobinda Bhaṭṭa. Appearance, new. Prose. Correct.

**Beginning.** रामायणं द्रुमं नौमि रामरक्षा नवाङ्कुरं ।
गायत्री वीजमाम्नायं मूलं मोक्षो महाफलं ॥
अत्र रामरक्षायाः रामायणद्रुमाङ्कुरत्वं स्पष्टमवगम्यते, तत्स्थानां राघवादिपदानां क्रमेण रामायणार्थसूचकत्वात्, तस्याः गायत्रीवीजत्वं वेदमूलत्वं चोपपादनीयं तेन रामायणस्यापि तदुभयं सिध्यति ।

**End.** लक्षणार्थ्यपरतां गिरामिमां लक्षणार्थ्यपुरुषेण दर्शितां ।
साङ्गवेदपदवाक्यमानवित् कोपि वीक्ष्य सुमतिः प्रमोदतां ॥
श्रीरामरक्षाव्याख्यानं मन्त्ररामायणाभिधं ।
व्याख्यान्तराद्यन्तरेण प्रीयतां करुणानिधिः ॥
दर्शितः शीतयाध्वायं वेदारण्ये निरध्वनि ।
सन्तो विपुल × × × यास्कभाष्यानुयायिनः ॥

**Colophon.** इति श्रीमत्-पदवाक्यप्रमाणमर्य्यादाधुरन्धरचतुर्द्धरवंशावतंस-गोविन्दसूरिसूनोः श्रीनीलकण्ठस्य कृतिः स्तोद्धृतमन्त्ररामायणव्याख्या मन्त्ररहस्यप्रकाशिकाख्या समाप्तिमगमत् ॥

विषयः । मन्त्ररामायणव्याख्या.

---

**No. 217.** मन्त्राभिधानं. By यदुनन्दनभट्टाचार्य्य. Substance, country-made paper, 14 × 4½ inches. Folia, 9. Lines, 7 on a page. Extent, 180 çlokas. Character, Bengali. Date ? Place of deposit, Dinajpura, Kālāpāḍā, P. O. Rājārampura, Paṇḍit Sitānātha Bhaṭṭācāryya. Appearance, old. Verse. Correct.

**Beginning.** ॐ श्रीरामः ॥
प्रणम्यादौ महामायां सृष्टिस्थित्यन्तकारिणीं ।
मन्त्राभिधानं क्रियते यदुनन्दनशर्म्मणा ॥ ॐ कारः ।
ॐ कारं वर्त्तुलं तारं वामञ्च? हंसः कारणं ।
मन्त्राद्यः प्रणवः सत्यं विन्दुशक्तिस्त्रिदैवतं ॥ इत्यादि

**End.** ह्रूं क्रोधाख्योहं तनुत्रञ्च शल्दो रिपुसंज्ञकः ।

वौषट् । नेत्रयुग्मं तथा वौषट् ग्रवुद्दैवतमेवच ।
फट् । ग्रस्त्राख्तो फट् कोटिका स्यादङ्गान्तेऽमरवाचकः ॥

Colophon. इति यदुनन्दनभट्टाचार्य्यविरचितं मन्त्राभिधानं समाप्तं ॥

विषयः । ॐ कारस्य देवताकथनं । तथा अकारादिमातृकावर्णादीनां दैवतार्थकथनं ।

---

No. 218. मन्दारमञ्जरी (तत्त्वप्रकाशिकाव्याख्या). By व्यास-यति. Substance, country-made paper, 15 × 4 inches. Folia 40. Lines, 11 on a page. Extent, 1200 çlokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi, Benares City. Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. श्रीवेदव्यासाय नमः ।
लक्ष्मीकरतलाम्भोजलालनीयपदाम्बुजं
प्रणमामि हयग्रीवं देवताचक्रवर्त्तिनं ॥
श्रीमदानन्दतीर्थार्य्यचरणाम्बुरुहं स्वयं
शिवेन्द्रादिशिरोभूषामादरादभिवादये ॥

End. हयग्रीवपदाम्भोजनखदीधितिचन्द्रिकां
मनश्चकोर संसारसंतप्त सततं पिव ॥

Colophon. इति श्रीलक्ष्मीनारायणाख्ययतिकुलतिलकादधीतमाध्वशास्त्रमतेन व्यास-यतिना विरचिता मन्दारमञ्जरी तत्त्वप्रकाशिकाव्याख्या समाप्ता ।

विषयः । माध्वतत्त्वप्रकाशिकाव्याख्या ।

---

No. 219. मन्मथसंहिता. Substances, country-made paper, 7 × 3 inches. Folia, 7. Lines, 15 on a page. Extent, 200 çlokas. Character, Nāgara. Date ? Palce of deposit, Calcutta Visvakoṣa Office, Babu Nagendranāth Vasu. Appearance, new. Verse. Incorrect.

Beginning. श्रीगणेशाय नमः ।
एकदा सुखमासीनं मन्मथं जगतां पतिं ।
रतिः पप्रच्छ धर्म्मिष्ठा सर्व्वलोकहितेरता ॥
किमत्रसारं संसारे तन्मे वद सुरोत्तम ।

End. धनधान्यधरायुक्तो यशस्वी ज्ञानसंयुतः ।
तपस्वी राज्यपूज्यश्च संहिताश्रवणाद्भवेत् ॥

**Colophon.** इति श्रीमन्मथसंहितायां फाल्गुणमाहात्म्ये पञ्चमोऽध्यायः समाप्तश्चायं ग्रन्थः ॥

विषयः । रतिमदनसम्भाषणमुखेन मैथुनप्रकारभेदकालाकालादिनिरूपणं ॥

---

**No. 220.** महाभागवतपुराणं. Substance, country-made paper, 13 × 4½ inches. Folia, 178. Lines, 10 on a page. Extent, 5300 çlokas. Character, Bengali. Date of writing S.K. 1734. Place of deposit, Upalatāgrām Post Meher, Zilla Comilla, Paṇḍit Jagadbandhu Tarkāvagīs. Appearance, fresh. Verse. Generally correct.

**Beginning.** ॐ नमो दुर्गायै ।

यामाराध्य विरिञ्चिरस्य जगतः स्रष्टा हरिः पालकः
संहर्त्ता गिरिशः स्वयं समभवद्ध्येया च या योगिभिः ॥
यामाद्यां प्रकृतिं वदन्ति मुनयस्तत्वार्थविज्ञाः परां
तां देवीं प्रणमामि विश्वजननीं स्वर्गापवर्गप्रदां ॥

एकदा नैमिषारण्ये शौनकाद्या महर्षयः ।
पप्रच्छुर्मुनिशार्द्दूलं सूतं वेदविदांवरं ॥
व्यासशिष्य महाप्राज्ञ सर्व्ववेदविदां वर ।
पुराणं साम्प्रतं ब्रूहि स्वर्गमोक्षसुखप्रदं ॥

सूत उवाच ।

यदुक्तं श्रीमहेशेन नारदाय महात्मने ।
पुराणं परमं गुह्यं महाभागवताह्वयं ॥
यदाह भगवान् व्यासः श्रद्धया भक्तिशालिने ।
स्वयं जैमिनये पूर्व्वं पुनस्तद् वो ब्रवीम्यहं ॥ इत्यादि ।

**End.** य इदं परमाख्यानं श्रावयेद् द्विजसन्निधौ ।
सद्भक्त्या जैमिने तस्य पापं नश्यति तत्क्षणात् ॥
अप्यनेकशतं कोटिजन्मान्तरसुसञ्चितं ।
एतदन्यच्च मुने पापं मोक्षमवाप्नुयात् ॥ ?

**Colophon.** इति श्रीमहाभागवते महापुराणे एकाशीतितमोध्यायः समाप्तः सौर चैत्रस्य त्रिंशद्दिवसे भृगुवासरे कृष्णपक्षीयचतुर्द्दश्यान्तिथौ षष्ठदण्डसमये समाप्तेयं पुस्तिका । श्रीघनश्यामशर्म्मणः स्वाक्षरम् । शकातीताब्दाः । १७३४ ।

विषयः। इति श्रीमहाभागवते महापुराणे महाभागवतप्रकाशनं नाम प्रथमोऽध्यायः। इति श्रीमहाभागवते महापुराणे द्वितीयोध्यायः। ३। ४। ५। ६। ७। ८। इति श्रीछायासत्यग्निप्रवेशः। ९ इति श्री— १०। ११। १२। १३। १४। इति श्रीमहाभागवते महापुराणे श्रीभगवतीगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे शिवनारद-संवादे। १५। इति श्रीपार्व्वतीहिमालयसंवादे। १६। इति श्रीभगवतीगीतासूप-निषत्सु। १७। इति श्रीशिवनारदसंवादे। १८। इति श्रीभगवतीगीतासमाप्तिर्नाम। १९। इति श्री— २०। २१। २२। २३। २४। २५। २६। २७। २८। २९। इति श्रीकार्त्तिकेयजन्मकथनं नाम। ३०। इति श्रीतारकासुरसंवादे कार्त्तिकेयसमागमो नाम ३१। इति श्री— ३२। इति श्रीतारकवधो नाम। ३३ ३४। इति श्री— ३५। ६० इति श्रीमहाकालीदर्शने। ६१। इति श्री—६२। इति श्रीकालीप्रसङ्गसमाप्तिर्नाम। ६३। इति श्रीशिवगानप्रसङ्गो नाम। ६४। इति श्रीवामनोपाख्याने। ६५। इति श्रीशिवसहस्रनाम-स्तोत्रं समाप्तं। ०। इति श्री— ६९। ७०। इति श्री गङ्गामाहात्म्यं। ७१। ७२। इति श्रीगङ्गामाहात्म्यं। ७४। ७५ इति श्रीकामाख्यामहात्म्यं नाम। ७६। इति श्री— ७७। इति श्रीकामाख्यामाहात्म्यं नाम। ७८। इति श्रीतुलसीमाहात्म्यं नाम। ७९। इति श्रीरुद्राक्षमाहात्म्यं नाम। ८०। इति श्रीमहाभागवते महापुराणे एकाशीतितमो-ऽध्यायः। ८१।

---

No. 221. महाभारतसारः, (ज्ञानचन्द्रोदयः). By रामचन्द्र. Substance, country-made paper, $12 \times 3\frac{1}{2}$ inches. Folia, 28. Lines, 10 on a page. Extent, 850 çlokas. Character, Bengali. Date ? Place of deposit, Dinajpura, Paṇḍit Kṛṣṇadāsa Smṛtibhūṣaṇa. Appearance, tolerable. Verse. Incorrect.

Beginning. ॐ नमः परमदेवतायै॥

ढुण्ढिराजं प्रणम्यादावन्नपूर्णां सुरेश्वरीं।
विश्वेश्वरं विश्ववन्द्यं कालभैरवमेव च॥
दण्डपाणिं महादेवीमाद्यामाराध्य भक्तितः।
अविमुक्ते महाक्षेत्रे जन्तूनां मुक्तिदायके॥
महाराजश्रीभवान्या स्थापितां परदेवतां।
महाकालीं महामायां महादेवीपरिस्थिताम्॥
क्रियते रामचन्द्रेण श्रीमता ब्राह्मणेन वै।
महाभारतसारोऽयं ज्ञानचन्द्रोदयाभिधः॥

दैवसंकीर्त्तनं पूर्व्वं ततो धर्म्मप्रशंसनं ।

\+ \+ \+ \+ ॥

ततश्च मानसं तीर्थं संसारकूपवर्णनं ।

भारतस्थमिदं सर्व्वं ग्रन्थेऽस्मिन् लिख्यते मया ॥ इत्यादि ।

**End.** प्रभवादद्भुताद्भूमेः सलिलस्य च तेजसः ।

परिग्रहान् मुनीनाञ्च तीर्थानां पुण्यता स्मृता ॥

तस्मात् भौमेषु तीर्थेषु मानसेषु च नित्यशः ।

उभयेषु च यः स्नाति स याति परमां गतिं ॥

**Colophon.** इति श्रीमहाभारते मानसतीर्थवर्णनं । अतः परं खण्डितं ।

विषयः । दैवसङ्कीर्त्तन । धर्म्मप्रशंसनं । धनवैराग्यकथनं । स्त्रीवैराग्यकथनं । स्त्रीस्वभाव निरूपणं । शोकापनोदनकथनं । दानधर्म्ममोक्षधर्म्मादिनिरूपणं । शिवभक्तिकथनं । गङ्गामानस-तीर्थमाहात्म्यकथनं ॥

---

**No. 222.** महालक्ष्मीव्रतकथा (भविष्यपुराणोक्ता). Substance, country-made paper, 13 × 3 inches. Folia, 7. Lines, 7 on a page. Extent, 145 çlokas. Character, Bengali. Date S. K. 1709. Place of deposit, Dacca Sonārgā̃ Kṛṣṇapura, Paṇḍit Śaratcandra Bhaṭṭācāryya. Appearance, old. Verse. Generally correct.

**Beginning.** श्रीकृष्ण उवाच ।

शृणु राजन् कथां दिव्यां सर्व्वपापप्रणाशिनीं ।

यां श्रुत्वा लभते चायुर्धर्म्मपुत्र युधिष्ठिर ॥

युधिष्ठिर उवाच ।

स्थानलाभपुत्रायुःसर्व्वैश्वर्य्यसुखप्रदं ।

व्रतमेकं ममाचक्ष्व विचार्य्य पुरुषोत्तम ॥

श्रीकृष्ण उवाच ।

दुर्व्वारवृत्रदैत्येन परित्याप्ते त्रिपिष्टपे ।

एतदेव कृतस्यादौ देवेन्द्रं प्राह नारदः ॥

**End.** व्रतमिदमथ चक्रे नारदेनोपदिष्टं

सुरपतिरपि यस्माद् वाञ्छितार्थन्तु लेभे ।

त्वमपि कुरु तदेतद्धर्म्मसूनो यथास्या-

दभिमतफलसिद्धिः पुत्रपौत्रादिवृद्धिः ॥

Colophon. इति भविष्यपुराणोक्तमहालक्ष्मीव्रतकथा समाप्ता ।
शुभमस्तु शकाब्दाः । १७०९ ।

विषयः । महालक्ष्मीव्रतानुष्ठानफलकथनम् ।

---

No. 223. "महावीरचरित्रस्य बालबोधः". Substance, country-made paper, 12 × 5 inches. Folia, 7. Lines, 17 on a page. Extent, 350 çlokas. Character, Nāgara. Date Saṃvat 1762. Place of deposit, Benares City, Dikmaṇḍalācāryya Mahārāja Bālacandra Sūri. Appearance, old. Verse. Correct.

Beginning. दुरियवयसमीरं मोहपङ्कानीरं
पणमिय जिनवीरं + + + + ।
नङ्गवीरं भवत पड़िकुलंभ्यस्य सुक्खानुकूलं
धरिय+ +समूलं किंचि किन्नेमि+ +लं ॥

End. हे जिन सदा सदा तुम्हने वालह चत्ययो
ननहारापगना हि विषद सुसदा प्रणाम कुञ्जो ॥

Colophon. इति श्रीमहावीरचरित्रस्य बालबोधः समाप्तः । संवत् १९६२ ।

विषयः । गुर्जरभाषायां महावीरचरित्रवर्णनम् ।

---

No. 224. महाशान्तिकल्पः. Substance, country-made paper, 8 × 3 inches. Folia, 8. Lines, 8 on a page. Extent, 112 çlokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi, Benares City. Paṇḍit Vāmanācārya. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशाय नमः ॥
अथ महाशान्तिकल्पः ।
ॐ महाशान्तिं प्रवक्ष्यामि यां प्राप्य महतीं श्रियं ।
ब्राह्मणः क्षत्रियो वापि वैश्यो वा + + सज्जति ॥

End. एतद्ब्राह्मणामातिथ्यं कुर्य्यात् संवत्सरादपि ।
आरोग्यबलसंपन्नो जीवेच्च शरदां शतम् ॥

Colophon. इति महाशान्तिकल्पे पूर्व्वार्द्धं समाप्तम् ।

विषयः । महाशान्तिविधिः ।

---

No. 225. महिम्नः स्तवटीका (कौमुदीनाम्नी) By वाचस्पति. Substance, country-made paper, 13 × 3½ inches. Folia, 13. Lines, 8 on a page. Extent, 300 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garbeta, Gram Bhaṭṭagrāma, Rāmahṛidaya Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीदुर्गायै नमः ।

प्रणम्य गिरिजानाथं संसाराम्भोनिधौ वरं ।
व्याख्यां महिम्नः स्तोत्रस्य करवाणि यथामति ॥
विद्वन्मनःकुमुद्विनी × × भर्त्तृसमाश्रिता ।
वाचस्पतिकृता व्याख्याकौमुद्यस्तु सदा मुदे ॥
तिष्ठन्ति यदि सन्त्याश्रितकृता व्याख्याः परात्परं ।
तासां सारं समाहृत्य द्विधेदानीं प्रतन्यते ॥
महिम्न इत्यादि । इत्यादि ।

End. कुसुमदशनेत्यादि — टीकाकारैरव्याख्यातमपि व्याख्यायते शिशुशशधरोऽर्द्धचन्द्रो मौलौ यस्य गुरुर्महान् निजोऽसाधारणो महिमा यस्य तस्य देवस्य दासः सेवकः सर्व्वेषां गन्धर्व्वाणां राजा सिद्धेति पाठे सिद्धानां गन्धर्व्वाणाञ्च राजा सिद्धश्चासौ गन्धर्व्वराजश्चेति वा कुसुमदशनः पुष्पदन्तो नाम यस्य स एतादृशो यः सोऽस्य देवदेवस्य रोषात् भ्रष्ट एव दिव्यादपि दिव्यं यस्य महिम्नः स्तवनमिदमकार्षीदिति ।

Colophon. इति महिम्नः स्तोत्रटीका समाप्ता ।

नानावेदपुराणशास्त्रजनितज्ञानाद् दृढप्रत्यय-
स्तस्मात् वै हरितो हरस्य च मिथो भेदानभिज्ञो यदा ।
तद्दैकोक्त्या कृतिकुसुमदन्तोऽपि च महान्
कृतं सर्व्वस्यैव स्तवनमिदममोघं परमदं ॥
श्रीदुर्गा । लिपिरियं श्रीव्रजकिशोरदेवशर्म्मणः पुस्तिका च ।
वाल्मीकिः सनकः सनन्दनमुनिर्व्यासो वशिष्ठो भृगु-
र्जावालिर्ज्जमदग्निजह्नुजनका गर्गस्तथा गौतमः ।

मान्धाता नृपतिस्तथैव सगरो वैण्यो दिलीपो नलः
पुण्यो धर्म्मसुतो ययातिनहुषौ कुर्व्वन्तु ते मङ्गलम् ॥

विषयः । शिवमहिमस्तोत्र-व्याख्यानं ।

---

No. 226. महिम्नःस्तुति-टीका By मधुसुदनसरस्वती. Substance country-made paper, 16×2 inches. Folia, 65. Lines, 4 on a page. Extent, 1000 çlokas. Character, Bengali. Date S.K. 1629. Place of deposit, Dinājpura, Babu Girisacandra Cakravarti, Pleader. Appearance very old. Prose. Correct.

Beginning. ॐ नमो हरिहराभ्याम् ॥

विश्वेश्वरं गुरुं नत्वा महिमाख्यस्तुतेरयं ।
पूर्व्वाचार्य्यकृतव्याख्यासंग्रहः क्रियते मया ।
कश्चित् किल गन्धर्व्वराजः + + + शिव निर्म्माल्यलङ्घनेन मत्पुष्प-चौरस्य सन्मार्गनादिका सर्व्वापि शक्तिर्विनंक्ष्यति इत्यभिप्रायेण राज्ञा शिवनिर्म्माल्यं पथि निक्षिप्तं ॥ इत्यादि ।

End. इत्थं श्रीमद्गुरोः पादपद्मं नत्वा कृता मया ।
\+ + + + +
भूतिभूषितदेहाय द्विजराजेन राजते ॥
एकात्मने नमो नित्यं हरये च हराय च ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्य-श्रीविश्वेश्वरचरणारविन्दमधुव्रत-श्रीमधुसूदनसरस्वतीविरचिता महिमाख्यस्तुतिव्याख्या समाप्ता ॥ श्रीरस्तु ।
शकाब्दा १६२९ ॥

विषयः । महिम्नः स्तुतेर्व्याख्यानं ॥

---

No. 227. मातृकानिर्घण्टुः By आचार्य्य. Substance, country-made paper, 8×5 inches. Folia, 7. Lines, 11 on a page. Extent, 200 çlokas. Character, Nāgara. Date ? Place of deposit, Ṭikāri, District Gayā Paṇḍit Mahāvīraprasād. Appearance, tolerable. Verse. Correct.

Beginning. श्रीगणेशाय नमः ॥

श्रीनृसिंहं गणेशानं भारतीमीश्वरीं शिवां ।
नत्वा वक्ष्ये मातृकाया निघण्टुं बालबोधये ॥ ?

End. नन्दी च परमात्मा च सम्वर्त्तकव्रतान्तकौ ।
वज्रकायो ऽव्ययो व्यापी न्टसिंहः चार्णकः स्मृतः ॥
मातृकाया निघण्टोऽयं कण्ठपीठे निधाप्यतां ।
विस्फोटनाय मन्त्राणां सलिले पण्डिता जनाः ॥
शरीरे सर्व्वमन्त्राणामुद्धाराय सुबुद्धिभिः ।

Colophon. इति श्रीमद्देशिकमण्डलीमुकुटमाणिक्योपमपरमहंस-श्रीमदाचार्य्यविरचितो मातृकानिघण्टुः समाप्तः ॥

विषयः । मातृकाबीजादिनिरूपणं ॥

---

No. 228. माध्वमन्त्रार्थमञ्जरी By नारायण. Substance, country-made paper, 10×5 inches. Folia, 98. Lines, 10 on a page. Extent, 3200 çlokas. Character, Nāgara. Date Saṃvat 1689. Place of deposit, Ṭikāri, Paṇḍit Vāmācāri Shastri. Appearance, tolerable. Prose. Incorrect.

Beginning. श्रीगणेशाय नमः ॥

श्रीमदानन्दविज्ञानतीर्थतीर्थो जगद्गुरुः ।
श्रीमदानन्दतीर्थार्य्यः सतीर्थयतु मे मनः ॥
येनावतीर्य्य भुवि सर्व्वपुराणवेद-
सद्भारतादिनिगमान् बहुधा विचार्य्य ।
सद्ब्रह्मसूत्रगदितैः सुनयैस्तदीय-
तात्पर्य्यनिर्णयपरिग्रथनं व्यधायि ॥
निजनिजग्रन्थेनिजग्रन्थे च तत्र सः ?
मानं सूक्तानि जग्राह निजग्राह च तैः खलान् ।
तेषामर्थं निजैः श्लोकै र्लेशेनानुवदन् प्रभुः ।
तत्रैव चरमेऽध्याये स्वयं व्याख्यामसूचयत् ॥
यदीयवाक्तरङ्गाणां विप्रुषो विदुषां गिरः ॥
जयति श्रीधरावासो जयतीर्थपयोनिधिः ।
वेदव्यासगुरोः पादपद्मपोतावलम्बनात् ॥
तरिष्यामि निरातङ्को गहनं सूक्तसागरं ।
सूक्तानि तानि गहनार्थयुतान्यपीह
श्रीपूर्णबोधकरुणोदितशुद्धबुद्धिः ।

प्रीत्यै हरेरथ गुरोरपि वैश्वनाथि-
र्नारायणः प्रविदधातीति यथामनीषं ॥
अज्ञानाद्वा प्रमादाद्वा यच्च + + + चापलं
तद्भक्तकरुणासिन्धु + + + गुरुर्मम ॥ इत्यादि ।

**End.** प्राणातिरिक्तमरुतान्तु एकोनपञ्चाशत्संख्योपेतत्वात् यतित्वमनुपपन्नं यद्वा निर्धारणे षष्ठी जात्यभिप्रायेणैकवचनं । ततश्च + + + देवानां मध्ये अस्मान् ये बर्द्धयन्ति ते एत एव । सर्व्वेषु देवेषु + + + श्रेष्ठास्तेष्वपि सर्व्वाधिकारिणां ज्ञानादिदानेनातिदृढिकरा ये मुख्यप्राणरूपा मरुतस्ते यूयं नः अस्मान् स्वस्तिभिः परममङ्गलप्रदानैः सदा पालयतेत्यर्थः ॥ * ॥

**Colophon.** इति नारायणेनेह गुरुपूजार्थमुद्धृता ।
श्रुतिकल्पतरोर्भूयान्मध्वमन्त्रार्थमञ्जरी ॥ श्रीवेदव्यासाय नमः ॥
संवत् १९८९ ॥

विषयः । महाभारततात्पर्य्यप्रतिपादकसूक्तादीनां व्याख्यानं तथा प्रथमादिमाध्वमतीय-सूक्तादीनां व्याख्यानञ्च ॥

---

**No. 229.** माध्वानां पूजापद्धतिः By सत्यबोधार्य्यशिष्य. Substance, country-made paper, 11 × 4½ inches. Folia, 24. Lines, 9 on a page. Extent, 432 çlokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi, Benares City. Paṇḍit Vāmanācārya. Appearance, new. Prose. Correct.

**Beginning.** श्रीरामचन्द्राय नमः ॥

प्रणम्य रमणं लक्ष्म्याः पूर्णबोधादिसद्गुरून् ।
यथामति हरेः पूजापद्धतिः क्रियते मया ॥
वेदव्यासोक्तिमालोच्य पूर्णप्रज्ञेन यत्कृतं ।
तन्त्रसारे तु तत्सर्व्वं मया संगृह्यतेऽधुना ॥

**End.** सत्यबोधार्य्यशिष्येण संगृहीतेयमादरात् ।
पूजायाः पद्धतिं कुर्य्यात् प्रीत्यै माधवमाध्वयोः ॥

Colophon. इति पूजापद्धतिः समाप्ता ।

विषयः । माध्वमते वैष्णवानां पूजाविधिः ।

---

No. 230. मासनिर्णयः By भट्टोजि दीक्षित. Substance, country-made paper, 8×3 inches. Folia, 34. Lines, 9 on a page. Extent, 578 çlokas. Character, Nāgara. Date Saṃvat 1778. Place of depoist, Bibihāṭi, Benares City. Paṇḍit Vāmanācārya. Appearance, old. Prose and verse. Correct.

Beginning. श्रीमद्गणाधिपतये नमः ॥

ओम् । चैत्रशुक्लप्रतिपदि वत्सरारम्भः ।

तत्र औदयिकी तिथिर्ग्राह्या,

चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि ।

शुक्लपक्षे समग्रं तु तदा सूर्य्योदये सतीति ॥ हेमाद्रौ ब्रह्मोक्तेः । इत्यादि ॥

End. अमासोमेन भौमेन रविणा गुरुणा तथा ।

योगोयं पद्मको नाम सूर्य्यपर्व्वशताधिकः ॥ इति दिक् ॥

Colophon. इति श्रीभट्टोजिदीक्षितविरचितो मासनिर्णयः । संवत् १७७८ ।

मगधदेशान्तर्गतपट्टनग्रामे लिखितम् ।

विषयः । मासतिथ्यादीनाम् निर्णयः ।

---

No. 231. माहेश्वरकवचम्. Substance, country-made paper, 16×3½ inches. Folia, 4. Lines, 7 on a page. Extent, 84 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur Post Candrakoṇā, Ayodhyā Raghunāthvāṭi Babu Cakrapāṇi Rāya. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमः शिवाय ॥

राजोवाच ।

अङ्गन्यासं यदुक्तं भो महेशाक्षरसंयुतं ।

विधानं कीदृशन्तस्य कर्त्तव्यं केन हेतुना ।

तदद्य महाप्राज्ञ विस्तरेण ममाप्रतः ॥

भृगुरुवाच ।

माहेशं कवचं राजन् देवैरपि सुदुर्लभं ।

यः करोति स्वगात्रेषु स पूतात्मा भवेन्नरः ॥ इत्यादि ।

**End.** तस्मान्माहेश्वरं नाम कवचं सुरगणार्च्चितं ।

श्रोतव्यं पठितं नित्यं सततं भाग्यप्रदं ॥

माहेशं कवचञ्चैतत् सर्व्वव्याधिविनाशकं ।

यः करोति नरो नित्यं स व्रजेत् शाङ्करं पुरम् ॥

**Colophon.** इति शकुन्तलाभरतभृगुसंवादे कर्म्मविपाके माहेश्वरकवचं समाप्तं ॥

विषयः । महेश्वरस्य कवचकथनम् ॥

---

**No. 232.** मुक्तिचिन्तामणिः By गजपतिपुरुषोत्तमदेव. Substance, country-made paper, 9×4 inches. Folia, 46. Lines, 8 on a page. Extent, 860 çlokas. Character, Nāgara. Date ? Place of deposit, Ṭikāri, District Gaya, Paṇḍit Mahāvīraprasād Misra. Appearance, old. Verse. Incorrect.

**Beginning.** श्रीजगन्नाथाय नमः ॥

नीलाद्रौ तन्नदर्थिभ्यो दातुमर्थचतुष्टयं ।

स्थह × नेत्रपद्वीं × × × स्वं हरिं नुमः ॥

वायुपुराणे,—

**End.** शुष्कं पर्य्युषितं वापि नीतं वा दूरदेशतः ।

दुर्जनेनापि संस्पृष्टं सर्व्वथैवाघनाशनं ॥ * ॥

**Colophon.** इति श्रीगजपतिश्रीपुरुषोत्तमदेवेन संगृह्य विरचितो मुक्तिचिन्तामणिर्नाम ग्रन्थः समाप्तः ।

विषयः । पुरुषोत्तममाहात्म्यादिकथनम् ।

---

**No. 233.** मुक्तिवादार्थः By गदाधरः. Substance, country-made paper, 18×3½ inches. Folia, 14. Lines, 7 on a page. Extent, 500 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur Post Garvetā Grām Telivani, Paṇḍit Bagavatīcharaṇa Smṛtitīrtha. Appearance, fresh. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।

प्रयोजनमुद्दिश्यैव पुमांसस्तदुपाये प्रवर्त्तन्ते अतः शास्त्रस्य प्रथमतः प्रयोजनं दर्शयन्ति शास्त्रकृतः, तत्र स्वतः प्रयोजनं सुखं तद्भोगो दुःखाभावश्च तत्त्वञ्च अन्येच्छाधीनेच्छाविषयत्वं न तु प्रयोजनान्तरजनकत्वे सति प्रयोजनत्वं सुख-साक्षात्काररूपभोगं प्रति विषयतया जनके सुखेऽव्याप्तेः गौणप्रयोजनत्वं अन्ये-च्छाधीनेच्छाविषयत्वञ्च भोजनादेस्तत्र सुखादिरूपफलानुसन्धानादेवेत्यादि ॥

End. उत्तरवाक्यस्थेनापि वाकारेण पूर्व्वकल्पव्यवच्छेदसाहित्यस्य उत्तरकल्पे, उत्तरकल्पव्यवच्छेदसाहित्यस्यापि पूर्व्वकल्पे बोध इतिव्युत्पत्तेः व्रीहिभिर्यजेत यवैर्वा इत्यादावपि व्रीह्यादौ यवसाहित्यबोधस्यापि व्युत्पत्तिसिद्धत्वात् इत्यन्यत्र विस्तरः ।

Colophon. इति गदाधरभट्टाचार्य्यविरचितमुक्तिवादार्थः सम्पूर्णः ॥ श्रीश्रीरामः शरणं ।

विषयः । सायुज्यादिभेदेन मुक्तेर्निरूपणम् ॥

---

No. 234. मुमुर्षुम्तकृत्यादिपद्धतिः By शङ्कर शर्म्मा. Substance, palm leaves, 10 × 1½ inches. Folia, 37. Lines, 3 on a page. Extent, 500 çlokas. Character, Bengali. Date ? Place of deposit, Grām Bhādughar, Post Brāhmanberiā, Zilla Comilla, Paṇḍit Amara Candra Nyāyaratna. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. ॐ नमो गणेशाय ॥

नत्वेशं कृत्यनिष्ठानां मुदे शङ्करशर्म्मणा ।
मुमुर्षुम्तकृत्यादिपद्धतिः सव्यवस्थिका ॥
तन्यते तु व्यवस्थादावनुकृत्य निदेशनं ।
स्मार्त्तानुसारिणी ज्ञेया विद्वद्भिरपि तादृशैः ॥

तत्रादौ मुमुर्षुकृत्यं ।

शुद्धितत्वे हारीतः ।
शूद्रान्नेन तु भुक्तेन उदरस्थेन यो म्तः ।
स वै खरत्वमुष्ट्रत्वं शूद्रत्वञ्चाधिगच्छति ॥ इत्यादि ।

End. विष्णुधर्म्मोत्तरे ।
यस्योपयोगि यद् द्रव्यं देयं तस्यैव तद्भवेत् ॥

यमोद्दिश्य पात्रसमीचे दानं तत्र तन्नामगोत्रोच्चारणपूर्व्वकं प्रतिग्रहीतुर्हस्ते जलं दद्यात् स्वीकारात् पूर्वं दक्षिणा ।

**Colophon.** ( अतःपरं खण्डितं ) ।

विषयः । मृतस्य मुमुर्षोश्च कर्त्तव्यनिरूपणम् । तत्रादौ मुमुर्षुकृत्यं । मृतसंस्कारविधानम् । सहगमनव्यवस्था-पर्य्यन्तरदाहविधिकथनम् । अशौचान्तदिनकृत्यादिनिरूपणम् । दानपद्धतिः ।

---

**No. 235.** मुरलीचन्द्रिकागुञ्जमालाप्रादुर्भावः. Substance, country-made paper, 15 × 5 inches. Folia, 2. Lines, 10 on a page. Extent, 55 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Candrakoṇā, Grām Ayodhyā Raghunāthvāṭi, Babu Cakrapāṇi Rāya. Appearance, old. Verse. Generally correct.

**Beginning.** श्रीराधाकृष्णाभ्यां नमः ॥

यस्य स्मरणमात्रेण नरो याति निरापदं ।
श्रीकृष्णे लभते भक्तिं तं नमामि जगद्गुरुं ॥
श्रीनारद उवाच ।
मुरली केन तपसा प्राप्ता कृष्णं जगत्पतिं ।
या करोति सदा कृष्णमुखाम्भोरुहचुम्बनम् ॥ इत्यादि ।

**End.** इत्येतत्कथितं पुत्र तत्त्वं परमशोभनं ।
गोपनीयं प्रयत्नेन न देयं यस्य कस्यचित् ॥
सर्व्वारिष्टप्रशमनं जगदानन्दकारणं ।
सर्व्वसम्पत्करं तत्त्वं प्रेमभक्तिप्रदायकम् ॥
एतज्जानाति यस्तत्त्वं जीवन्मुक्तो भवेद्धि सः ।
यस्मिन् गृहे विलिखितमेतत् तिष्ठति नित्यशः ।
तत्र कृष्णो जगन्नाथः सर्व्वदुःखनिवारकः ॥
तत् तस्य मननादेव शोकातीतो भवेन्नरः ।
ऋणत्रयविमुक्तोऽसौ भक्तानां प्रवरो भवेत् ॥

**Colophon.** इति पद्मपुराणे पातालखण्डे ब्रह्मनारदसंवादे मुरलीगुञ्जचन्द्रिकानां प्रादुर्भावः पञ्चषष्टितमोऽध्यायः ॥

विषयः । वंशीचन्द्रिकागुञ्जमालानां कृष्णप्रापणतपस्यादि-कथनम् ॥

---

**No. 236.** मूल्याध्यायविवरणम् By कामदेवदीक्षित. Substance, country-made paper, 10×3 inches. Folia, 5. Lines, 14 on a page. Extent, 150 çlokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi, Benares City. Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

**Beginning.**

प्रणम्य विघ्ननाशं हि मुनिं कात्यायनं ततः ।
दीक्षितान् वासुदेवांश्च गुरून् नत्वा सरस्वतीम् ॥ १ ॥
हितार्थं याज्ञिकानाञ्च मूल्याध्यायस्य काङ्क्षितम् ।
अज्ञातत्वात्पुराचार्य्यैर्व्याख्यानं क्रियते मया ॥ २ ॥

**End.**

व्याख्यातः कामदेवेन मूल्याध्यायः सतां प्रियः ।
तदनेन प्रयासेन प्रीयतां परमेश्वरः ॥

**Colophon.** इति श्रीदीक्षितकामदेवकृतं मुल्याध्यायविवरणं समाप्तम् ।

विषयः । यज्ञीयद्रव्याणां मूल्यनिरूपणं ॥

---

**No. 237.** मेघदूतटीका By दिवाकर उपाध्याय. Substance, palm leaf, 11×1½ inches. Folia, 95. Lines, 4 on a page. Extent, 1200 çlokas. Character, Bengali. Date ? Place of deposit, Dinājpur, Babu Girisācandra Cakravartti. Appearance, very old. Prose. Correct.

**Beginning.** ॐ नमो गणेशाय ॥

कश्चिदिति ॥
कश्चित् यक्षः रामगिर्य्याश्रमेषु वसतिं चक्रे इत्यन्वयः । तत्र आश्रमेष्विति बहुवचनात् इतस्ततः परिभ्रमन्नेकत्र धृतिं बबन्धेति ध्वनितं । इत्यादि ।

**End.**

एवमनेन प्रकारेण दुःखं कथयन्नाशिषं ददाति ते तव क्षणमात्रमपि विद्युता नायिकया विच्छेदो माभूत् मा भविष्यति कालसामान्ये लुङ्
× × × × इति ॥ * ॥

**Colophon.** इति श्रीदिवाकरोपाध्यायकृता मेघदूतटीका समाप्ता ॥ * ॥

विषयः । कालिदासकृतमेघदूतकाव्यस्य व्याख्यानम् ॥

---

**No. 238.** **मोक्षोपायः.** Substance, Tedet leaf, 14×2. Folia, 110. Lines, 5 on a page. Extent, 2750 çlokas. Character, Maithili. Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā. Late Paṇḍit Rāmatāraṇa S'iromaṇi. Appearance, old. Verse. Correct.

**Beginning.** ( १—२ पत्रं नास्ति ) ।

हृष्टरोमा महातेजा विश्वामित्रोऽभ्यभाषत ।
सदृशं राजशार्दूल तवैवैतन्महीतले ॥
महावंशप्रसूतस्य वशिष्ठवंशवर्त्तिनः ।
× × × × × × ॥
तस्य विघ्नकरा घोरा राक्षसा मम संस्थिताः ।
त्रातुमर्हसि मामार्त्तं शरणागतमर्थिनम् ॥
तवास्ति तनयः श्रीमान् दृप्तशार्दूलविक्रमः ।
× × × सदृशो वीर्य्ये रामो रक्षोविदारणः ॥
तं पुत्रं राजशार्दूल रामं सत्यपराक्रमं ।
काकपक्षधरं शूरं ज्येष्ठं मे दातुमर्हसि ॥
× × × × × ।
कृतास्त्रमकृतास्त्रं वा नैनं शक्ष्यन्ति राक्षसाः ॥

वाल्मीकिरुवाच ।

तथा वशिष्ठे ब्रुवति रामभृत्यजनान् नृपः ।
कथं कीदृक् स्थितो राम इति पप्रच्छ बुद्धिमान् ॥

जना ऊचुः ।

रामो राजीवपत्राक्षो यतः प्रभृति चागत. ।
स विप्रस्तीर्थयात्रायास्ततः प्रभृति दुर्म्मनाः ॥
यत्नात् प्रार्थनयास्माकं निजव्यापारमाह्निकं ।
सायमम्लानवदनः करोति न करोति च ॥
किं सम्पदा किं विपदा किं गेहेन किमीहितैः ।
सर्व्वमेवासदित्युक्त्वा तुष्णीमेवावतिष्ठते ॥
× × × × × ।
ईदृशःस्योन्महासत्वः क इवास्मिन् महीतले ।
प्राकृते व्यवहारे तं यो निवेशयितुं क्षमः ॥

विश्वामित्र उवाच ।

एवन्नेतु तं महाप्राज्ञा भवन्तो रघुनन्दनं ।
इहानयन्तु त्वरिता हरिणं हरिणा इव ॥
एष मोहो रघुपतेर्नापद्यो नापि चागतः ।
विवेकवैराग्यकृतो बोध एष महोदयः ॥
एतस्मिन् त्याजिते युक्त्या मोहे स रघुनन्दनः ।
विश्रान्तिमेष्यति पदे तस्मिन् वयमिवोत्तमे ॥
× × × × × × ।
एवं मुनीन्द्रे ब्रुवति पितुः पादाभिवन्दनं ।
कर्त्तुमभ्याजगामाथ रामः कमललोचनः ॥
× × × × ।

दशरथ उवाच ।

पुत्र प्राप्तविवेकस्त्वं कल्याणानाञ्च भाजनं ।
जडवज्जो × × × × खेदो × × × दीयताम् ॥
वृद्धविप्रगुरुप्रोक्तं त्वादृशेनानुतिष्ठता ।
पदमासाद्यते पुण्यं × × × मनुधावता ॥
× × × × × × ।

वशिष्ठ उवाच ।

राजपुत्र महाबाहो शूरस्त्वं विजितास्त्वया ।
दुरुच्छेदा दुरारम्भा × × × विषया × × ॥
किं × × × × × × × योग्ये व्यामोहसागरे ।
विनिमज्जसि कल्लोलबहुले जाड्यशालिनि ॥

विश्वामित्र उवाच ।

किं निष्ठाः के च ते केन कियन्तः कारणेऽर्णवे ।
आधयः प्रतिलुम्पन्ति × × × × × × × × ॥
यथाभिमतमाशु त्वं ब्रूहि प्राप्स्यसि राघव ।
सर्व्वे एव पुनर्येन भेत्स्यन्ति × × नाधयः ।
इत्युक्तमस्य × × × रघुवंशवन्तु
रारम्भवाक्यमुचितार्थविलासगर्भं ।

नत्वाज खेदमभिगर्जति वारिवाहे
वर्ही यथा त्वनुमिताभिमतार्थसिद्धिः ॥
इति वाल्मीकीये मोक्षोपाये वैराग्यप्रकरणे वैराग्योत्पत्तिप्रतिपादको नाम
प्रथमः सर्गः ॥ इत्यादि ।

End. बभूवुस्ते महाभेषु शिखरेषु महीभृतां ।
बहवो बान्धवाः सिंहाः किं तानपि न शोचसि ॥

Colophon. ( अतःपरं खण्डितं ) ।

विषयः । इति मोक्षोपाये वैराग्यप्रकरणे वैराग्योत्पत्तिप्रतिपादनं । जगद्दोषप्रकाशनं । इति मोक्षोपाये मुमुक्षुव्यवहारप्रकरणं। इति मोक्षोपाये उत्पत्तिप्रकरणार्थनिर्देशः। इति मोक्षोपाये वैराग्यप्रकरणं । इति मोक्षोपाये उत्पत्तिप्रकरणे नीलोपाख्यानं । इति मोक्षोपाये सूच्युपाख्यानं । इति मोक्षोपाये वाल्मीकीये उत्पत्तिप्रकरणं । इति स्थितिप्रकरणे भीमाद्युपाख्यानं । इति वाल्मीकीये मोक्षोपाये कचगाथाः । इति वाल्मीकीये मोक्षोपाये × × × × प्रकरणे जनकोपाख्यानं । ( अतःपरं खण्डितम् ) ।

---

No. 239. यजमानपत्न्यन्यतरासन्निधाने दर्शपौर्णमासप्रयोगः By वैद्यनाथमिश्र. Substance, country-made paper, 10 × 4½ inches. Folia, 5. Lines, 9 on a page. Extent, 90 çlokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi, Benares City. Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ॥
नित्यनैमित्तिके यावच्छक्यं न्यायमनुस्मरन् ।
वैद्यनाथः प्रतनुते यष्ट्रादीनामभावतः ॥

End. बाधमानमार्तिज्यं बलीय इति वचनात् पूर्व्वमाध्वर्यवं पश्चाद् याजमानादिकं, यत्र कर्मणां सन्निपातस्तत्र यथासामर्थ्यं, अन्यो विशेष एकाध्वर्युप्रयोगादूह्य इति ।

Colophon. इति वैद्यनाथमिश्रोन्नीतन्यायप्राप्तो यजमानपत्न्यन्यतरासन्निधाने दर्शपौर्णमासप्रयोगः ।

विषयः । उभयोर्मध्ये अन्यतरस्याभावे दर्शादिविधि-कथनम् ।

---

**No. 240.** यमकभारतम् By आनन्दतीर्थ। Substance, country-made paper, 12 × 4 inches. Folia, 5. Lines, 11 on a page. Extent, 120 çlokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi, Benares City. Paṇḍit Vāmanācārya. Appearance, old. Verse. Correct.

**Beginning.** श्रीवेदव्यासाय नमः ।

ध्यायेत्तं परमानन्दं यन्मायापतिमयदपरमानन्दं

उज्झितपरमानन्दं पत्याद्याद्याश्रमः सदैव परमानन्दम् । ?

**End.** इति नारायणनामा वकतीर्थसुपूजितः

सुरायणनामा पूर्णगुणैरधिकपूर्णः ।

ज्ञानोपमुक्तिभिः स्वधिकपूर्णः ।

**Colophon.** इति श्रीमदानन्दतीर्थभगवत्पादाचार्य्यविरचितं यमकभारतं ।

विषयः । माध्वमते श्रीकृष्णस्तुतिः ॥

---

**No. 241.** यात्राप्रयोगतत्त्वम् । By हरिशङ्कर. Substance, country-made paper, 14 × 2½ inches. Folia, 17. Lines, 5 on a page. Extent, 300 çlokas. Character, Bengali. Date ? Place of deposit, Dinājpura, Babu Giriśacandra Cakravartti, Pleader. Appearance, tolerable. Verse. Generally correct.

**Beginning.** ॐ नमो गणेशाय ॥

नत्वा कृष्णपदद्वन्द्वं ब्रह्मादिसुरवन्दितं ।

यात्राप्रयोगतत्त्वञ्च वक्ति श्रीहरिशङ्करः ॥

प्रमाणं तत्र यात्रायां पुराणेषु प्रतिष्ठितम् ।

**End.** यात्राकारणभूतस्य पुरुषस्य च भूपतेः ।

दुष्टान् ग्रहांस्तु विज्ञाय ग्रहशान्तिं समारभेत् ॥

**Colophon.** इति स्कन्दपुराणे जैमिन्यृषिसंवादे पुरुषोत्तममाहात्म्ये पञ्चविंशत्यध्याये-रथोत्पत्तितदुत्पातशान्तिकथनम् ॥ * ॥ इति यात्राप्रमाणं ॥

विषयः । नानापुराणवचनप्रमाणेन भगवतो रथयात्रादि-प्रयोगकथनम् ॥

---

No. 242. योगशास्त्रम् . Substance, country-made paper, 12×4 inches. Folia, 12. Lines, 13 on a page. Extent, 360 çlokas. Character, Nāgara. Date ? Place of deposit, Benares City. Dikmaṇḍalācāryya Mahārāja Bālacandra Sūri. Appearance, old. Verse. Correct.

Beginning. नमो दुर्व्वाररागादिवैरिवारनिवारिणे ।
अर्हते योगनाथाय महावीराय तायिणे ।
पन्नगे च सुरेन्द्रे च कौशिके पादसंस्पृशि ।
निर्विशेषमनस्काय श्रीवीरस्वामिने नमः ॥

End. ब्राह्मे मुहूर्त्ते चोत्तिष्ठन् परमेष्ठिस्तुतिं पठन् ।
किंधर्मः किंकुलश्चास्मि किंव्रतोऽस्मीति च स्मरन् ।

Colophon. ( असम्पूर्णोयम् । )

विषयः । जैनहठयोगकथनम् ।

---

No. 243. रकारादिरामसहस्रनामस्तोत्रम् (ब्रह्मयामलीयम्). Substance, country-made paper, 10×3½ inches. Folia, 11. Lines, 10 on a page. Extent, 300 çlokas. Character, Bengali. Date S. K. 1757. Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā. Late Paṇḍit Rāmatāraṇa S'iromaṇi. Appearance, fresh. Verse. Correct.

Beginning. श्रीमते रामानुजाय नमः ॥
श्रीदेव्युवाच ।
देवदेव महादेव भक्तानुग्रहकारक ।
त्वत्तः श्रुता मया पूर्व्वं मन्त्राणां शतकोटयः ॥
तन्त्राणि तन्त्रजालानि सरहस्यानि यानि च ।
तानि तानि महासिद्धिकल्पितानि शुभानि च ॥
× × × × × × × ।
श्रीदेव्युवाच ।
प्राणनाथ शिव शम्भो करुणानिधिशङ्कर ।
श्रीरामतत्त्वजिज्ञासा जायते परमेश्वर ॥
रहस्यं रामचन्द्रस्य रकाराक्षरपूर्व्वकं ।
नामसाहस्रकं ब्रूहि यद्यहं तव वल्लभा ॥ इत्यादि ।

End. श्रीरामचन्द्रः श्रितपारिजातः समस्तकल्याणगुणाभिरामः ।
सीतामुखाम्भोजनिचञ्चरिच्णुर्निरन्तरं मङ्गलमातनोति ॥
नीलाम्बुजश्यामलकोमलाङ्गं सीतासमारोपितवामभागं ।
पाणौ महासायकचारुचापं नमामि रामं रघुवंशनाथम् ॥
श्रीहरिः ॐ हरिः ॐ हरिः रां रां हरिः क्लीं क्लीं ह्रीं स्वाहा ।

Colophon. इति श्रीब्रह्मयामले हृष्टिप्रशंसायां उमामहेश्वरसंवादे रकारादिसहस्रनामस्तोत्रं सम्पूर्णं ॥ ॐ तत्सत् । लिपिरियं श्रीरामतारणदेवशर्मणः । शकाब्दाः १७५७ । ५ । ११ ।

विषयः । श्रीरामस्य रकारादिसहस्रनामकथनम् ॥

---

**No. 244.** रसमङ्गलः By गहनानन्दमुनि . Substance, country-made paper, 6×13 inches. Folia, 17. Lines, 18 on page. Extent, 500 çlokas. Character, Nāgari. Date Samvat 1733. Place of deposit, Ṭikāri, Baithbigha, Dist. Gayā, Paṇḍit Mahāvīraprasād Misra. Appearance, old. Verse. Correct.

Beginning. श्री ने य मः न शि न्यां ॥ ?

विधिरेष समाख्यातः सर्वशास्त्रेषु दुर्लभः ।
तत्रादौ कथ्यते सम्यग्रसादेरभिधानकम् ॥
वैद्यानां ग्रन्थयन्त्रार्थं तदेवत्वभिधीयते ।
रसः सूतो रसेन्द्रश्च पारदः शिवचेतकः ॥
शम्भुवीजं रसानाथ नामान्येतानि शास्त्रवित् । इत्यादि ।

End. यन्त्रं तस्य यथा यत्र लिख्यते तत् सुबोधतः ॥

Colophon. इति श्रीपरादर्शकप्राणनाथश्रीगहनानन्दमुनिविरचिते रसमङ्गले विषशोधनो नाम ऊनविंशतिः पटलः ।
अथातः संप्रवक्ष्यामि तुत्थसंस्कारमुत्तमं
आदौ तुत्थं समादाय × × × ×
यामद्वयात् समुद्धृत्य शुद्धिमायाति निश्चितं
कुण्डयन्त्रं यथा यत्र लिख्यते तत् सुबोधतः ॥
इदं कुण्डयन्त्रं ॥ * ॥ इ श्री रा शं क ण ध ग ना न्द नि विचि र मं ले त्य स्का ना ना विं ति इ लः २० ॥ शुभमस्तु संवत् १७३३ ॥

# NOTICES

OF

# SANSKRIT MSS.

## SECOND SERIES

BY

MAHĀMAHOPĀDHYĀYA HARAPRASĀDA ÇĀSTRĪ, M.A.
*Honorary Joint Philological Secretary, Asiatic Society of Bengal.*

PUBLISHED

UNDER ORDERS OF THE GOVERNMENT OF

BENGAL

VOLUME III. PART II.

CALCUTTA:
BAPTIST MISSION PRESS.
1907.

# NOTICES

OF

# SANSKRIT MSS.

## SECOND SERIES


BY

MAHĀMAHOPĀDHYĀYA HARAPRASĀDA ÇĀSTRĪ, M.A.

*Honorary Joint Philological Secretary, Asiatic Society of Bengal.*



PUBLISHED

**UNDER ORDERS OF THE GOVERNMENT OF**

**BENGAL**

VOLUME III.

CALCUTTA:

BAPTIST MISSION PRESS.

1907.

# PREFACE.

There are altogether 366 MSS. described in this volume. The MSS. were examined in various parts of Bengal and in Benares. A new feature of this volume is the description of a large number of Jaina MSS. An analysis of the contents, arranged according to subject-matter, is given below.

*The Vedas.*—The Vedic works in this volume are mostly liturgical. There are, however, commentaries by Sāyana (1) on the Uttarāgrantha of the Sāmavedasaṃhitā, and (2) on the Sāmavidhāna Brāhmaṇa. The value of the MSS. is enhanced by the fact that they belong to the collection of Paṇḍit Govinda Bhaṭṭa Solāpurkār, a well-known Vedic scholar of Benares. (3) Devatā-brāhmaṇabhāṣya is a commentary on the Devatā-brāhmaṇa or Devatādhyāya, the fifth brāhmaṇa of the Sāmaveda.

Slaughter of animals for sacrificial purposes was a common practice in ancient India. But with the spread of Buddhistic and Vaiṣṇava ideas, slaughter of animals was regarded as sinful, and instead of living animals, a section of the Brahmins began to sacrifice animals made of dough. Piṣṭapaśukhaṇḍanam, by Ṭīkākāra Śarmā, the son of Garjāra Bhaṭṭa, a worshipper of Kālī, shows the futility of the practice. The author combats the theories of the Vaiṣṇavas of the Mādhva sect. Piṣṭapaśu-Khaṇḍanavākyārtha-dīpikā, by Rakṣapāla, is a commentary on the above. Piṣṭapaśu-pratipādaka-Vidhivākya-prakaraṇam is a treatise current among the Mādhva sect. It attempts to find out injunctions from the Vedas against the killing of living animals and for sacrificing their images. Piṣṭapaśūjjīvanaṃ also relates to the same thing. Unmārgabhañjanaṃ, by Tumbara, the disciple of Timāji Raghunātha, refutes the theories of the Mādhvas in the matter of sacrificing cakes

shaped as animals. The writer speaks of the Mādhvas as treading the wrong path—Unmārga.

The Rudrādhyāya of the white yajurveda is extensively used up to the present day by the followers of that Veda. They think that the Rudra praised in these chapters is the terrific deity Rudra of the tantras; so the Rudra worship is a curious medley of Vedic and Tantric rites. An illustration of this will be found in the Rudrapaddhati, by Viśvanātha, the son of Śambhudeva, and the younger brother of Rāmadeva.

The change of pronunciation from the Saṃhitā to the Brāhmaṇa was so marked that it attracted the attention of scholars at a very early age. There is a short work entitled Bhāṣikasūtras. The Bhāṣikasūtra-vyākhyā, by Ananta Bhaṭṭa, is a commentary on that ancient work.

It is well known that the sacred fireplaces and sacrificial sheds engaged the attention of the writers of the Kalpasūtras, and that later authors have written many special treatises on these subjects.

Kuṇḍakalpadruma, by Mādhava, composed in 1712, Vikrama Saṃvat, and 1533 saka, *i.e.*, in 1656 A.D., is noted for the accuracy of mathematical calculations. It has been printed in the Kuṇḍagranthaviṃśati.

Kuṇḍamaṇḍapavidhānam treats of sacred fireplaces and sacrificial sheds of the followers of the Atharva Veda only.

The sacrificial altars of the Vedic age had a variety of shapes, and considerable geometrical skill was necessary in the construction of these altars. This also engaged the attention of the early writers of the Kalpasūtras. The portion of these sūtrus treating of the construction of altars are known as Śulvasūtras. Kātyāyana has a special treatise on them. Āpastamba, Baudhāyana and Mānava Sūtras have chapters allotted to them. A follower of the Āpastamba śākhā, named Ārya Mādhava, performed many sacrifices and found it difficult to collect from the Bhāṣyas and other commentaries all that was said about altars. So his son, Sundara-

rāja, prepared a special treatise entitled Śulvapradīpavivaraṇam. It is complete in six chapters called Paṭalas.

Mayūreśa Upādhyāya, the son of Puruṣottama, and the grandson of Gopāla, surnamed Dūpanamogha, belonging to the Maudgalya Gotra, wrote a commentary on a work on the formation of altars, entitled Vedipaddhati-ṭīkā. The work commented upon seems to be Vedipaddhati, and the colophon makes it probable that the commentator was also the author of the work.

Before the compilation of a comprehensive work on Grammar by Pāṇini, the Brāhmiṇs resorted to various shifts to preserve the purity of the pronunciation and grammatical construction of the Vedas. They sometimes counted words ending in particular letters, Visargas, Anusvāras and so on. They counted the number of compound words and words of peculiar construction, and embodied the result of their counting in the form of books, to be memorised. One such work is described in this volume, entitled Cāturjñānam, *viz.*, the knowledge of four things: (1) Visarga sandhi; (2) sandhis resulting in diphthongs; (3) words ending in the letter *N;* and (4) the distinction of simple and compound words, throughout the whole of the Ṛgveda. The extent of the work is 600 ślokas. See p. जै preface to the Nirukta, edited by Ācārya Satyavrata Sāmaśramī.

The rest of the works on this subject are liturgical, *e.g.*, Cayanaprayoga, on the kindling of sacred-fire; Pākatantrakuśaṇḍikāprayoga, on the use of ordinary 'Homa' in sacrificial cooking; Taittirīya-homa-paddhati on the homa according to the black Yajurveda; Yajamāna-patny-anyatarā-sannidhāne Darśa-paurṇamāsa-prayoga on the question how the fortnightly ceremonies of those who keep up the sacred fire throughout their lives are to be performed in the absence either of the householder or of his wife; Ṛgvedīya-śrāddha-prayoga treats of the performance of the Śrāddha ceremony by the followers of the Ṛgveda; Samantraka-yajurvedi-graha-yajñāgni-sthāpana-vidhi treats of the kindling of fire for the purpose

of propitiating the planets by the followers of the yajurveda; Āhitāgnerdāhāgni-nirṇaya deals with the question of the kind of sacred fire by which the dead body of a sāgnika brāhmaṇa is to be burnt ; Āpastamba-sūtrokta-saṃskāra-prayoga treats of sacraments according to the sūtras of Āpastamba; Apatnīkādhānāgnihotrādinirṇaya treats of Agnihotra by one who has no wife ; Sāgnikāpastamba-dāha-vidhi treats of the cremation of Sāgnika brāhmaṇas according to Āpastamba ; Sāmavedīya-Saṃskāra-vidhi treats of the sacraments of the professors of the Sāmaveda. Vrātya-stoma-paddhati treats of the process of admitting into the caste system those who have lost their caste by the non-observance of the essential ceremonies. The work was composed by Mādhavācārya, who obtained his livelihood from Balarāma of Benares. The Vrātyastoma was a potent machinery in the hands of the Brahmins for giving powerful warriors and chiefs the status of a kṣatriya.

Śrautopayogi-kārikā contains a number of anonymous couplets helpful to the performances of Śrauta sacrifices.

The Pavamāna sacrifice is the modification of the Paurṇamāsa or full-moon sacrifice of those Brāhmans who keep up a sacred fire.

Pavamānayantra treats of the invocation of gods and placing them in the sacred shed.

Pavamānanyāsa treats of protecting the person of the worshipper by placing different letters of the Pavamnamantra in different parts of his body.

Saṃhita-sūtra, in 150 ślokas, appears to be a short work on pronunciation and sandhi. This is a different work from that described by Weber, in his Berlin Catalogue, p. 9.

Mūlyādhyāyavivaraṇam appears to be an amplification by Kāmadeva Dīkṣita in anuṣṭubh verses of the pariśiṣṭa entitled Mūlyādhyāya, belonging most probably to the Kāṇva śākhā of the white yajurveda. It treats of the prices of articles to be used in Vedic sacrifices.

*Upaniṣads.*—Advaya-tārakopaniṣat treats of the process of perceiving "self" by means of yoga.

Avadhūtopaniṣat or rightly Turīyātīta Avadhūtopaniṣat seems to develop a higher stage of yogi's progress towards liberation than contemplated in the work of the same name described by Eggeling. It, in fact, concerns itself with the last stage of progress.

Number 23 contains a Bhāṣya commentary on the Ātharavaṇopaniṣat, unknown to Aüfrecht, by Ānandatīrtha, the founder of the Mādhva sect.

Numbers 97 and 98 contain descriptions of two Bhāṣyas on the well-known Chāndogyopaniṣat., (1) by Ānandatirtha, and (2) by Sāyana.

Number 168 contains a Bhāṣya by Vidyāraṇya Muni on the Paramahaṃso-paniṣat, which treats of the renunciation of the world for the acquisition of true knowledge, and which begins with the words अथ योगिनां etc.

Number 196, Bahvṛcopaniṣat, is the same as Eggeling No. 132 B.

Bilvopaniṣat, No. 271, on the subject of worshipping Śiva by means of the leaves of the Bilva tree, appears to have never been described before.

Vaiśvānaropaniṣat, No. 289, is a brand new discovery.

Śukarahasyopaniṣat, No. 304, appears to be an interlocution between Vyāsa and Śuka, and the subject seems to be the mystery of the wrold.

Number 317 is a Vivaraṇa commentary by Śaṃkarabhagavat on the Saṃhitopanisat or what is called the Aitareya or Bahvṛcopaniṣat. See Eggeling, p. 117, No. 12. This is not a commentary on the Bahvṛcopaniṣat mentioned above, for it begins differently.

Gopālottararatāpanīvivṛti is a commentary written in the interests of the followers of Caitanya by four great divines of the sect—Viśveśvara, Janārddana Bhaṭṭa, Prabodhayati and Jīva Gosvāmī, the last of whom seems to have edited the work.

*Smṛti.*—Āpastamba's Kalpasūtras are represented in this volume by eight works, Nos. 25–30, 149 and 254. The first is anonymous; it is a collection of couplets on the domestic rites by Āpastamba; the second also relates to the same rules; it is composed by Yopana Bhaṭṭa, an inhabitant of the Āndhra country; the third is a liturgical work on the same by an inhabitant of Tālabṛnta; the fourth is by Govardhana Bhaṭṭa, who was surnamed Kavimaṇḍana, the decorator of poets; it treats of the daily duties of Brāhmins; the fifth is by Haradatta, and on the exposition of Dharmasūtras; the sixth is by Siṃha Bhaṭṭa on the peculiar process of performing sacraments according to Āpastamba; the seventh is by Dhūrttasvāmī, but unfortunately it proceeds up to the 6th paṭala of the 11th Praśna, relating to domestic rites.

Rāmāgnicit, commonly called Rāmāṇḍāra, wrote a commentary on the Bhāṣya of Dhūrttasvāmī, on the Āpastamba śrauta sūtras. The MS. described in this volume contains the 9th Praśna only, that on the expiations.

सम्भृतेः स्थापनम् ... ... ... ... ... १
वास्तुशास्त्रम् ... ... ... ... ... ... १
वैष्णवामृतसारोद्धारः ... ... ... ... ... १
धातुपाठवृत्तिः ... ... ... ... ... ... १
सिद्धमार्गप्रकाशिका ... ... ... ... ... १
बज्रावली ... ... ... ... ... ... १
चर्य्याचर्य्यटिका ... ... ... ... ... ... १

पद्मावत्याः पञ्जिका [महापण्डितवज्रपादकृता ने, ८१७] ... ... १
माघकाव्यम् ... ... ... ... ... ... १
तीर्थवाचस्पतिः ... ... ... ... ... ... १
प्रबोधचन्द्रोदयटीका ... ... ... ... ... १
रत्नावलीनाटिका ... ... ... ... ... ... १
कर्पूरमञ्जरी ... ... ... ... ... ... १
हिरण्यपारिजात ... ... ... ... ... ... १
अमृतकर्णिका ... ... ... ... ... ... १
नीलतन्त्रम् ... ... ... ... ... ... १
वषपित्र (?) तृतीयः कल्पः ... ... ... ... ... १
ताराकल्पः ... ... ... ... ... ... १
हयग्रीवकल्पः ... ... ... ... ... ... १
वसुपादुका ... ... ... ... ... ... १
पसीवनी (?) ... ... ... ... ... ... १
लक्षपुष्पारोहणम् ... ... ... ... ... ... १
कल्पद्रुमावदानम् ... ... ... ... ... ... १
तलवकारोपनिषद् ... ... ... ... ... ... १
ज्ञानोदयग्रन्थमाला ... ... ... ... ... १
भास्करप्रकाशः ... ... ... ... ... ... १
संस्कृतभाष्यम् ... ... ... ... ... ... १
प्रश्नोपनिषद् ... ... ... ... ... ... १
वियोगवैराग्यशतकम् ... ... ... ... ... १
वाजसनेयोपनिषद् ... ... ... ... ... १
सत्यार्थप्रकाशः ... ... ... ... ... ... १
सूचीपत्रम् ... ... ... ... ... ... १
संस्कारविधिः ... ... ... ... ... ... १
वेदप्रकाशः ... ... ... ... ... ... १
शङ्कराचार्य्यः ... ... ... ... ... ... १

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| कठोपनिषद् | ... | ... | ... | ... | ... | ... | १ |
| आर्य्यधर्म्मेन्द्र जी | ... | ... | ... | ... | ... | ... | १ |
| मुण्डकोपनिषद् | ... | ... | ... | ... | ... | ... | १ |
| आर्य्याग्रन्थावली | ... | ... | ... | ... | ... | ... | १ |
| सत्यार्थसंहिता | ... | ... | ... | ... | ... | ... | १ |
| यजुर्वेदभाष्यम् | ... | ... | ... | ... | ... | ... | १ |
| योगवाशिष्ठः | ... | ... | ... | ... | ... | ... | १ |
| स्वरोदयसारः | ... | ... | ... | ... | ... | ... | १ |

## भोटे ग्रन्थ ।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| कञ्जुर | ... | ... | ... | ... | ... | ... | ... | १०४ |
| तेंगुर | ... | ... | ... | ... | ... | ... | ... | २२४ |
| सेरवें ढांपा | ... | ... | ... | ... | ... | ... | | १ |

विषयः। १ पटले रसपर्यायकथनपूर्व्वकरससंस्कारकथनम्। २ शुद्धरसधातुगुणकथनम्। ३। ४ चन्द्रसूर्य्यालयाग्निसंवरणपाशकयन्त्रादिकथनम्। ५ रसजारणादिकथनम्। ६ रसशोधनादिकथनम्। ७। ८ रसमारणादिकथनम्। ९ रसजागरणबन्धनादिकथनम्। १०। ११ अन्नशोधनादिकथनम्। १२ रसशोधनमारणकथनम्। त्रयोदशादष्टादशपटलपर्य्यन्तं खण्डितं। १९ विषशोधनकथनम्। २० तुत्थसंस्कारकथनम्।

---

No. 245. रसकर्म्ममञ्जरी By राजारामतर्कवागीश. Substance, country-made paper, 13×4 inches. Folia, 27. Lines, 6 on a page. Extent, 650 ślokas. Character, Bengali. Date ? Place of deposit, Balihār, Dist. Rajsahi, Paṇḍit Kālīcandra Bhaṭṭacāryya. Appearance, tolerable. Verse and Prose. Generally correct.

**Beginning.** प्रथमपत्रं नास्ति द्वितीयपत्रप्रारम्भवाक्यम्।
षट्कर्म्मदेवताः प्रोक्ताः कर्म्मादौ ताः प्रपूजयेत्।
काली भद्रकाली। इत्यादि।

**End.** शिरो मुञ्च२ हृदयं मुञ्च२ उदरं मुञ्च२ कटिं मुञ्च२ उरुं मुञ्च२ गात्राणि मुञ्च२ ... ॐ ह्रँ ह्रँ ह्रँ फट् अमुकस्य सर्व्वज्वरं नाशय स्वाहा इति मन्त्रेण पत्रिकां लेखयित्वा कुमारीकल्पितसूत्रेण वेष्टयित्वा ज्वरिणः शिरसि बन्धयेत् * ॥

**Colophon.** इति श्रीराजारामतर्कवागीशभट्टाचार्य्यविरचितायां रसकर्म्ममञ्जर्य्यां शान्तिविधिकथनं नाम द्वितीयः पटलः ॥ * ॥

अतःपरं खण्डितं।

विषयः। १ मारणोच्चाटनादिकर्म्मणां कालादिनियमेन सामान्यविधिकथनम्। २ पटले त्र्यम्बकादिप्रयोगनिरूपणशान्तिविधिकथनम् ॥

---

No. 246. रसरत्नमाला, By नरसिंह कविराज. Substance, country-made paper, 6×13 inches. Folia, 70. Lines, 18 on a page. Extent, 1400 ślokas. Character, Nāgari. Date Saṃvat 1732. Place of deposit Tikāri, Baithbighā, District Gayā. Paṇḍit Mahāvīrprasād Miśra. Appearance, old. Verse. Generally correct.

**Beginning.** श्री गणेशाय नमः ॥

ईशमनीशं कारणमकारणं व्यक्तमव्यक्तं ।
आदिमनादिं शाश्वतमशाश्वतं गोपमच्युतं वन्दे ॥
कनकरजतमुक्तावज्रवैदूर्य्यहीरै-
र्मरकतरसरङ्गैः पद्ममाणिक्यमुख्यैः ।
विशदगुणकदम्बैर्गुम्फितारत्नमाला
विबुधनिवहलच्व्या रामकृष्णप्रसादात् ॥
अथातः सम्प्रवक्ष्यामि रसलौहादिसंस्कृतिं ।
यद्विज्ञानेन भिषजो न मुह्यन्ति चिकित्सिते ॥

**End.** कान्तिं चिरस्थितं देहं सप्ताहत्रयमाचात् सर्व्वरुजो हन्ति किं बहुना ।
+ + + । मुनिरचितशास्त्रपारं गत्वा सारं ततः समुद्धृत्य निवन्ध-
बान्धवानामुपकृतये × को × षट्कर्म्मा इत्यमृतसारलौहं ॥
तन्त्रार्णवान् विनिर्म्मथ्य नरसिंहेन सद्गुणैः ।
गूढवाक्यविषं त्यक्त्वा रत्नमाला समुद्धृता ॥
लौहमहौरुहघटिता मालेयं रत्नपूरिता तरणिः ।
× × × × × × ॥
यद्यपीयं न हि भवेत् पुराणभिषजः प्रिया ।
तथापि नव्यवैद्यानामानुकूल्यं करिष्यति ॥ * ॥

**Colophon.** इति दाक्षिणात्यवैदिकमहोपाध्यायनीलकण्ठभट्टात्मजरामकृष्णभट्ट-परिचारक
श्रीनरसिंहकविराजविरचितारसरत्नमाला समाप्ता ।
शुभमस्तु संवत् १७३१ ॥

विषयः । रसशोधनादिकथनम् । रसकर्पूर-रससिन्दूरादि-कथनम् । रसबन्धनादि-कथनम् । रसमारणादि-कथनम् । अभ्रमारणादिकथनम् । स्वर्णादिमारणकथनम् । रत्नगिरि-ज्वरपञ्चाननादिरसकथनम् । प्रतापलङ्केश्वररसादिकथनम् । महोदधिकनकसुन्दरादिसकल-रसकथनम् । पञ्चामृतपर्पटीकथनम् । विजयपर्पटीकथनम् । अग्निमुखलौहादिकथनम् । पञ्चामृतवटीकथनम् । हुताशादिवटीकथनम् । राजयक्ष्मादिचिकित्साकथनम् । कासादि-चिकित्साकथनम् । स्वरभेदचिकित्साकथनम् । मूर्च्छादिचिकित्साकथनम् । वातव्याधिचिकित्सा । आमवातचिकित्सानिरूपणम् । उदावर्त्तचिकित्सा । गुल्मादिचिकित्सा । शोथादिचिकित्सा-निरूपणम् । कुष्ठादिचिकित्साकथनम् । स्त्रीरोगादिचिकित्सा । साध्यसाधनपरिमाणविधिकथनम् । स्थालीपाक-पुटनादिविधिकथनम् । अमृतसारलौहादिकथनम् ॥

**No. 247.** सारमञ्जरी (राघवपाण्डवीय टीका). By* जितामित्र. Substance, country-made paper, 12 × 2½ inches. Folia, 44. Lines, 7 on a page. Extent, 1500 ślokas. Character, Bengali. Date S.K. 1749. Place of deposit, Zilla Midnapur, Post Garvetā, Grām Bhaṭṭagrām, Paṇḍit Rāmhṛdaya Bhaṭṭāchāryya. Appearance, fresh. Prose. Correct.

**Beginning.** श्रीश्रीरामः ॥

विघ्नविध्वंसशूरं तत्कन्दमानन्दसंहतेः ।
सुरारेश्चरणाम्भोजमम्बिकाया अपि स्तुमः ॥
टीकायां वितता व्याख्या इत्यालोच्य समासतः ।
जितामित्रेण धीरेण क्रियते सारमञ्जरी ॥
कर्त्तव्यविघ्नशान्तयेऽभिमतदेवतां नमस्कुर्व्वन् स्वशिगुरुत्वेन प्रथमं ब्रह्माणं प्रणमन्नाह । स्वेति । इत्यादि ।

**End.** हरीणां वानराणां विसर्जनं प्रस्थापनं पक्षे कृष्णविसर्जनं तीर्थभूयात् उपाध्यायरूपात् कवेः वाल्मीकेः कुम्भभुवोऽगस्त्याच्च × × × × × पक्षे कवेरिति कुम्भभुवो विशेषणं । श्रिया । स रामः भरतसम्बन्धिन्या श्रिया जुष्टः पक्षे × × × × तत्काव्यकारयितुः राज्ञोप्येवं ।

**Colophon.** इति श्रीराघवपाण्डवीयटीकायां सारमञ्जर्यां श्रीजितामित्र-कृतायां त्रयोदशः सर्गः समाप्तः । शकाब्दाः १७४९ ।

कान्ते कथं कमलकोरकयुग्ममेतद्-
वक्षस्थितं समभुपं न तव प्रफुल्लं ।
सिन्दूरपूरकिरणे सति भालदेशे
शङ्के समीपसुखचन्द्रमयूखमग्नम् ॥
काकः कृष्णः पिकः कृष्णो न भेदः पिककाकयोः ।
वसन्ते पुनरायाते काकः काकः पिकः पिकः ॥
श्रीश्रीसीतारामाभ्यां नमोनमः ।

विषयः । राघवपाण्डवीयकाव्यस्य व्याख्यानम् ॥

---

**No. 248.** राजधर्म्मकौस्तुभः. By अनन्तदेव. Substance, country-made paper, 10 × 4 inches. Folia, 29, Lines, 11 on a page. Extent, 720 ślokas. Character, Nāgari. Date ? Place of deposit, Bibihāṭi, Benares City. Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ॥

उपनिषदधिगतं रूपं मुनयो मनसा भजन्त्यरूपं यत् ।
कृष्ण ध्वतोत्कटको × विजय × मद्दो जयति ।
यशःकर्पूरेण सर्व्वाशाः परिपूरयन्,
लज्जाजलनिधौ सर्व्वान् योत्विपन्नृपतीन् परान् ॥

End. अथ यजमानो गवादिदक्षिणा । आचार्य्याय अन्येभ्यश्च भूयसीं दक्षिणां दत्वा यथाशक्ति ब्राह्मणान् भोजयित्वा परमेश्वरार्पणं कुर्य्यात् । इति संक्षेपप्रचलार्चाविधिः ।

Colophon. इति श्रीमन्महाराजाधिराज-श्रीवाजबाहादुर-न्टपवराज्ञाप्रवृत्तेनापदेवसुता-नन्तदेवविदुषा कृते राजधर्मकौस्तुभे पूर्त्तपद्धतिगोचरद्वितीयदीधितेः पूर्व्वार्द्धं समाप्तम् ।

विषयः । जलाशयोत्सर्गकथनम् ।

---

No. 249. राधाष्टमीपूजाविधिः (ब्रह्मवैवर्त्तपुराणीयः). Substance, country-made paper, 15×3½ inches. Folia, 3. Lines, 7 on a page. Extent, 750 ślokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Candrakoṇā, Ayodhyā, Raghunātha-vāṭi, Babu Cakrapāni Rāya. Appearance, old. Generally correct.

Beginning. श्रीनारायणाय नमः ।

अथ राधाष्टमीपूजाविधिः ।

तत्रादौ स्वस्तिवाचनपूर्व्वकं संकल्पं कुर्य्यात् । श्रीविष्णुरौं तत्सदद्य भाद्रमासि शुक्ले पक्षेऽष्टम्यान्तिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा श्रीराधाकृष्णपादान् अर्चयिष्ये इति सङ्कल्प्य यज्ञाग्रत इति पठेत् ॥ इत्यादि ।

End. प्रथमावरणे देवकन्या, द्वितीयद्वारे किङ्किनी, तृतीये लवङ्गी, चतुर्थे काम-धेनुः, पञ्चमे मन्दारवृक्षमूले रत्नसिंहासने प्रद्युम्नः, × × × सप्तमे मुनिगण-सहितः कृष्णवर्णो विष्णुः, दक्षिणे रुद्रकुण्डः । इति सप्तावरणं समाप्तम् ।

Colophon. इति ब्रह्मवैवर्त्ते महापुराणे प्रकृतिखण्डे श्रीराधिकापूजापद्धतिः समाप्ता ।

विषयः । श्रीराधायाः पूजाविधानकथनम् ।

---

**No. 250.** **राधाष्टमीव्रतकथा (भविष्योत्तरीया).** Substance, country-made paper, 15 × 3 inches. Folia, 5. Lines, 7 on a page. Extent, 140 slokas. Character, Bengali. Date S.K. 1708. Place of deposit, Zilla Midnapur, Post Candrakonā, Ayodhyā Raghunātha-vāṭi, Babu Cakrapāṇi Rāya. Appearance, old. Prose. Generally correct.

**Beginning.** ॐ नमो राधायै ॥

श्रीशौनक उवाच ।

आराधनानां सर्व्वेषां विष्णोराराधनं परं ।
ततोऽप्यधिकमस्यान्याराधनं चेद्वदस्व मे ॥

श्रीसुत उवाच ।

शृणुध्वं मुनयः सर्व्वे व्रतमेतत् सुगोपितं ।
कृष्णनारदसंवादं यच्छ्रुत्वा भक्तिमान् भवेत् ॥

श्रीनारद उवाच ।

श्रुताः सर्व्वावतारास्ते कृष्णविष्णो सनातन ।
राधिकायाः महादेव्याः प्रादुर्भावं वदस्व मे ॥ इत्यादि ।

**End.** सुत उवाच ।

श्रुत्वैतत् कृष्णवचनं नारदो मुनिसत्तमः ।
चकारैतद्व्रतं भक्त्या वैष्णवाज्ञापरिचया ॥
अथ दामोदरं स्तुत्वा राधया सहितं मुदा ।
प्रणम्य दण्डवद्भूमौ ययौ × × × × मुनिः ॥

**Colophon.** इति श्रीभविष्योत्तरे श्रीकृष्णनारदसंवादे श्रीराधाष्टमीव्रतकथा समाप्ता ।
ॐ नमो राधिकायै । शक० १७०८ ।

**विषयः ।** श्रीराधाष्टमीव्रतकरणे फलकथनम् । श्रीराधाया जन्मादिविवरणकथनञ्च ।

---

**No. 251.** **राधास्तोत्रम् (ऊर्द्ध्वाम्नायतन्त्रोक्तम्).** Substance, country-made paper, 16 × 4 inches. Folia, 1. Lines, 8 on a page. Extent, 16 slokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grām Telivāni, Paṇḍit Nīlkamal Gosvāmī. Appearance, fresh. Verse. Correct.

Beginning. ॐ श्रीराधिकायै नमः ।
अथ राधास्तोत्रम् ।
शिव उवाच ।
ॐ नमस्ते परमेशानि ब्रह्मरूपधराव्यये ।
ब्रह्मविष्णुशिवादीनां प्राणश्रीः परमेश्वरि ॥
राधा करोतु कुशलं दारादिषु धनादिषु ।
यस्याः पादसरोजस्य देवा मौलिमधुव्रताः ।
अभीष्टमधुधाराभिस्तृप्यन्त्येव न संशयः ॥
इन्द्रादिदिविषद्वृन्दवन्दितं पादपङ्कजं ।
यस्याः कचसमूहेन निर्जितं चामरं तथा ।
तां नमामि हरेः कान्तां स्मेराननसरोरुहाम् ॥ इत्यादि ।

End. एतत् स्तोत्रं पठेद् यस्तु सर्व्वपापप्रणाशनं ।
तस्य मुक्तिः करगता सत्यं सत्यं वदाम्यहम् ॥
महार्णवे महारण्ये सिंहव्याघ्रभयानके ।
वारमेकं पठेद् यस्तु तस्य भीतिर्न जायते ॥
× × × × × × ।
पुत्रवृद्धिकरं स्तोत्रं धनवृद्धिकरं तथा ।
न प्रकाश्यमिदं देवि न देयं यस्य कस्यचित् ॥

Colophon. इति ऊर्द्ध्वाम्नाये महातन्त्रराजे परमरहस्ये शिवशिवासंवादे श्रीराधास्तोत्रं समाप्तं ॥

विषयः । श्रीराधायाः स्तुतिकथनं तस्य फलकथनञ्च ।

---

**No. 252. राधिकाजन्मरहस्यम् ( ब्रह्मवैवर्त्तीयम् ).** Substance, country-made paper, 15×3½ inches. Folia, 3. Lines, 7 on a page. Extent, 80 slokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Candrakonā, Ayodhyā Raghunātha-vāṭī. Babu Cakrapāṇi Rāya. Appearance, old. Verse. Generally correct.

Beginning. अथ कथा ।
शौनक उवाच ।
व्रतेन केन तपसा सर्व्वकामार्थसाधनं ।
गुह्याद्गुह्यतरं नाम राधिकाया व्रतं × × × ॥

सर्व्वतन्त्रेषु मन्त्रेषु गोपनीयं महामुने ।
तत् सर्व्वं श्रोतुमिच्छामि कथयस्व मयि प्रभो ॥ इत्यादि ।

End. पूजयेद्गन्धपुष्पाभ्यां धूपदीपविधानतः ।
मिष्टान्नं चीर + + + नैवेद्यं विविधानि च ॥
मधुपर्कञ्चाचमनं वस्त्रालङ्कारभोजनैः ।
+ + + + + सर्व्वं पृथिव्यां कामचारतः ॥

Colophon. इति ब्रह्मवैवर्त्ते महापुराणे श्रीराधिकाया जन्मरहस्यं सम्पूर्णं ।

ॐ गुरवे नमः ।
शाके मुनिव्योमयुगेन्दुगण्ये
पुण्ये तथा फाल्गुणपौर्णमास्यां ।
त्रैलोक्यभाग्योदयपुण्यहेतुः
प्रभुः शचीनन्दन आविरासीत् ॥

विषयः । राधाष्टमीव्रतप्रसङ्गे श्रीराधाया जन्मादिविवरणकथने फलकथनं ॥

---

**No. 253.** श्रीरामसहस्रनामस्तोत्रं (रुद्रयामलीयं) Substance, country-made paper, 9×4 inches. Folia, 17. Lines, 7 on a page. Extent, 225 ślokas. Character, Nāgara. Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā, Babu Vaikunṭhanāth Cakravartī. Appearance, tolerable. Verse. Generally correct.

Beginning. नमः श्रीमते रामानुजाय ।
कैलासशिखरे रम्ये नानाधातुविचित्रिते ।
नानाद्रुमसमाकीर्णे नानापक्षिगणावृते ॥
नानापुष्पलतागुल्मवेष्टिते प्रमथावृते ।
देवदानवगन्धर्व्वकिन्नरैरुपशोभिते ॥
मन्दमारुतसंवीते पार्व्वतीपरमेश्वरौ ।
उपविश्य कथां चक्रे शम्भुदेव मुदान्वितौ ॥
भक्त्या शम्भुं प्रणम्याथ पार्व्वती परिपृच्छति ॥

पार्व्वत्युवाच ।

देवदेव महेशान सर्व्वागमविशारद ।

त्वमेव शरणं नाथ त्राहि मां दुःखसागरात् ।
नाम्नां सहस्रं रामस्य ब्रूहि मे प्रमथाधिप ॥ इत्यादि ।

End. रामेति रामचन्द्रेति रामभद्रेति वा स्मरन् ।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिञ्च विन्दति ॥

Colophon. इति श्रीरुद्रयामले हरगौरीसंवादे श्रीरामसहस्रनामस्तोत्रं सम्पूर्णं ॥

विषयः । श्रीरामस्य सहस्रनामकथनं ॥

---

No. 254. रामाण्डारे नवमःप्रश्नः. Substance, country-made paper, 12 × 5 inches. Folia, 80. Lines, 11 on a page. Extent, 1930 ślokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, new. Prose. Correct.

Beginning. उक्ता हविर्यज्ञाः, अथ हविर्यज्ञा उक्ताः पूर्व्वं सौत्रामन्यपि पशुबन्धत्वात् उक्तप्रायेति हविर्यज्ञा इत्यविशेषोक्तेः तेषु प्रायश्चित्तमवश्यम्भवि दैवात् कालेऽपि इत्यादि ।

End. सर्व्वेषां सहप्रयोग आहवनीय एव उपदेशस्त्वेकैकया व्याहृत्यैकैकस्मिन्नग्नौ पूर्व्ववद्धोमं जुहुयादिति द्विरुक्तिपाठः प्रश्नपरिसमाप्त्यर्थः .

Colophon. समाप्तः प्रश्नः.

विषयः । आपस्तम्बप्रायश्चित्तसूत्रभाष्यवृत्तिः ।

---

No. 255. रामानुजमतखण्डनम्. Substance, country-made paper, 12 × 5 inches. Folia, 8. Lines, 11 on a page. Extent, 240 ślokas. Character, Nāgara. Date ? Place of deposit, Bahuvallbaha Cattarji, Pātāleśvar, Benares city. Appearance, new. Prose and verse. Correct.

Beginning. जयति श्रौतधर्मार्कः स्मार्त्तधर्मार्कवर्णोदयः ।
सत्पुराणैर्वद्ध्यमानः पाषण्डध्वान्तनाशकः ॥

इदानीं बहवो मुग्धा जना रामानुजीयानां दम्भमत्याचारं चाविलोक्य तैर्विप्रलब्धाः सन्तः शास्त्रसम्मतमपि स्वकुलधर्ममपहाय तन्मार्गे प्रविशन्ति स च मार्गः श्रुतिस्मृत्यादिमूलविधुरोऽत्यन्तनीचजात्युद्भूतपुरुषप्रवर्त्तित इति तत्र प्रविष्टा वर्णाश्रमधर्माधिकारच्युता भवन्तीतीत्यादि ॥

End. तदा द्विजैः सर्व्वजगद्धितार्थं
सद्धर्मरत्नाकरपत्रमेतत्, ।
प्रकाशितं तस्य विलोकनेन
रामानुजीयास्वकिता बभूवुः ॥
निरुत्तराधोवदनाः स्वकीयं
विज्ञाय पाषण्डमतं निकृष्टं
स्वीकृत्य सर्व्वं द्विजभाषितं ततो
गताश्छिदण्डादय इत्यमेतत् ॥

Colophon. श्रीरामानुजीय-मत-खण्डनम् ।

विषयः । रामानुजाचार्य्य-प्रवर्त्तितमतखण्डनम् ।

---

No. 256. रुद्रपद्धतिः. By विश्वनाथ देव. Substance, country-made paper, 12 × 5 inches. Folia, 25. Lines, 11 on a page. Extent, 550 slokas. Character-Nāgara. Date ? Place of deposit, Benares City, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीमद्गणपतये नमः ।
जयति जगति रामो जानकीजानिरेको
दशरथकुलदीपः सच्चिदानन्दरूपः
दशमुखसुखशत्रूच्छेदविच्छेदहो
भृगुकुलतिलको × × त्मानदानिप्रवीनः ।

End. अनन्तरं यजमानेन द + × × रुद्रा × × × ति मन्त्रेण देवदक्षिणहस्ते जपनिवेदनं ततः पीठदेवताविसर्जनादिकं कुर्य्यात् ।

Colophon. इति श्रीमन्माध्यन्दिनीयशम्भुदेवतनयरामदेवानुजविश्वनाथदेवविरचितायां रुद्रपद्धतौ जापकृत्यं रुद्रविधानाख्यं द्वितीयप्रकरणं समाप्तम् ।

विषयः । रुद्रानुष्ठानम् ।

---

No. 257. रुद्राक्षफलं. Substance, country-made paper, 11 × 3 inches. Folia, 3. Lines, 5 on a page. Extent, 30 slokas. Character, Bengali. Date ? Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgīsa. Appearance, old. Verse. Generally correct.

Beginning. ॐ परमदेवतायै नमः ।

ईश्वर उवाच ।
रुद्राक्षस्य फलं वक्ष्ये त्रिषु लोकेषु विश्रुतं ।
लक्षं सन्दर्शनात् पुण्यं स्पर्शनात् कोटिरुच्यते ॥
दशकोटिसमं पुण्यं धारणाल्लभते नरः ।
दशकोटिसहस्राणि दशकोटिशतानि च ॥
जपिला तु लभेत् पुण्यं नात्र कार्य्या विचारणा ॥
हस्ते बाहौ तथा कण्ठे मूर्द्ध्नि रुद्राक्षधारणात् ।
अवध्यः सर्व्वभूतानां रुद्रवद् विहरेद् भुवि ॥
देवासुराणां सर्व्वेषां वन्दनीयो यथा शिवः ।
उच्छिष्टो वा विकर्म्मस्थो युक्तो वा सर्व्वपातकैः ॥
मुच्यते सर्व्वपापेभ्यो रुद्राक्षधारणान्नरः ॥
रुद्राक्षकण्ठमाश्रित्य श्वापि वा म्रियते यदि ।
सोयं रुद्रत्वमाप्नोति किं पुनर्मानवादयः ॥ इत्यादि ।

End. अतःपरं सुखाधिक्यं रुद्राक्षं लभते यदि ।
फलमेतद्भृशं देवि लभते नात्र संशयः ॥
विना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः ।
स याति × × × × ×
अतः परं खण्डितं ) ॥

Colophon. — — — — —

विषयः । रुद्राक्षधारणेन फलादि कथनम् ।

---

No. 258. लक्षणमञ्जरी. By गङ्गेश. Substance, country-made paper, 14×3 inches. Folia, 4. Lines, 6 on a page. Extent, 95 ślokas. Character, Bengali. Date ? Place of deposit, Dinājpur, Babu Girishchandra Cakravarti. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमो गणेशाय ॥

नत्वा गुरुपदाम्भोजं परं ब्रह्मस्वरूपकं ।
क्रियते लक्षणमञ्जरी गङ्गेशेन च धीमता ॥

नियन्त्रितविषयादवशेषत्वं पारिशेष्यत्वं । क्रियारम्भकचणादिसिद्धिचरम-
कालपर्य्यन्तचणकालापन्नत्वं वर्त्तमानत्वं ॥

End. पदार्थानां साधने शक्तियोग्यता । एकवक्त्राविलम्बितोच्चारितत्वं सन्निधि-
मत्वं । बाधविरहश्च योग्यता । समाप्तश्चायं ग्रन्थः ॥ * ॥

Colophon. — — — — — —

विषयः । समवायादिसम्बन्धनिरूपणं । धातुविभक्त्यादिकथनं । करणाधिकरणादिकथनं ॥
आकाङ्क्षायोग्यतादिनिरूपणं ॥

---

**No. 259.** लक्षणातत्वं. By गङ्गेश . Substance, country-made paper, 15×3 inches. Folia, 3. Lines, 6 on a page. Extent, 60 ślokas. Character, Bengali. Date ? Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgīśa. Appearance, fresh. Prose. Generally incorrect.

Beginning. ॐ नमोगणेशाय । ॐ सरस्वत्यै नमः ।
नत्वा गुरुपदद्वन्द्वं परं ब्रह्मस्वरूपकं ।
क्रियते लक्षणातत्वं गङ्गेशेन सुधीमता ॥

---

**No. 260.** लक्षहोमकारिका . By नारायणभट्ट. Substance, country-made paper, 8×3 inches. Folia 2. Lines, 11 on a page. Extent, 34 ślokas. Character, Nāgara. Date Saṃvat 1783. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācāryya. Appearance, old. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।
अथ लक्षहोम कारिका
वैश्वसंगं पुरा × × × हलाचार्य्यसद्द्विजः ।
कुम्भीर × सचार्य्यर्त्विक् भद्रं मन्त्रं प्र × × द्विशेत् ॥

Colophon. सर्व्वकर्मसमाप्तिं च विप्राशीर्वचनानि च,
अयुतात् ये ग्रहमखे रुद्रादौ वासमण्डपे ॥
संकेतयारङ्गाख्येण भट्टनारायणेन च ॥

End. इति खरड़ोपनामकनारायणभट्टकृतः संक्षेपतो ग्रहयागः समाप्तः संवत् १७८३ .

विषयः । ग्रहयागविधिकथनम् .

---

No. 261. लघुसंक्षेपशारीरककुतूहलम्. By महादेव. Substance, country-made paper, 12×4 inches. Folia, 23. Lines, 9 on a page. Extent, 460 ślokas Character, Nāgara. Date Saṃvat 1766. Place of deposit, Benares City, Paṇḍit Govinda Bhaṭṭa. Appearance, old. Verse. Incorrect.

Beginning. इत्थं समन्वयश्योक्त्या वाक्यतो खण्डगोचरः ।
जातोपि बोधमानेन भेदकेन निपीड्यते ॥
मज्जत्यलाब्वपु शिलास्तरन्तीत्यादि वाक्यतः ।
जाताबुद्धिर्यथा वाह्याऽद्वैतबुद्धिस्तथात्मनि ॥
प्रत्यक्षो मम संसारो वाक्यमात्र विमुक्ततां ।
एवं वाक्यापरिज्ञाने दुर्निवाराह्यबाध्यता ॥
मम कर्त्तृत्वभोक्तृत्वे श्राह कर्मविधिर्महान् ।
वेदान्तानिर्विशेषत्वमाङः सत्प्रतिपक्षवत् ॥

End. धनेन बन्धुभि र्दारैः किन्ते यस्त्वं मरिष्यसि ।
गुहां प्रविष्टमात्मानं विजानीहि स्वतेःपुरा ॥
धनमूलं दमो दण्डं अर्थमूलं कलत्रमे ।
काममूलं वयोरूपं मोक्षमूलमुपारमः ॥

Colophon. वेदान्तिनामहादेवशर्मणा निर्मितेऽद्भुते,
तृतीयलघुसंक्षेपशारीरककुतूहले ॥
संवत् १७६६ पौष शुक्लपक्षो ।

विषयः । ब्रह्मविद्योदयकथनं ।

---

No. 262. "लघुसंग्रहणीटीका". Substance, country-made paper, 13×5 inches. Folia, 5. Lines, 11 on a page. Extent, 175 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Dikmaṇḍālācāryya Mahārāja Bālacandrasūri. Appearance, old. Prose. Correct.

Beginning. सकलवाचकोपाध्यायेभ्यो नमः ।
प्रणम्य परयाभक्त्या जिनेन्द्रचरणाम्बुजं ।
लघुसंग्रहणीटीकां करिष्येऽहं सुदाम्बरं ॥ इत्यादि ।

End. तिस्रो इष्टयः प्राप्त × × ते कोर्थः षोड्शदण्डकेषु तिस्रो इष्टयो भवन्तीत्यर्थः । इत्यमं इष्टिद्वारं व्याख्यातन्तत्समुच्चयार्थः ॥ ( इतो नास्ति . )

Colophon. — — — — — —

विषयः । जैनसिद्धान्तसारलघुसंग्रहणीव्याख्या ।

---

No. 263. लोकणालद्वात्रिंशिका. Substance, country-made paper, 12 × 4 inches. Folia, 4. Lines, 12 on a page. Extent, 60 çlokas. Character, Nāgara. Date ? Place of deposit, Benares City, Dikmaṇḍalacāryya Mahārāja Bālacandrasūri. Appearance, old. Verse. Correct.

Beginning. जिनं दंसनं विनाजं लोयं पुरंतु जम्म मरणे चिं ।
उकड जिम्रोनन्तभवे तस्स सरूवं किमवि वुच्छं ॥

End. इययरलिहिय वग्गिय सं वड्ढिया
लोगसार सुबलम्ब स्वयधम्म कित्तिय
नच जयइ जहा उवलहण इह डिसं ॥

Colophon. इति लोकणाल द्वात्रिंशिका ।

विषयः । जैनमते चतुर्दशलोकानां वर्णनम् ।

---

No. 264. लोकनालिकावचूर्णिः. Substance, country-made paper, 12 × 4½ inches. Folia, 7. Lines, 13 on a page. Extent, 160 ślokas. Character, Nāgara. Date Saṃvat 1651. Place of deposit, Benares City, Dikmaṇḍalācāryya Mahārāja Bālacandrasūri. Appearance, old. Prose. Correct.

Beginning. श्रीगुरुभ्योनमः ।
श्रीजिन सम्यक् शुद्धभावदर्शनं विना जो × × यं चतुर्दशरज्वात्मकलोकं पूरयन् अष्टविधपुद्गलपरावर्त्तं व्याप्त को × × तस्य लोकस्य स्वरूपं किमपि ब्रुवे ।

End. इह षट्पञ्चाशत्यंक्तिरुपैः प्रदरे लिखितः स च व × × तस्य वर्गीकृतः स × × तस्य वुध्या सर्व्वतः समचतुरस्त्रीकृतः । स च लोकस्य तस्य सारस्वरूपं उपलभ्य ज्ञात्वा तथा यतत इह न भ्रमन्ति इत्यमित्यर्थः ।

Colophon. इति लोकनालिद्वात्रिंशिकावचूर्णिः.

विषयः । लोकनालिकाव्याख्या ।

---

No. 265. वाञ्छाकल्पलतामनुविधानम्. Substance, country-made paper, 12 × 6½ inches. Folia, 2. Lines, 16 on a page. Extent, 52 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, old. Verse. Correct.

Beginning. पार्वत्युवाच ।

भगवन् सर्व्वमन्त्राश्च भवता मे प्रकीर्त्तिताः ।
तत्र विद्या गणेशस्य वाञ्छाकल्पलता मनुः ॥ १ ॥
सूचितः कृपया देव संगुप्तो न प्रकाशितः ।
इदानीं श्रोतुमिच्छामि सर्व्वलोकहिताय वै ॥ २ ॥

End. असाध्यं साधयेल्लोके अवश्यं वशमानयेत् ।
किमत्र बहुनोक्तेन सर्व्वान् कामानवाप्नुयात् ॥

Colophon. इति कुमारसंहितायां वाञ्छाकल्पलतामनुविधानं दशमः पटलः ।

विषयः । गणेशार्चनविधानं .

---

No. 266. वाञ्छाकल्पलताविधिः. Substance, country-made paper, 10 × 5 inches. Folia, 5. Lines, 12 on a page. Extent, 125 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, new. Prose. Correct.

Beginning. अस्य श्रीविद्यागणपतिमहामन्त्रस्य दक्षिणामूर्त्तिर्ऋषिरनुष्टुप् छन्दः श्रीमहाविद्यागणपतिर्देवता ऐं वीजं ह्रींशक्तिः सौ कीलकं मम चतुर्विधपुरुषार्थसिद्ध्यर्थं वाञ्छाकल्पलतायाः पूर्व्वं षोड़शाद्दत्तिमूलमन्त्रजपे विनियोगः ।

End. चासत्तनवये लक्ष्मीः पञ्चावृत्तौ जगद्वशं ।
दशावृत्तौ शिवादीनां देवानां शक्तिभाग्भवेत् ॥
लक्षावृत्तौ सार्व्वभौमो दरिद्रोऽपि भवेन्नरः ।
नार्थवादोऽथर्व्वणस्य वसिष्ठस्य वचो यथा ॥

Colophon. इत्याथर्व्वणरहस्ये वाञ्छाकल्पलताविधिश्चतुर्थः पर्य्यायः ॥

विषयः । महाविद्यागणपतेः पूजादिविधानं .

---

No. 267. वास्तुप्रदीप. Substance, country-made paper, $9 \times 4\frac{1}{2}$ inches. Folia, 21. Lines, 9 on a page. Extent, 400 slokas. Character, Nāgara. Date Samvat 1572. Place of deposit, Calcutta, Visvakoṣa office, Babu Nagendranāth Vasu. Appearance, old. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।
विद्वच्छाब्दिकसङ्गतोक्तिरचनैर्यद्वास्तुविद्यावता
मानन्दाभिगमो भवेन्मुनिमतः सज्ज्योतिषद्योतितः ।
तत् सम्प्रत्यपि वासुदेवसुधिया वास्तु प्रदीपाभिधो
ज्योतिर्व्वेदविदां विधीयत इति प्रत्यक्षदृग्बुद्धये ॥

End. सौम्येऽर्थलाभः शिवगेऽर्थसिद्धि
र्ग्रामे पुन र्ग्रामतस्तथैव ।
ग्रामेऽथवा यत्र पतङ्गसूनुः
पीड़ाकरोदृष्टिवशाद् द्वयोस्तु ॥
यत्रानिष्टफलः सौरिस्तत्र पूज्यः प्रयत्नतः ।
क्षेत्रभात् क्षेत्र × × देशभात् देशकर्म्मकं ॥
कराद्रिश्वरैः १५७१ प्रमिते शकाब्दे लिखे सिते चन्द्रदिने दशम्यां
वास्तुप्रदीपो रचितः सबुद्धा श्रीवासुदेवेन मगद्विजेन ॥ २० ॥

Colophon. इति श्रीवासुदेवपण्डितविरचितो वास्तुप्रदीपः समाप्तिमगमत् ॥

विषयः । गृहादिनिर्म्माणविधिकथनं तथा गृहद्वारादीनां फलकथनं ॥

---

**No. 268. वास्तुशान्तिपद्धतिः.** Substance, country-made paper, 8 × 3 inches. Folia, 30. Lines, 10 on a page. Extent, 600 ślokas. Character. Nāgara. Date Saṃvat 1834. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, old. Prose and verse. Correct.

**Beginning.** श्रीगणेशाय नमः ।

अथ वास्तुपद्धतिः ।

नत्वा गुरुं गणपतिं वास्तुप्रशमपद्धतिः ।

नानानिबन्धानालोक्य यथामतिरिहोच्यते ॥

तत्रादौ वास्तुफलं मात्स्ये ॥

**End.** जृम्भकाये मांसरुधिरोपि × × × × × × × × × अत्र निषिद्धग्रामसूकरादिमांसव्यतिरिक्तानि मांसानि ग्राह्याणि, एषामलाभे विप्राय माषभक्तम् ।

**Colophon.** इति क्षत्रियादीनां पौराणवास्तुशान्तिप्रयोगः । संवत् १८३४ ।

विषयः । वास्तूनां शान्तिप्रयोगकथनम् ॥

---

**No. 269. विधिरसायनम्.** Substance, country-made paper, 12 × 5 inches. Folia, 30. Lines, 11 on a page. Extent, 720 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa, Appearance, old. Prose. Correct.

**Beginning.** उद्घाट्य योगकलया हृदयाब्जकोषं

धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।

यः प्रस्फुरत्यविरतं परिपूर्णरूपः

स मे समादिशतु शाश्वतिकं मुकुन्दः ॥

जन्मस्थे सलयं समस्तजगतां यस्यैव लीलायितं

यस्मिन्नापतते भवस्थिरमहापापाशयः प्राणिनां,

तद्ब्रह्मादिभिरप्यगम्यविभवं विश्वाधिकं शाश्वतं

साम्बं ब्रह्मरसालमूलरसिकं पश्येयमन्तर्दृशां ।

यत् कुमारिलमतानुसारिणा निर्मितं विधिरसायनं मया,

यद्यरूपमनतिस्फुटाशयं तत् सुखावगतये विविच्यते ।

**End.** इति लभ्यते, तदेतत् सर्व्वं दशमे ऐन्द्रवायव × × × प्रवचनादादितः ( इतो नास्ति ) ।

**Colophon.** × × × × × × ।

विषयः । कुमारिलभट्टमतानुसारतोमीमांसादर्शनव्याख्या ।

( असम्पूर्णोऽयं ग्रन्थः )

---

**No. 271.** विल्वोपनिषत्. Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 11 on a page. Extent, 40 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, old. Verse. Correct.

**Beginning.** ओम् अथ वामदेवः परमेश्वरं सृष्टिस्थितिलयकारणमुमासहितं स्वशिरसा प्रणम्येतीदोवाच । अधीहि भगवन् सर्व्वविद्यां सर्व्वरहस्यवरिष्ठां सदा सद्भिः पूज्यमानां निगूढ़ां ।

**End.** ओम् सह नाववतु, सहनौ भुनक्तु । सहवीर्य्यं करवावहै तेजस्विनावधीत-मस्तु माविद्विषावहै । ओम् शान्तिः शान्तिः शान्तिः ।

**Colophon.** इति विल्वोपनिषत् समाप्ता ।

विषयः । विल्वेन शिवार्चनविधिकथनं ।

---

**No. 272.** विवाहवादार्थः । Substance, country-made paper, 12 × 3 inches. Folia, 3. Lines, 7 on a page. Extent, 84 ślokas. Character, Bengali. Date ? Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgīśa. Appearance, fresh. Prose. Generally correct.

**Beginning.** अथ विवाहवादार्थः । चरमसंस्कारानुकूलव्यापारो विवाहः । अत्र चरमत्वं स्वावच्छेदकशरीरावच्छिन्नस्वाधिकरणवृत्तिसंस्कारप्रागभावसमानकालीनत्वं तेन न नामकरणादावतिव्याप्तिः । अत्र चान्यदीयसंस्कारमादायासम्भववारणार्थं स्वाधिकरणवृत्त्यन्तं । अवच्छिन्नान्तनिवेशाच्च जन्मान्तरीयसंस्कारमादाय नाव्याप्तिः । इत्यादि ।

**End.** स्वरूपसता विवाहजन्यतारूपविशेषणरहितेन विवाहजन्यतावच्छेदकी-भूतसंस्कारनिष्ठविलक्षणधर्म्मेण विशेषणत्वेन स्वीकारव्यावर्त्तकत्वेनेत्यर्थः । ब्राह्माद्यष्टत्यागानन्तरं ताहशग्रहणमेव विवाह इति चेन्न ताहशग्रानासमर्थ-बालकादेर्विवाहेऽव्याप्तिरिति ।

Colophon. इति विवाहवादार्थः समाप्तः ।

विषयः । विवाहस्य तात्पर्य्यप्रदर्शनपुरःसरं सम्यगर्थप्रकाशनं ।

---

No. 273. विष्णुतत्वनिर्णयटीकाविवरणम् ॥ Substance, country-made paper, 10 × 3 inches. Folia, 85. Lines, 11 on a page. Extent, 2,000 slokas. Character, Nāgara. Date ? Place of deposit, Tikāri Fort, Paṇḍit Šāstrī. Appearance, very old. Prose. Incorrect.

**Beginning.** श्रीवेदव्यासाय नमः ॥

योऽद्येतत् सकलं जगत् प्रकृतिमुपादाय रजसा ।
सृजति तदनुप्रविश्य सकलं सत्वेन संरक्षति ॥
यो ह्येदं सकलं गुणेन तमसा संहर्तुमुद्योतते ।
तं क्रीडादिगुणं परं प्रियतमं वन्दे श्रियासंयुतं ॥
सज्जनाभीष्टमज्ञानविनाशायाकरोद्बुधः ।
भाष्येदं तमहं मध्वाचार्य्यं वन्दे गुरुं परं ॥
श्रीमज्जयतीर्थपूज्यचरणो ग्रन्थादौ मङ्गलमाचरति विश्वस्येति ॥ अहं रमावल्लभं वन्द इत्यर्थः ग्रन्थारम्भे वाग्व्यापारस्यापेक्षितत्वात् तस्य वन्दनस्यावश्यकर्त्तव्यत्वात् पार्थक्येन वन्दने स्वातन्त्र्यप्रतीतिः स्यात् तदर्थं रमावल्लभमित्युक्तं ।

**End.** अतएव रजतत्वविशिष्टस्य रजतस्य स्वज्ञावारोप इति रजतत्वं तत्र मुख्यं मत्वौपचारिकमिति प्रसिद्धमितिभावः । प्रादुर्भावस्योत्पत्तिशब्दार्थत्वं गौणमित्यस्येत्याह प्रादुर्भाव इति ॥

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादाचार्य्यविरचितस्य विष्णुतत्वनिर्णयस्य टीकायाविवरणं द्वितीयः परिच्छेदः ॥

विषयः । आनन्दतीर्थकृतविष्णुतत्वनिर्णयस्य टीकाया व्याख्यानं ।

---

No. 274. विष्णुतत्वप्रकाशः Substance, country-made paper, 12 × 5 inches. Folia, 85. Lines, 11 on a page. Extent, 2,800 slokas. Character, Nāgara. Date ? Place of deposit, Tikāri Fort, Paṇḍit Vāmācāri Šastri. Appearance, tolerable. Prose. Generally correct.

**Beginning.** श्रीकृष्णाय नमः ॥

श्रीवक्षोजयुगे यदङ्घ्रिकमलं संधातुकामा सदा
यस्याज्ञां शिरसा वहन्ति विबुधा ब्रह्मेशशक्रादयः
योगीशा मनसार्चयन्ति यमजं संशोधितेनानिशं
गोप्याबद्ध उलूखले तिवशोऽव्यन्मोमुकुन्दोहि सः ।
श्रीव्यासं मारुतिं वन्दे मयि मद्दनदीक्षितं ।
जयाख्यं तान्त्रिकाचार्य्यं तथान्यान् सात्वतां वरान् ॥
पादाब्जं श्रीगुरोर्नत्वा श्रायते वनमालिना ।
विष्णुतत्त्वप्रकाशोऽयं प्रीतये कमलापतेः ॥
इह निखिल श्रुतिस्मृतीतिहासपुराणानि तात्पर्य्यनिर्णयकोपक्रमादि-
लिङ्गोपेतानि सपञ्चरात्राण्यपुनर्भवमिच्छतां पुंसां ध्येयं ज्ञेयं रमापतिमेक-
मत्येनामनन्ति । इत्यादि ॥

**End.** वर्षे वर्षे महादेवि परानारी पतिव्रता शिवरात्रौ महादेवं नित्यं भक्त्या
प्रपूजयेदिति वीप्साश्रुतेर्नेदं व्रतं नित्यमिति चेन्न अत्रहि शिवरात्रौ शिव
पूजैवोक्ता न तु व्रतमित्यनित्यमेव व्रतमिति ॥ * ।
प्रकाशे विष्णुतत्त्वस्य रचिते वनमालिना ।
परिच्छेदो द्वितीयोऽयं समाप्तस्त्वाच्युतेच्छया ॥ * ॥
श्रीगोविन्दविहारभूषितभुवो हृन्दावनात् प्राग् दिशि
क्रोशानां त्रियुगे पुरे द्विजवरा उच्चैर्भरद्वाजजाः
श्रीसन्नाहमुचो वसन्ति सुकुले तेषा प्रसूतेन वै
पूर्णः श्रीवनमालिना विरचितो विष्णुप्रकाशोमुदा ॥
× × × × × ×
क्रियात्सुवैभवं वाचामघराशेश्च शोधनं ॥

**Colophon.** — — — — —

विषयः । १ परिच्छेदे श्रुतिस्मृतीतिहासपुराणवचनादिभिः शिवादितो विष्णोर्भेदकथनेन तन्माहात्म्यादिकथनं ॥ २ परिच्छेदे सर्व्वदेवेषु विष्णोराराधनीयत्वकथनेन पञ्चरात्रविधानादि-कथनं ॥ विप्राणां त्रिपुण्ड्रधारणे दोषकथनं ॥ एकादशीश्राद्धे दोषकथनं ॥ शिवरात्रिव्रता-नित्यत्वकथनेन तस्मिन् वैष्णवानामनधिकारकथनं ॥

---

No. 275. विष्णुतत्वविनिर्णयः. Substance, country-made paper, 10×4½ inches. Folia, 26. Lines, 9 on a page. Extent, 400 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीवेदव्यासाय नमः ।
सदा गणेकविज्ञेयं समतीतचराचरं ।
नारायणं सदावन्दे निर्दोषाशेषसद्गुणम् ॥
विशेषणानि यानीह कथितानि सदुक्तिभिः ।
साधयिष्यामि तान्येव क्रमात् सज्जनसंविदे ॥

End. स्वतन्त्रायाखिलेशाय निर्दोषगुणरूपिणे ।
प्रेयसे मे सुपूर्णाय नमो नारायणाय ते ॥

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादाचार्य्यविरचिते श्रीमद्विष्णुतत्त्वविनिर्णये तृतीयः परिच्छेदः समाप्तः ।

विषयः । माध्वमते विष्णोर्याथार्थ्यनिर्णयकथनम् ॥

---

No. 276. विष्णुसहस्रनाम (कुलानन्दसंहितीयं) । Substance, country-made paper, 15×3½ inches. Folia, 6. Lines, 9 on a page. Extent, 200 ślokas. Character, Bengali. Date S.K. 1778. Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā, Late Paṇḍit Rāmtāran S'iromaṇi. Appearance, fresh. Verse. Generally correct.

Beginning. ॐ नमो भगवते वासुदेवाय । श्रीदेव्युवाच ।
भगवन् सर्व्वमन्त्राश्च भवता मे प्रकाशिताः ।
चतुःषष्ठिश्च तन्त्राणि मातृणामुत्तमानि च ॥
कलापदं कलासारं तथान्यत् कुब्जिकामतं ।
नामान्तरञ्च यौनाख्यं तोतलं तोतलोत्तरं ॥
... ... ... ... ... ... ।
भवतोक्तानि मे देव सर्व्वज्ञानमयानि च ॥
विष्णोर्नामसहस्रञ्च मया दृष्टं मुहुर्मुहुः ।
न कथ्यते कथं देव जगन्मोक्षप्रदायकं ॥ इत्यादि ।

End. इतीदं कथितं देवि विष्णोर्नामसहस्रकं ।

यदं सदाशिव खोभो यतः सर्व्वप्रवर्त्तको ॥

× × × × × ×

तामेव विद्यां मनसि कृत्वा शङ्करमागता ।
सर्व्वं दृत्तमशेषेण शङ्कराय न्यवेदयत् ॥
तच्छ्रुत्वा परमप्रीतो देवो देवीञ्च सस्वजे ।
रहस्यंकथितं सर्व्वं भैरवि प्राणवल्लभे ॥

Colophon. इति कुलानन्दसंहितायां चत्वारिंशत्साहस्र्यां भैरवभैरवीसंवादे महाप्रकृतिनिरुक्तं श्रीविष्णोर्नामसहस्रं समाप्तं ॥ ॐ तत्सत् । लिपिरियं श्रीरामतारणशर्म्मणः । वीरभूमौ सिउड़िग्रामे त्वरया यत्नेन लिखितंमिदं । शकाब्दाः १०७८ ज्येष्ठस्य ११ दिवसे ।

विषयः । श्रीविष्णोः सहस्रनाम कथनं ।

---

**No. 277.** विष्णुसहस्रनामभाष्यं । Substance, country-made paper, 16×3 inches. Folia, 50. Line, 8 on a page. Extent, 1,200 ślokas, Character, Bengali. Date S.K. 1778. Place of deposit, Zilla Midnapur. Post Garvetā, Grām Khunverā, Late Paṇḍit Rāmtāraṇ S'iromaṇi. Appearance, fresh. Prose. Correct.

Beginning. ॐ नमः श्रीकृष्णाय ।

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥
कृष्णद्वैपायनं व्यासं सर्व्वलोकहितेरतं ॥
वेदान्तभास्करं वन्दे समाधिनिलयं मुनिं ॥
सहस्रमूर्त्तेः पुरुषोत्तमस्य
सहस्रनेत्राननपादबाहोः ।
सहस्रनामस्तवनं प्रशस्तं
निरुच्यते जन्मजरादिशान्त्यै ॥

श्रीवैशम्पायनो जनमेजयमुवाच । श्रुत्वाधर्म्मानित्यादि ॥ इत्यादि ।

End. इमं स्तवमित्यादिना सहस्रशाखाग्रेन भगवता कृष्णद्वैपायनेन साक्षान्नारायणेन कृतमिति सर्व्वैरर्थिभिः सादरं पठितव्यं सर्व्वफलसिद्धये इति दर्शयति ।

प्रमादात् कुर्व्वता कर्म्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति स्मृतिः ॥
आदरेण यथा स्तौति धनवन्तं यथेच्छया ।
तथाचेद्विश्वकर्त्तारं को न मुच्येत बन्धनादिति ॥
सहस्रनामसम्बन्धिव्याख्या सर्व्वसुखावहा ।
श्रुतिस्मृतिन्यायमूला रचिता हरिपादयोः ॥
चक्रायुधस्य नामानि सदा सर्व्वत्र कीर्त्तयेत् ।
नाशौचं कीर्त्तने तस्य स पवित्रकरो यतः ॥
सहस्रनामव्याख्येयं ब्रह्मज्ञानप्रदीपिका ।
शङ्कराचार्य्यभगवत् पादाचार्य्येण निर्म्मिता ॥

Colophon. इति श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीशङ्करभगवत्कृतौ श्रीविष्णोः सहस्रनामभाष्यं सम्पूर्णं । शुभमस्तु शकाब्दाः १७१८ ।

विषय । श्रीविष्णोः सहस्रनामव्याख्यानं ।

---

**No. 278.** वीजवर्णाभिधानटीका. BY गौरमोहनभट्टः. Substance, country-made paper, 14×4 inches. Folia, 4. Lines, 9 on a page. Extent, 110 ślokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grām Medrā, Babu Pārvatī Caraṇa Bhaṭṭāchāryya. Appearance, old. Prose. Correct.

Beginning. ॐ नमः परदेवतायै ।

आदौ प्रथमतः वीजवर्णानां वीजानिच वर्णाश्च ते × × × × × × × × स्फुटं व्यक्तं यथा स्यात् तथा उच्यते कथ्यते तत्र × × × ग्रन्थं प्रवर्त्तयेत् प्रवर्त्तयतीत्यर्थः तु अन्ते यस्य स लन्तः अथ आदौ यस्य सोऽयादिः लन्तोऽयादिश्च न पूर्व्वभाक् पूर्व्वं न भजतीत्यर्थः । प्रतिज्ञावचनानन्तरं सामान्याक्षरनामाद्यष्टवर्गलक्षणमाह वर्णोऽक्षरमित्यादि वर्णाद्यर्णान्तचतुष्कं सामान्याक्षरे स्वरादिद्वयं स्वराक्षरे ककारादिमकारपर्य्यन्तं पञ्च पञ्च भूत्वा वर्गाः स्युः परं यादिवान्तचतुष्कं शादिहान्तचतुष्कञ्च क्रमेण वर्गद्वयं स्यात् । इत्यादि ।

End. मायाया वीजत्वेन कामवीजं वा कामादीनां वर्णतया तत् साहचर्य्यात् मायाया तृतीयस्वरत्वपाठाच्च परन्तु गुरुपदेशवचनान्तरैकवाक्यत्वेन

तात्पर्य्यमवगत्य अवश्यमेवं अन्यथा "लक्ष्मीः परा × × × योनि-युता च शक्ति"रितिषोड़श्याः परापदेन वा न परावीजं मायावीजं वा ग्राह्यं इत्यत्र न नियामकः स्यात् ।

Colophon. इत्युपेन्द्रभट्टवंशीयश्रीगौरमोहनभट्टरचिता वीजवर्णाभिधानटीका समाप्ता ।

विषयः । वीजवर्णाभिधानस्य व्याख्यानं ।

---

No. 279. वीरमाहेन्द्रकाण्डं. Substance, country-made paper, 14×5 inches. Folia, 10. Lines, 10 on a page. Extent, 370 slokas. Character, Bengali. Date ? Place of deposit, Dinājpura Rāj Vātī. Appearance, new. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ॥

अथ वाचं निशम्यायं स्कन्दस्तां गुरुणोदितां ।
वीच्यैनं करुणादृष्ट्या तिष्ठेत्याह तदा द्विजाः ॥

End. गत्वा तु मधुना तात जित्वा सर्व्वानिमान् क्षणात् ।
बद्धा तं सहसैनाभिः प्रापयिष्यामि ते ऽन्तिकं ॥
निशम्यैवं वचःप्रोक्तं सुपुत्रेण तदासुरः ।
सन्तुष्टो विससर्जैनं वनायासुरनायकः ॥ * ॥

Colophon. इति श्रीस्कन्दपुराणे शङ्करसंहितायां शिवरहस्यखण्डे वीरमाहेन्द्रकाण्डे सप्तमोऽध्यायः ॥ * ॥ वीरमहेन्द्रकाण्डं समाप्तं ॥

विषयः । असुरादीनां वीरत्वप्रकटनं ।

---

No. 280. वृत्तरत्नावली. By चिरंजीव. Substance, country-made paper, 13×4½ inches. Folia, 11. Lines, 8 on a page. Extent, 187 slokas. Character, Nāgara. Date S'aka 1653. Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, old. Verse. Correct.

Beginning. तमोगुणविनाशिनी सकलकामसूद्योतनी ।
धरातलविहारिणी जड़समाजविद्वेषिणी ॥
कलानिधिसहायिनी लसदलोलसौदामिनी ।
मदन्तरवलम्बिनी भवतु कापि कादम्बिनी ॥ १ ॥

श्रीगोवर्द्धनभूपनन्दन तव प्रोद्दाम वीरस्फुरत्
संग्रामे यशवन्तसिंहमहिमारम्भातिसंभावनां ॥
सद्यश्छिन्नकबन्धकन्धरगलद्धाराभरामोदिता ।
साचण्डी सहयोगिनीभिरभितः सम्बर्द्धयत्याशिषा ॥ १ ॥

End. द्वैताद्वैतमतादिभिर्नयविधिप्रोद्बुद्धबुद्धिः सुतो ।
भट्टाचार्य्यशतावधान इति यो गौड़ोत्भवोभूत् कविः ॥
नानाशास्त्रविदात्मजेन सुचिरंजीवेन दत्ता मुदे ।
गौड़श्रीयशवन्तसिंहनृपतेः श्रीवृत्तरत्नावली ॥

Colophon. इति श्रीचिरंजीवेन शतावधानभट्टाचार्य्यात्मजेन विरचिता वृत्तरत्नावली समाप्तिमिता । शकाब्दाः १६५२ .

विषयः । छन्दोग्रन्थः .

---

No. 281. वृद्धिश्राद्धपद्धति. By अनन्तदेव. Substance, country-made paper, 12 × 5 inches. Folia, 61. Lines, 10 on a page. Extent, 1220 slokas. Character, Nāgara. Date Saṃvat 1764. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीमहागणपतये नमः ।

नत्वा श्रीगुरुपादाब्जं वृद्धिश्राद्धस्य पद्धतिं ।
उद्धवस्य तनुजोहं करोमि शिष्टसम्मतां ॥
विविधः + + + संप्रदायमतां तथा ।
माध्यन्दिनीयविधिना शोधयन्तु धिया बुधाः ॥

End. श्रीशम्भोश्चरणद्वन्द्वमाधाय हृदयाम्बुजे
श्रीउद्धवतनूजेन विश्वेशपुरवासिना ।
रचितोऽनन्तदेवेन वृद्धिश्राद्धविनिर्णयः
गुरवः + + तुष्यन्तु विद्वांसश्च तथा मयि ॥

Colophon. इति श्रीमद्द्विवेदुद्धवात्मजानन्तदेवकृतं आभ्युदयिकनिरूपणं समाप्तिमगमत् . संवत् १७६४ . आषाढ़शुक्लाष्टम्याम् ।

विषयः । वृद्धिश्राद्धविध्यादिकथनम् ।

---

**No. 282.** **वृन्दावनकाव्यटीका .** By **रामनारायण .** Substance, country-made paper, 13×3½ inches. Folia, 10. Lines, 9 on a page. Extent, 250 ślokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grām Bhaṭṭagrām, Paṇḍit Rāmhṛdaya Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

**Beginning.** श्रीदुर्गायै नमः ।

नत्वा नन्दव्रजानन्दपरं गोपालरूपिणं ।
परमानन्दसन्दोहकरं गोपश्वरं हरिं ॥
यमकश्लेषचित्रार्थपताकाखान्द्रशेखरिः । (?)
रामनारायणः श्रीमान् जयेत् यष्टीकथाकरोत् ।
वृन्दावनाख्यकाव्यार्थं स्फुटं मालाङ्कभाषितं ॥
रामनारायणो ग्राह्यो बुधैर्न दोषचिन्तया ।
नहि सर्व्वार्थवित् कश्चित् जायते मानुषोभुवि ॥

मालाङ्कनामा कविः श्रीकृष्णस्य बृन्दावनलीलां विविधयमकश्लेषवर्णनेन प्रकाशयन् बृन्दावनाख्यकाव्यनामतया निदर्शनीकृत्य काव्यविघ्नविनाशनरूपतया तम्मुखवन्धतयाच प्रथमं कृष्णरतिरूपमङ्गलमाह । वरदायेति । इत्यादि ।

**End.** स प्रसिद्धो हली वलरामः तं प्रसिद्धं पीतवाससं श्रीकृष्णं इति वचनमाह कथितवान् कुर्वेत्याह पद्मनतां गोपानां × × × × रटे हली कीदृक् आयतनेत्रः दीर्घचक्षुः तं कीदृशं कंसासुरादनुद्विग्नं अशङ्कितमिति यावत् पुनः कीदृक् किं कुर्व्वन् या हसितानां विमलतया दशनैर्दन्तैर्लाजानां (खद) इति प्रसिद्धानां छायां कान्तिं किरन्निव क्षिपन्निव कीदृशानां सहलीलाजानां लीलया सहजातानां ॥

**Colophon.** वाणपञ्चरसचन्द्रमिश्रिते
कृष्णचन्द्रपरचान्द्रशेखरिः ।
कल्पास्तु तर्केन्दुमिते शकाब्दे
श्रीरामनारायण देवशर्म्मा ॥
टीकां समुद्ग्रथ्य करोति यत्नै-
राषाढ़मासस्य मुदा समग्रां ।
श्रीरामनारायण देवशर्म्मा
काव्यार्थमालोक्य करोति यत्नं ॥

नचात्र दोषः कविभिर्विमृश्यः ।

सन्तःसतां जीवनमाङ्ग × × ॥ श्रीदुर्गा ॥

विषयः । मालाङ्कृतश्रीकृष्णलीलामयवृन्दावनकाव्यस्य व्याख्यानं ॥

---

No. 283. वेदस्तुतिभावार्थदीपिकादीपनं By राधारमणदास. Substance, country-made paper, 11 × 5½ inches. Folia, 19. Lines, 13 on a page. Extent, 700 slokas. Character, Bengali. Date ? Place of deposit, Dinājpur, Paṇḍit Krisṇadāsa Smṛtibhūṣaṇa. Appearance, new. Prose. Correct.

**Beginning.** श्रीकृष्णचैतन्यचन्द्राय नमः ।
श्रीचैतन्यं न्टसिंहं मुरारिं
विद्वद्वर्य्यं श्रीधरं भक्तमुख्यं ।
मिश्रं चन्द्रं गोकुलोपाधिकञ्च
नत्वा कुर्व्वे व्याकृतिं व्याकृतेस्तां ॥
राधारमणदासेन राधारमणसेविना ।
श्रुतिस्तुतेः स्वामिटीकाव्याख्यानं क्रियते ऽद्भुतं ॥ इत्यादि ।

**End.** उपनिषद्भिर्नीराजिते पदाम्बुजे यस्य तं, कर्म्मिणो भजनेन भोगप्रदं, नचस्य योगप्रदं, "ददामि बुद्धियोगं तं येन मामुपयान्ति" । इति गीतोक्तेः ॥
गोवर्द्धनोपालस्य पुत्रः श्रुत्यर्थसम्भवं ।
राधारमणदासोऽयं व्याख्यानमकरोन्मुदा ॥
कृष्णगोविन्दमिश्रेण राधारमणदासेन दीपिकादीपनं कृतं ॥

**Colophon.** इति श्रीभागवते दशमस्कन्धे श्रुतिस्तुतौ भावार्थदीपिकादीपने सप्ताशीतितमोऽध्यायः ॥

विषयः । स्वामिकृत-भागवतदशमस्कन्धीय-श्रुतिस्तुतिव्याख्याया भावार्थदीपिकाया व्याख्यानं ।

---

No. 284. वेदान्तसिद्धान्तमुक्तावली By वनमाली. Substance, country-made paper, 9 × 4½ inches. Folia, 146. Lines, 12 on a page. Extent, 4,500 slokas. Character, Nāgara. Date S.M. 1873. Place of deposit, Ṭikāri, District Gayā, Paṇḍit Vāmācārī. Appearance, tolerable. Prose. Correct.

Beginning. प्रथमपत्रं नास्ति तेन द्वितीयपत्रप्रारम्भो लिखितः ॥
तदर्थं विचारविशेषविषयादिकं न सम्भवति उत सम्भवति, तदर्थं विषयी-
भूतब्रह्म जीव एव उतान्यदिति । यदि प्रत्यग्भूतो जीवस्तदा तस्य निश्चित-
त्वेन विषयाभावादनारम्भनीयं शास्त्रं यद्यन्यद्ब्रह्म तदा तस्यानिश्चितत्वेन
विषयसम्भवाच्छास्त्रमारम्भनीयमिति ॥ इत्यादि

End. कृतनिगमविभागं योगिभिः सेविताङ्घ्रिं
धृतमुनिवरवेशं वासुदेवांशमीड्यं ।
यतिगुरुमरदेशं श्रीमदानन्दतीर्थं
मतिनिधिजयतीर्थं व्यासतीर्थञ्च वन्दे ॥
श्रीगोविन्दविहारभूषितभुवो वृन्दावनात् प्राग्दिशि
क्रोशानां त्रियुगे सुभुविये? विप्रा भरद्वाजजाः ।
श्रीसन्नाद्मसुचो वसन्ति सुकुले तेषां सुजातेन वै
वर्णिश्रीवनमालिना श्रुतिनये वृत्तिः समाप्ता कृता ॥

Colophon. इति श्रीवनमालिविरचितायां वेदान्तसिद्धान्तमुक्तावल्यां चतुर्थाध्यायस्य
चतुर्थः पादः ॥ शुभमस्तु संवत् १८७२ ॥

विषयः । जीवब्रह्मनिरूपणं ॥ जीवब्रह्मणोरभेदज्ञाने मुक्तिरित्याद्युपन्यासेन मुक्ति
स्वरूपादिनिरूपणं ॥

---

No. 285. वेदिपद्धतिटीका By मयूरेश. Substance, country-made paper, 10×3 inches. Folia, 20. Lines, 13 on a page. Extent, 520 ślokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanāeāryya. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।
ढुण्ढिं विश्वेश्वरं विष्णुं नत्वा देशिककाशिकां ।
मयूरेशः प्रकुरुते वेदिपद्धतिकाशिकां ॥ टीकामिति शेषः ॥

End. यथामति कृता व्याख्या सुबोधा वेदिपद्धतेः ।
विचार्य्य साध्वसाध्वत्र शोधनीयं प्रयत्नतः ॥

Colophon. इति श्रीमौद्गल्यगोत्रान्वयद्रूपनमोघेलुपनामकगोपालोपाध्यायसुतपुरुषोत्तमो-
पाध्यायात्मज मयूरेश्वरोपाध्यायविरचिता स्वकृता वेदिपद्धतिटीका सम्पूर्णा।

विषयः । यज्ञवेदिनिर्माणपद्धतिव्याख्या ।

---

No. 286. वैद्यकसारः (शंकराख्यः) By रामचन्द्र. Substance, country-made paper, 6×5 inches. Folia, 9. Lines, 15 on a page. Extent, 180 ślokas. Character, Nāgara. Date S'aka 1725. Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, old. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।

स्वास्थ्यं लोके शरणममलं देववैद्याश्विनौ तौ ।
रोगग्रस्तो वदति कृपया पाहि मां रोगसिन्धौ ॥
तस्मै दद्यादभयमिति तं वैद्यधन्वन्तरिश्च ।
नत्वा रामोऽखिलसुखकरं शंकराख्यं प्रवक्ष्ये ॥
दूतः प्रश्नो हृदयकलना नाड़िकारोगलक्ष्य ।
मद्यं दाहो वमनविमलं स्वेदनं स्वेदनं च ॥

End. गायन्तौ शतशृङ्गशैलशिखरे श्रीचण्डिका संस्तुतैः ।
श्लोकै वैद्यकसंज्ञकैः सुललितैर्दृष्टैर्विचित्रैः शतैः ॥
भक्तानां गदनाशनाय विमलस्तुत्या मया प्रार्थिता ।
दत्तं शास्त्रमिदं धुनन्तु यशसा श्रीशंकराख्यं शुभं ॥

Colophon. इति रामचन्द्रविरचिते शंकराख्यवैद्यकसारः समाप्तः ।

विषयः । संक्षेपेण साधारणरोगाणां उपशमोपायकथनं ।

---

No. 287. वैयासिकन्यायमाला, सटीका, (वेदान्ताधिकरणमाला) By भारतीतीर्थमुनि । Substance, country-made paper, 11×5½ inches. Folia, 76. Lines, 12 on a page. Extent, 3,000 ślokas. Character, Nāgara. Date Saṃvat 1814. Place of deposit, Ṭikāri, District Gaya, Paṇḍit Vāmācāri Śāstri. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणं ।
वैयासिकी न्यायमाला श्लोकैः संगृह्यते मया ॥
एको विषयसन्देहपूर्व्वपक्षावभासकः ।
श्लोकोऽपरस्तु सिद्धान्तवादी सङ्गतयःस्फुटाः ॥
शास्त्रेऽध्याये तथापादे न्यायसङ्गतयस्त्रिधा ।
शास्त्रादिविषये ज्ञाते तत्तत् सङ्गति रुह्यताम् ॥ इत्यादि ।

श्रीगणेशाय नमः ।

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणं । इत्यादि ॥

प्रारीप्सितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्तये ।

× × × प्रणम्येति व्यासेन प्रोक्ता वैयासिकी × वेदान्तवाक्यार्थ-निर्णायकान्यधिकरणानि न्यायास्तेषामनुक्रमेण ग्रथनं माला ॥ इत्यादि ।

End. स्रष्टावप्रकृतत्वेन स्रष्टृता नास्ति योगिनाम् ।
स्वाराज्यमीशेभोगाय ददौ मुक्तिञ्च विद्यया ॥
ईश्वरो ह्युपासनया तोषितस्तेषां भोगमात्रसिद्धये
स्वाराज्यं ददौ, मुक्तिञ्च तत्त्वविद्योत्पादनेन ददौ ।
तस्मात् जगत्सृष्टौ स्वातन्त्र्याभावेऽपि भोगमोक्षयोस्तेषां स्वातन्त्र्यमस्ति ॥

Colophon. इति श्रीमत् परमहंसपरिव्राजकाचार्य्य-श्रीभारतीतीर्थमुनिप्रणीतायां वैयासिकन्यायमालायां चतुर्थाध्यायस्य चतुर्थः पादः ॥ समाप्ता वेदान्ताधि-करणमाला । संवत १८१४ ॥ * ॥

विषयः । श्लोकेन ब्रह्मसूत्रस्याधिकरणादिनिरूपणं ॥ निरूपिताधिकरणस्य व्याख्यानञ्च ॥

---

**No. 288.** वैश्वदेवप्रयोगः By दुण्ढि. Substance, country-made paper, 10×4 inches. Folia, 2. Lines, 10 on a page. Extent, 35 ślokas. Character Nāgara. Date Saṃvat 1855. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।
अथ वैश्वदेवप्रयोगः ।

पञ्चमहायज्ञानाञ्चात्र वैश्वदेवमिति कर्मनामधेयं, एतच्च पञ्चमहायज्ञस्यान्न पृथग्भूतमिति हरदत्तः, तन्न प्रकरणभेदात् संज्ञाभेदः ; यथा, तत् तथाचै-तदिति सुदर्शनाचार्य्यः । इत्यादि ।

End. तत्र श्लोकः.

द्वावेकं द्वौच चतुरः प्रत्येकं तु त्रयं दश ।
प्रसव्येनैकमेकं तत् परिषिञ्चेद्बलीनिव ॥ इति .

Colophon. इति वैश्वदेवपञ्चमहायज्ञानां प्रयोगो दशपुत्रिढुण्ढिविरचितः समाप्तः । संवत् १८५५ । पौषवदि ।

विषयः । वैश्वदेवविधिः.

---

**No. 289.** वैश्वानरोपनिषद् . Substance, country-made paper, 9 × 4½ inches. Folia, 2. Lines, 11 on a page. Extent, 65 ślokas. Character, Bengali. Date ? Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgīśa. Appearance, fresh. Prose. Generally correct.

**Beginning.** ॐ वैश्वानरः प्रपद्ये जातवेदा मम शान्तिं प्रयच्छतु । दारेषु पुत्रेषु धनेषु हस्त्यश्वरथमनुष्येषु गोषु ग्रामेषु नगरेषु स सप्तार्च्चिः सप्तजिह्वः सद्दिमुखः स ध्रुवधारी सर्व्वदेवानां मुखं स सर्व्वभुक् स विष्णुः स ब्रह्मस्वरूपस्य शुक्ल-भास्वररूपस्य शान्तिं करोति । इत्यादि

**End.** एतदुपनिषद्धीयानः सर्व्वान् कामानवाप्नोति सर्व्वान् पापान् नाशयति ब्रह्महत्यायाः पूतो भवति सुरापानात् पूतो भवति दीर्घायुराप्नोति धनधान्येन समृद्धो भवति सर्व्वं वश्यतामाप्नोति । ॐ तत् सत् ।

**Colophon.** इति वैश्वानरोपनिषत् समाप्ता ।

---

**No. 290.** वैष्णवचन्द्रिका By रामानन्द and वनमाली । Substance, country-made paper, 11 × 3 inches. Folia, 4. Lines, 7 on a page, Extent, 130 ślokas. Character, Bengali. Date ? Place of deposit. Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarka-vāgīśa. Appearance, fresh. Verse. Generally correct.

**Beginning.**

संसारार्णवमज्जमानपुरुषत्राणाय गोलोकतो ।
ह्याविर्भूत इह स्वयं सुपरमे वृन्दावने लीलया ॥
श्रीकृष्णः सह राधया परिचरै र्नन्दादिभिर्यः कलैः ।
सर्व्वो मद्धृदये सदा निवसतात् कारुण्यमालम्ब्य सः ॥
श्रीराधाकृष्णयोरादौ स्वस्वरूपप्रदर्शनं ।
कारण्ञावतारे तत् प्रापणे भक्तिलक्षणं ॥
भक्तानां लक्षणं पश्चात् प्रवृत्तादिप्रभेदतः ।
पुराणादिकशास्त्रेभ्यस्तन्त्रसारादिसंग्रहात् ॥
समुद्धृत्य मतात् कृत्स्नात् संक्षेपात् तद्विरच्यते ।
न्यायवागीशविख्यातश्रीरामानन्दशर्म्मणा ॥ इत्यादि ।

**End.**

देवान् पितॄन् विप्रगणान् प्रणम्य
प्रातः समुत्थाय गुरोः पदाब्जं ।

ध्यात्वा हृदन्तर्हरिनाम कीर्त्तयन्
सानन्दचित्तोविहरेत् क्षितौ गृही ॥
धर्म्मानशेषान् परिहाय वैष्णवस्त्यक्ताश्रमः श्रद्धनाथ नाथं ।
गोलोकनाथं सह राधया हृदा विभाव्य दास्यं परतोऽस्य याति सः ॥
मृत्योः प्राग्दिवसे समाप्तिमगमत् स्वल्पावशिष्टः श्रिया
रामानन्दविपश्चिता तदनु तच्छात्रेण यत्नादयं ।
ग्रन्थः श्रीवनमालिनामवसुना कार्य्योऽवशिष्टस्ततो
द्वाभ्यां वैष्णवचन्द्रिकाख्यतमयी सम्पूर्णता सागता ॥

विषयः । वैष्णवकर्त्तव्यक्रियाकलापनिरूपणम् ।

---

**No. 291.** व्यवस्थासंग्रहः By अनिरुद्ध. Substance, palm leaves, 13×2 inches. Folia, 108. Lines, 5 on a page. Extent, 1,700 ślokas. Character, Bengali. Date ? Place of deposit, Dinājpur, Babu Giriś Candra Cakravartti, Pleader. Appearance, very old. Prose and Verse. Correct.

**Beginning.** प्रणम्य पुण्डरीकाक्षं पूर्व्वाचार्य्यप्रवर्त्तिताः ।
व्याख्या मन्वादिशास्त्राणां समालोच्य विविच्यते ॥
विशुद्धिरनिरुद्धेन स्वबोधविभवावधि ।
बोधार्थमल्पबुद्धीनां प्रबुद्धानाञ्च × × × ॥

मनुः ॥

जातदन्तोऽनुजाते च कृतचूड़े च संस्थिते ।
अशुद्धा बान्धवाः सर्व्वे सूतके च तथोच्यते ॥
जातदन्तादनुपश्चाज्जातोऽनुजातदन्त इत्यर्थः ॥

**End.** खन्तं खण्डितं ।

विषयः । जननमरणाद्यशौचव्यवस्थाकथनं ॥ श्राद्धविधिकथनं । तदधिकारिनिरूपणञ्च ॥

---

**No. 292.** व्यवस्थासारसंग्रहः By रामनाथ. Substance, palm leaves $15 \times 1\frac{1}{2}$ inches. Folia, 84. Lines, 2 on a page. Extent, 750 ślokas. Character, Bengali. Date ? Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgiśa Appearance, old, Prose and verse. Generally correct.

Beginning. ॐ नमो गुरवे नमः ।

नत्वा कृष्णपदद्वन्द्वं श्रीरामनाथशर्म्मणा ।
क्रियते ऽतिप्रयत्नेन व्यवस्थासारसंग्रहः ॥

अथ सामान्यतः सर्व्वतिथिव्यवस्था । यद्यपि रात्र्यादिपर्य्युदस्त × × कालोऽपि कर्म्मयोग्यस्तथापि मुख्यकाललाभे प्रशस्तत्वात् स एव नियामकः । मुख्यकालस्तु दैवकृत्ये त्रिधाविभक्तदिनस्य पूर्व्वाह्नः । मनुष्यकृत्ये मध्याह्नः । पितृकृत्येऽपराह्नः । तिथेः पूज्यकालापेक्षा तु विधेयकर्म्मण्येव निषिद्धकर्म्मणि तु तिथिमात्रापेक्षा यत्र तु उभयदिने कर्म्मकाले तिथिलाभोऽलाभो वा तत्र तत्तिथिविहितं पूजादिकं कुत्र कर्त्तव्यमिति सन्देहे युग्मादिना व्यवस्था । इत्यादि ।

End. परचक्रोपघातांश्च ।

यथा शस्त्रप्रहाराणां कवचं विनिवारणम् ।
तथा दैवोपघातानां शान्तिर्भवति वारणं ॥

शान्तिधर्म्मद्वारा ऐहिकानिष्टस्य त्वरितनिवृत्तिरितिदर्शनान्मलमासेऽशौचे च स्वस्त्ययनं कार्य्यं ।

शूद्रान्नं शूद्रसम्पर्कं शूद्रेण च सहासनं ।
शूद्रविद्यागमः कश्चिज्ज्वलन्तमपि तापयेत् ॥
पितृश्राद्धे तु शूद्राणां यो भुङ्क्ते ब्राह्मणाधमः ।
सुरापी ब्रह्मघाती च पितृदेवार्चनाद्बहिः ॥
तावद्भवति शूद्रान्नं यावन्न स्पृशति द्विजः ।
द्विजानां करसंस्पर्शात्तदन्नं हविरुच्यते ॥ हरये नमः ।

Colophon. अतः परं खण्डितत्वात् समाप्तिसूचकं वाक्यं नास्ति ।

विषयः । व्यवस्थासारसंग्रहेऽस्मिन् सन्ति केचन जटिलव्यवस्थानां संग्रहाः तत्र प्रथमे तिथिव्यवस्था सा पुनर्युग्मायुग्मभेदेन द्विविधा । संक्रान्तिव्यवस्था अशौचव्यवस्था सपिण्डीकरणादि-व्यवस्था शान्तिकर्म्मव्यवस्था च ।

---

**No. 293. व्यवहारसूत्रं.** Substance, country-made paper, 12 × 5 inches. Folia, 46. Lines, 7 on a page. Extent, 1,000 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Dikmaṇḍalācāryya Mahārāja Bālacandra Suri. Appearance, old. Verse. Correct.

Beginning. श्रीशान्तिजिनाय नमः ।

जो भिक्खु मानियं परिहाय ठाणं
परिसेवित्ता आलोएज्जा अपलिउ
चियं अलोएमाणस्समानियं पलिउचियं
आलोव माणस्सदो मानियं ।

End. साहम्मिय वेयावच्चं करेमाणे समणे निग्गणे महानिज्जरे महापज्जवसाणे भवइ ।

Colophon. ववहारस्स दसमो उद्देसो सम्मत्तो । व्यवहारसूत्रं समाप्तम् ।

विषयः । जैनसाधूनां व्यवहारकथनम् ।

---

No. 294. व्रतोद्यापनोपयोगिपदार्थनिर्णयः. Substance, country-made paper, 10×3 inches. Folia, 20. Lines, 9 on a page. Extent, 380 ślokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

श्रीमहाकाली-महालक्ष्मी-महासरस्वतीभ्यो नमः । श्रीसीतारामचन्द्राभ्यां नमः । अथ व्रतोद्यापनविषये किञ्चिदुच्यते, तत्रोद्यापनं नाम तत्तद्व्रते परिपूर्णे अपूर्णे वा कल्पोक्तं हवनदानब्राह्मणभोजनरूपः कर्मविशेषः ।

End. गीतायामपि ।

यत् करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ।

Colophon. इति व्रतोद्यापनोपयोगिविषयः समाप्तः ।

विषयः । व्रतोद्यापनोपयोगिपदार्थकथनम् ।

---

No. 295. व्रात्यस्तोमपद्धतिः By माधवाचार्य्यः. Substance, country-made paper, 8×3 inches. Folia, 5. Lines, 12 on a page. Extent, 100 ślokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, new. Prose and verse. Correct.

**Beginning.** नमस्कृत्याम्बिकां पूर्व्वान् ग्रन्थानालोच्य यत्नतः ।
व्रात्यस्तोमस्य सरणिं कुरुते माधवोऽधुना ।
व्रात्यशब्देनात्र पतितसावित्रीको ऽच्यते ॥

**End.** प्रभूणां वल्लरामाणां मुदे तल्लब्धजीविकः ।
माधवः प्राकरोत् काम्यां व्रात्यस्तोमस्य पद्धतिम् ॥

**Colophon.** इति माधवाचार्य्यशर्म्मप्रणीता व्रात्यस्तोमसरणिः समाप्तिमगमत् ॥

विषयः । व्रात्यानां संस्कारविधिः ।

---

**No. 296.** शक्रादिमाहात्म्यस्य विष्णुपद्धे व्याख्यानम्. Substance, country-made paper, 20 × 3 inches. Folia, 4. Lines, 8 on a page. Extent, 132 slokas. Character, Bengali. Date ? Place of deposit, Grām Bhadughar, Post Brāhmanberia, Comilla, Paṇḍit Amarcandra Nyāyaratna. Appearance, tolerable. Prose. Generally correct.

**Beginning.** श्रीदुर्गा । ॐ नमः कृष्णाय ।
तस्मिन् दुरात्मनि अतिवीर्य्ये कंसासुरे सैन्ये च देव्या कृष्णेण निहते सति शक्रादयः तां पालकं कृष्णं तुष्टुवुः । देव्या इति दिवधातोर्विजीगिषार्थाद्व्यञ्जनान्ता × × × देव्यः प्रस्तावात् कंसेन जेतुमिष्टः स चासावश्चेति देव्या तृतीयैकवचने अधातोरित्याकारलोपः धातोरित्यशब्दोपलक्षणत्वात् आकारो वासुदेवः स्यादित्येकाक्षरकोषः । तासि ताय् सन्तानपालनयोः तायतीति क्विप् यवोर्व्यञ्जन इति यलोपः । इत्यादि ।

**End.** यद्वा भद्रं कर्त्तुं शीलमस्येति भद्रकाली रश्रुतेर्लश्रुतिरिति । अन्तर्हिता अन्तर्द्धानं प्राप्तः अन्तर्हितं अयत इति क्विप् अन्तर्धानमन्तर्हितं तदयते-गत्यर्थत्वात् अयधातोः क्विप् यलोपश्च सा असुरान्तकारी × × × × × × × × अनधातोः क्विप् सम्भूतं प्राप्तः देवी क्रीड़ावान् देवशरीरेभ्यः गोपगोपीरूपेण शरीराण्युत्पद्य ल्यब्लोपे पञ्चमी जगत्रय-हितैषिणी हितैषिणीभाव एवमादित्वादन् क्वचिदधिकारात् इडिनलोपा-भावः तद्विद्यते यस्य इन् प्रत्ययः जगत्रयहितेच्छावान् पुनश्च गौरीदे-हासा पुनर्गौरीदेहपरिग्रहणेन असदीप्साद्यानयोरसनं अः क्विप् भावे, सम्भूता पूर्व्ववत् उत्पत्तिं प्राप्तः उपकारिणी उपकारित्ववान् उपकारि-णीभाव एवमादित्वादन् क्वचिदधिकाराद्इडिनलोपाभावः ।

**Colophon.** इति शक्रादिमाहात्म्यीयविष्णुपद्यव्याख्यानं सम्पूर्णं ।

विषयः । देवीमाहात्म्यीयशक्रादिमहात्म्यस्य विष्णुपद्ये व्याख्यानं ।

---

**No. 297. शङ्करसंहिता.** Substance, country-made paper, 14×5 inches. Folia, 59. Lines, 10 on a page. Extent, 1,100 çlokas. Character, Bengali. Date ? Place of deposit, Dinājpur Rajbāḍi. Appearance, new. Verse. Generally correct.

**Beginning.** ॐ नमो गणेशाय ।

ॐ कारनिलयं देवं गजवक्त्रं चतुर्मुखं ।
विरिञ्चिंतमहं वन्दे सर्व्वविघ्नोपशान्तये ॥
सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
× × × × × ॥
षोड़शैतानि नामानि यः पठेत् शृणुयादपि ।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा
संग्रामे सर्व्वकार्य्येषु विघ्नस्तस्य न जायते ॥

**End.** सूत उवाच ।

अयन्तु सम्भवाख्यस्तु कान्तो वेदार्थसम्मतिः ।
कथितः श्रेयसामेव निदानं विदुषां सतां ॥ * ।

**Colophon.** इति श्रीस्कन्दपुराणे शङ्करसंहितायां शिवरहस्यखण्डे सम्भवकाण्डे पञ्चाशत्तमोऽध्यायः ॥ सम्भवकाण्डं समाप्तं ॥

विषयः । १ सूतमुनिसंवादकथनं ॥ २ ग्रन्थमानकथनं । ३ तृतीयाध्यायात् पञ्चाशत्तमाध्यायं यावत् तारकासुरोपाख्यानवर्णनेन कुमारोत्पत्तिवर्णनादि ।

---

**No. 298. शतकल्याणस्तवनम्.** Substance, country-made paper, 12×5 inches. Folia, 3. Lines, 12 on a page. Extent, 72 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Dikmaṇḍālacāryya Mahārāja Bālacandra Suri. Appearance, new. Verse. Incorrect.

**Beginning.** श्रीजिनाय नमः ।

दुरिय रय समीरं मोहपङ्कोहनीरं ।
पणमिय जिनवीरं णिज्जियाणङ्गवीरं ॥

भवभङ्पड्ङिकुलं सग्गसुक्खानु × × लं ।
चरियमिह्हसमूलं कि × × किते निमूलम् ॥

**End.** एवं वीरजिने सने सयत्तमं मोहान्धविध्वंसनं
भव्वं भोहहकेह सोह जनयम् दोसाय रुच्चेयणम् ।
सोउं जं कुशलानुवन्धिकुशलं पत्तोमिकिञ्चित् श्वो ना
उज्जानिजवल्लदि (..) सया पाय पणामि तुह ॥

**Colophon.** इति महावीर शतकषट्कल्याणिकनिबन्धं स्तवनं समाप्तं ।

विषयः । मातुरन्यमातृगर्भे गमनम् । गर्भः । जन्म । दीचा । केवलज्ञानम् । निर्वाणम् ।

---

**No. 299. शब्दवादः.** Substance, yellow paper, 12 × 3 inches. Folia, 9. Lines, 8 on a page. Extent, ? ślokas. Character, Bengali. Date ? Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgīśa. Appearance, fresh. Prose. Generally correct.

**Beginning.** ॐ नमः शिवाय ।
इति शब्दो हि द्विविधः । लिङ्गार्थविभावकः पदार्थविभावकश्च । लिङ्गार्थविभावकः पदार्थविभावकश्चेति शब्दस्यानुकरणविषय एव प्रयोगः स्वाभाव्यात् लिङ्गः स्वरूपार्थस्याभिधायको लिङ्गार्थविभावकः । पदप्रतिपाद्यसंख्यान्वितविशेष्यीभूतशब्दस्वरूपार्थस्याभिधायकः पदार्थविभावकः यथा हचेति ॥ इत्यादि ।

**End.** एवञ्चेदिति शब्दाभावोपि भूसत्वाद्यामित्यादौ तदध्याहारात् शब्दस्याभिधेयशून्यत्वं कल्प्यं यत् तेनाध्याहारस्तत्र लक्षणया स्वरूपोपस्थापने प्रथमैवेतिदिक् । इति शब्दवादः समाप्तः इति ।

**Colophon.** श्रीकालीचरणोपान्ते भक्तिरस्तु सदा मम ।

विषयः । लिङ्गार्थविभावकत्वपदार्थविभावकत्वप्रकाशकप्रकृतिप्रत्ययादिना शब्दानां स्वरूपत्वनिरूपणम् ।

---

**No. 300. शान्तिशतकटीका By विद्याविनोदाचार्य्यचूड़ामणिः.** Substance, country-made paper, 18 × 3 inches. Folia, 22. Lines, 6 on a page. Extent, 500 ślokas. Character, Bengali. Date S.K. 1676. Place of deposit, Dinājpur, Paṇḍit Kṛṣṇadāsa Smṛtibhūṣana. Appearance, tolerable. Prose. Correct.

Beginning. ञ्यादौ पचद्वयं नास्ति। इदानीमात्मनः पाण्डित्यं निन्दयन् ऐश्वर्यं कटाचयति कलेति। ते चौणीभुजः राजानः वयमपि विद्वांसः चौणीभुजः इत्यादि।

End. तेषामावश्यकता जन्मजरावियोगं मरणं दृष्ट्वा स्थितस्य चासौ नोत्पद्यते न जायते यतःजन्म उत्पत्तिः जरा वार्द्धक्यं वियोगः इष्टविच्छेदः मरणं दशाविशेषः समाहारद्वन्द्वः सर्व्वद्वन्द्वो विभाषयैकवद्भवतीति ॥ *

Colophon. इति श्रीविद्याविनोदाचार्य्यचूडामणिकृतशान्तिशतकटीकायां चतुर्थपरिच्छेदः ॥ समाप्तश्चायं ग्रन्थः ॥ शक १६०६ ॥

विषयः। शान्तिशतकस्य व्याख्यानं।

---

No. 301. शिक्षाभाष्यं or शिक्षाप्रकाशः. Substance, country-made paper, 15 × 5 inches. Folio, 9. Lines, 9 on a page. Extent, 180 slokas. Character, Nāgara. Date ? Place of deposit, Benares, Gobinda Bhaṭṭa. Appearance, old. Prose. Correct.

Beginning. ज्योतिर्व्याकरणं छन्दः कल्पशिक्षानिरुक्तयः।
नेत्रास्यपादो नः कर्णावस्य तं सततं नुमः॥
व्याख्याय पिङ्गलाचार्य्यसूत्राण्यादौ यथायथं।
शिक्षां तदीयां व्याख्यास्ये पाणिनीयानुसारिणीं॥

End. स्वर्गं व्याप्नोति वा। द्विर्वचनं शिक्षाध्यायसमाप्त्यर्थं। विकृतिछन्दस्य × × × समभपरवक्त्रं वृत्तं अर्द्धसमा अर्द्धे इत्यधिकृत्य अपरवक्त्रं × × × औच्छाविति लक्षणसूत्रात्।

Colophon. इति शिक्षाप्रकाशः समाप्तः।

विषय। वर्णानामुच्चारणप्रकारकथनम्।

---

No. 302. शिवशतनामस्तोत्रं (महालिङ्गेश्वरतन्त्रोक्तं). Substance, country-made paper, $10 \times 2\frac{1}{2}$ inches. Folio, 6. Lines, 6 on a page. Extent, 75 slokas. Character, Bengali. Date, S.K. 1776. Place of deposit, Zilla Midnapur, Post Garveta, Grām Khunverā, Paṇḍit Hārānchandra Tarkavāgīsa. Appearance, fresh. Verse. Generally correct.

**Beginning.** श्रीरामः ।

ॐ अस्य श्रीशिवशतनाममहास्तोत्रस्य श्रीनारद ऋषिरनुष्टुप्छन्दः श्रीसदाशिवो देवता ॐ नमः शिवायेति महाबीजं ह्रीं शक्तिः नमः कीलकं मम सर्व्वाभीष्टसिद्ध्यर्थे जपे विनियोगः । इत्यादि ।

**End.**

एतज्ज्ञानं महेशानि पाषण्डे मा वदेत् क्वचित् ।
मूर्खाय भक्तिहीनाय दुष्टाय सुदुरात्मने ॥
शिवभक्तिविहीनाय शक्तिनिन्दापराय च ।
न प्रकाश्यं महादेवि प्रकाशाच्छिवहा भवेत् ॥
शिष्याय भक्तियुक्ताय शिवविष्णुपराय च ।
शतनाममहास्तोत्रं तस्मै देयं महेश्वरि ॥

**Colophon.** इति महालिङ्गेश्वरतन्त्रे श्रीशिवपार्व्वतीसम्वादे शिवस्य शतनामस्तोत्रं समाप्तं ॥ ॐ तत् सत् ॥

यदक्षरं परिभ्रष्टं मात्राहीनञ्च यद् भवेत् ।
पूर्णं भवतु तत् सर्व्वं त्वत्प्रसादान्महेश्वरः ॥

शकाब्दाः १७७६ । ११ । १९ । लिपिरियं श्रीरामतारणशर्म्मणः ॥

विषय । श्रीमहादेवस्य स्तुतिकथनं ।

---

**No. 303.** शिवसहस्रनामस्तोत्रं ( उमायामलीयं ). Substance, country-made paper, 16×4 inches. Folio, 3. Lines, 10 on a page. Extent, 120 ślokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā, Late Paṇḍit Rāmtāraṇa Siromaṇi. Appearance, fresh. Verse. Correct.

**Beginning.** श्री श्री ॐ नमः शिवाय ।

देव्युवाच ।

ॐ देव देव महादेव ज्ञानसिन्धो कृपामय ।
यत्ते नामानि गुह्यानि पवित्राणि शुभानि च ।
तन्मे कथय मे देव यदि स्नेहोऽस्ति मां प्रति ॥

श्रीशिव उवाच ।

तानि ते कीर्त्तयिष्यामि भुक्तिमुक्तिकराणि च ।
गोप्यानि सर्व्वतन्त्रेषु न देयानि पृथग्जने ॥ इत्यादि ।

End.
क्रूररोगा घोरसत्वा चलक्ष्मीः कालकौर्णकाः ।
पठनाद् यस्य नश्यन्ति साधकस्य न संशयः ॥
वारमेकञ्च योऽधीयादश्वमेधफलं लभेत् ।
जपे होमे तथा दाने यदि देवार्चने तथा ॥

Colophon. इति उमायामले हरगौरीसंवादे परमशिवसहस्रनामस्तोत्रं समाप्तं ।
ॐ तत् सत् ।

विषय । शिवस्य सहस्रनामस्तुतिकथनं ॥

---

**No. 304.** शुकरहस्योपनिषत् . Substance, country-made paper, 11×4½ inches. Folio, 3. Lines, 12 on a page. Extent, 100 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Gobinda Bhaṭṭa. Appearance, new. Prose and verse. Correct.

Beginning. अथातो रहस्योपनिषदं व्याख्यास्यामः । देवर्षयो ब्रह्माणं संपूज्य प्रणिपत्य पप्रच्छुः भगवन्नस्माकं रहस्योपनिषदं ब्रूहि इति सोऽब्रवीत् ।
पुरा व्यासो महातेजाः सर्व्ववेदतपोनिधिः ।
प्रणिपत्य शिवं साम्बं कृताञ्जलिरुवाच ह ॥

End.
पुत्रेण सहितः प्रीत्या परानन्दसुपेयिवान् ।
यो रहस्योपनिषदमधीते गुर्वनुग्रहात् ॥
सर्व्वपापविनिर्मुक्तः साक्षात् कैवल्यमश्नुते ॥
इत्युपनिषत् ॥

Colophon. इति शुकरहस्योपनिषत् समाप्ता ।

विषय । व्यासशुकसंवादमभिमुखीकृत्य ब्रह्मविद्योपदेशः ।

---

**No. 305.** शुद्धिदीपिकाप्रकाशः By विष्णुदासदत्त . Substance, country-made paper, 13×3 inches. Folia, 86. Lines, 7 on a page. Extent, 2,000 slokas. Character, Bengali. Date S.K. 1636. Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā, Late Paṇḍit Śrīpati Bhaṭṭācārya. Appearance, old. Prose. Generally correct.

Beginning.
ॐ नमो गणेशाय ।
श्लिष्यमाणं कमलया वन्दे कमलशायिनं ।
हरिं हेम्ना प्रसक्तस्य तुल्यं मरकताश्मनः ॥

नभोनदीकोकनदं जनानां ।
नेत्रापद्मत्योरपहारकाञ्चनं ॥
सरोजशोभाकरकान्तिमण्डलं ।
दिवापतेर्मण्डलमाश्रयामि ॥

शिष्टानामयमाचारो यदभिमतदेवतानमस्कारपुरःसरमभिमतार्थसिद्धिं वाञ्छन्ति तदयमपि महीन्तापनीयाचार्य्यश्रीश्रीनिवासो ज्योतिःशास्त्रस्य सूर्य्यकर्तृकत्वात् ग्रहराजत्वाच्च सभासदाशाशीर्व्वादव्याजेन रविं स्तुवन्नाह त्वष्णेति । इत्यादि ।

End. अधुना स्वग्रन्थस्यान्यग्रन्थादुपादेयत्वमाह । सुविस्तरादिति । अतिविस्तर-ज्योतिर्ग्रन्थात् श्रीश्रीनिवासनाम्नाचार्य्येण उद्धृतां संक्षेपेण गृहीतां इमां शुद्धिदीपिकां सुशिक्षिता अभियुक्ताः शिष्या विभ्रतु धारयन्तु । × × × × × × × × × × × × × ×

तथाहि वृहज्जातके जातकविचार एव । अत्र ग्रन्थे तु सर्व्वकर्म्मविधानं संक्षिप्योक्तमिति ।

कुतूहलाद्वा कविहार्द्दतो वा
निष्पाद्यवस्तुश्रुतिगोचराद्वा ।
वितन्यमानां कवयः कृतिं मे
चेतःप्रदानेन पवित्रयध्वं ॥

Colophon. इति श्रीविष्णुदासदत्तकृतायां दीपिकाप्रकाशाख्यायां यात्रादिनिर्णयो नामाष्टमोऽध्यायः । समाप्तश्चायं ग्रन्थः ।

रसकालर्त्तुभूसंख्ये शकाब्दे चापगे रवौ ।
लिखिता पुस्तिका ह्येषा भूवनेश्वरशर्म्मणा ॥

विषयः । श्रीनिवासकृतशुद्धिदीपिकाया व्याख्यानं ।

---

No. 306. शुल्वप्रदीपविवरणं By सुन्दरराज. Substance, country-made paper, 12 × 4 inches. Folia, 25. Lines, 11 on a page. Extent, 825 ślokas. Character, Nāgara. Date, Saṃvat 1817. Place of deposit, Benares City, Gobinda Bhaṭṭa. Appearance old. Prose. Correct.

Beginning. आपस्तम्बेन योयं व्यरचि भगवता शुल्वसंज्ञोगभीरः,
प्रश्नार्थं तस्य भाष्यप्रभृतिषु कथितं विस्तृतं वीक्ष्य सत्त्वं ।

संचित्योद्बोधनार्थं कुशिककुलनिधिर्माधवाय्यस्य यष्टुः,
पुत्रः शुल्वप्रदीपं विवरणमधुना सुन्दरो निर्मिमीते ॥
विहारयोगान् व्याख्यास्यामः, विहारो विहरणं, चतुरश्रादिरूपेण भूमेः करणं, तस्य योगाः उपायाः ।

**End.** पूर्व्वेषां कृतत्वात् व्यक्तिरेतत् बोधायनेन । अश्वमेधः प्राप्नुयेत् आहार जर्द्धविधामभ्यसेत् ? नेतरद्दाक्रियते । आदितस्तेदाहरेत् आहृत्य कृतान्तात् प्रत्याहरतीति ॥

**Colophon.** इति सुन्दरराजीये शुल्वविवरणे शुल्वप्रदीपे षष्ठः पटलः शुभमस्तु संवत् १८१७ माघशुक्लप्रतिपदि–गुरौ जयरामेण लिखितं ।

विषयः । आपस्तम्बविनिर्मितशुल्वसूत्रव्याख्या ।

---

**No. 307.** ऋग्वेदीयश्राद्धप्रयोगः. Substance, country-made paper, 10×4 inches. Folia, 19. Lines, 7 on a page. Extent, 190 ślokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose and verse. Correct.

**Beginning.** श्रीगणेशाय नमः ।

ओम् आचम्य पवित्रसहितः प्राणानायम्य पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्य्येषि विश्वतः । अतप्त तनूर्न तदामो अश्नुते, शृतास इद्वहन्तस्तत् समाशत जर्द्धकेशीं ।

**End.** वषट् ते वास आक्षणोमि तन्मे जुषस्व × × × पिपिष्टहव्यं वर्द्धन्तु त्वासुष्टुतरोगिरो म यूयं पात स्वस्तिभिः सदा नः ।

**Colophon.** इति श्राद्धयज्ञप्रयोगः समाप्तः ।

विषयः । ऋग्वेदीयश्राद्धकथनम् ।

---

**No. 308.** श्राद्धवादार्थः. Substance, country-made paper, 15×3½ inches. Folia, 25. Lines, 7 on a page. Extent, 800 ślokas. Character, Bengali. Date S.K. 1800. Place of deposit, Zilla Midnapur, Post Garvetā, Grām Bhaṭṭagrām, Paṇḍit Ramhṛdaya Bhaṭṭācāryya. Appearance, fresh. Prose. Correct.

**Beginning.** ॐ नमो गणेशाय ।

प्रणम्येत्यादि मङ्गलाचरणविशेषविचारस्तु प्रायश्चित्तवादार्थेऽनुसन्धेयः । पार्व्वणादिश्राद्धतत्त्वं पार्व्वणादिप्रतिपादकस्मृतिवचनस्य तात्पर्य्यविषयीभूतार्थं वक्ति निरूपयतीत्यर्थः । ननु पार्व्वणस्य स्वशब्देन निर्द्देशः आभ्युदयिकादेः कथं आदिपदेन निर्द्देशः । उ । सकलश्राद्धमध्ये पार्व्वणस्य प्रधानत्वज्ञापनार्थं पार्व्वणस्य स्वशब्देन निर्द्देशः । अन्येषामपि आदिपदेन तेन पार्व्वणः प्रकृतिः अन्यो विकृतिः यत्र तु श्राद्धकरणमुक्तं तत्र पार्व्वणं कर्त्तव्य मितिभावः । इत्यादि ।

**End.** अत्र केचित् एकोद्दिष्टं नान्यद्वारा कारयितव्यमित्यत्रापि गोत्रजेतरत्वेन विशेषणीयमित्युक्तावपि न कदाचित् सगोत्रायेति विशेषणात् सगोत्रै-कोद्दिष्ट × अगोत्रजद्वारा, मातामहादेरेकोद्दिष्टन्तु अगोत्रद्वारापि करणीयमित्याहुः । अपरेतु वचने सगोत्रायेति विशेषण × × वपि एकोद्दिष्टं नान्यद्वारा कारयितव्यमित्यत्रापि गोत्रजेतरत्वेन विशेषणीयमिति स्मार्त्त-व्याख्याने सामान्यैकोद्दिष्टनिवेशात् मातामहादेरेकोद्दिष्टमपि अगोत्रजद्वारा न कार्य्यमित्याहुः वस्तुतस्तु पूर्व्वमतं समीचीनं वचनबलादिति गुरुचरणाः पार्व्वणादिश्राद्धन्तु गोत्रजागोत्रजद्वारा कर्त्तव्यमित्युभयमतसिद्धं ॥

**Colophon.** इति श्राद्धवादार्थः समाप्तः । शकाब्दाः १८०० तारिख ३० श्रावण ।

**विषयः ।** श्राद्धतत्त्वीयवादावलीनां सम्यग्विचारः ।

---

**No. 309. श्रीकृष्णकवचं.** Substance, country-made paper, 15×3 inches. Folia, 2. Lines, 12 on a page. Extent, 70 ślokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Candrakonā, Ayodhyā, Raghunathvāṭi, Babu Cakrapāṇi Rāya. Appearance, tolerable. Prose. Generally correct.

**Beginning.** ॐ रामः । अथ कृष्णकवचं ।

भगवन् सर्व्वधर्म्मज्ञ कवचं यत् प्रकाशितं ।
त्रैलोक्यमङ्गलं नाम कृपया कथय प्रभो ॥

सनत्कुमार उवाच ।

शृणु वक्ष्यामि विप्रेन्द्र कवचं परमाद्भुतं ।
नारायणेन कथितं कृपया ब्रह्मणे पुरा ॥

ब्रह्मणा कथितं मह्यं परं स्नेहाद् वदामि ते ।
अति गुह्यतरं तत्त्वं ब्रह्ममन्त्रौघविग्रहं ॥ इत्यादि ।

End. कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः ।
त्रैलोक्यं चोभयत्येव त्रैलोक्यविजयी भवेत् ॥
इदं कवचमज्ञात्वा भजेद् यः पुरुषोत्तमं ।
शतलक्षप्रजप्तोऽपि न मन्त्रः सिद्धिदायकः ॥

Colophon. इति सनत्कुमारतन्त्रे त्रैलोक्यमङ्गलं श्रीकृष्णकवचं समाप्तं ॥

विषयः । श्रीकृष्णस्य कवचं ॥

---

**No. 310.** श्रीकृष्णस्तोत्रं. Substance, country-made paper, 16 × 4 inches. Folia, 10. Lines, 6 on a page. Extent, 300 slokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grām Telivani. Appearance, fresh. Verse. Correct.

Beginning. श्रीगोपालाय नमः ।
यं वेद वेदविदपि प्रियमिन्दिराया
यन्नाभिनीरदरुगर्भगतो न धाता ।
गोपालबालललना वनमालिनं तं
गोधूलिधूसरशरीरमरीरमन्तां ॥
कनककमलमालः केशिकंसादिकालः
समरभूवि करालः प्रेमवापीमरालः ।
अखिलभूवनपालः पुण्यवल्लीप्रवालः
स्तव भवतु विभूत्यै नन्दगोपालबालः ॥ इत्यादि ।

End. अद्वैतवीथिपथिकैरुपास्याः
स्वानन्दसिंहासनलब्धदीक्षाः ।
हठेन केनापि वयं शठेन
दासीकृता गोपवधूविटेन ॥
न वयं कवयो न तार्किका
न च वेदान्तनितान्तपारगाः ।
न च वादनिरासकाः परं
कपटाभीरकिशोरकिङ्कराः ॥

अये मनो दुराचार विषयानुपसेवसे ।
गोविन्दे परमानन्दे मुकुन्दे किं न लीयसे ॥

**Colophon.** इति वैष्णवचूड़ामणिमहामहोपाध्यायश्रीविल्वमङ्गलभट्टदेववरविरचितं श्रीकृष्णस्तोत्रं समाप्तं ॥

विषयः । श्रीकृष्णस्य स्तुतिकथनं ।

---

**No. 311. श्रीविद्याया ऐश्वर्य्यादिस्वरूपाख्यं स्तोत्रं.** Substance, country-made yellow paper, 12×3 inches. Folia, 4. Lines, 5 on a page. Extent, 120 ślokas. Character, Bengali. Date ? Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgīśa. Appearance, fresh. Verse. Generally correct.

**Beginning.** ॐ नमः परमदेवतायै ।

ऐश्वर्य्यं स्वर्य्यहीनं शशधरलसितं वीजमत्यन्तगुह्यं
जड़ोवा मूर्खो वा यदि जपति जनः प्रत्यहं शुद्धचेताः ।
जिह्वाग्रे तस्य वाणी विहरति च सदा गेहमध्ये च लक्ष्मी-
श्चिरञ्जीवन्मुक्तः स भवति सहसा त्वत्प्रसादाद् भवानि ॥ (?)
प्रचण्डाद्यं मातर्वसुमतिसहितं वैष्णवी स्वर्कयुक्तं
सुगुप्तं मन्त्रेशं सदि लभति कश्चित् पुण्यवान् शुद्धचेताः । (?)
धरण्यां धन्योपि प्रवसति च सदा कामिनीं कामसङ्गां
स दीर्घायुः श्रीमान् त्रिभुवनविजयी सौख्यमोचं लभेच ॥ इत्यादि ।

**End.** मनस्त्वं कल्याणि त्वमसि परमात्मा परतरा ।
जगत्प्राणो मातस्त्वमसि गगनं त्वं हुतवहः ॥
धरित्री त्वं दुर्गे धरणिधरकन्ये वनमयी- ।
स्तुतिः का ते मातस्त्रिभुवनमखिले सुन्दरि परे ॥
महापुण्ये कन्ये धरणिधरकन्ये मनुमये ।
जगद्वन्द्ये सन्ध्ये सकलगुणहीने गुणमये ॥
अये तारे सारे हरहृदयहारोज्ज्वलकरे ।
कृपापारावारे मयि वितर दीनेऽस्मतमपि ॥

**Colophon.** इति श्रीक्रमे श्रीश्रीविद्याया ऐश्वर्य्यादिस्वरूपाख्यं स्तोत्रं समाप्तं ।

विषयः । श्रीविद्याया ऐश्वर्य्यादिख्यापनं ।

---

**No. 312.** **श्रीसूक्तन्यासः.** Substance, country-made paper, 8 × 3 inches. Folia, 1. Lines, 16 on a page. Extent, 40 ślokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭī, Benares City, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

**Beginning.** श्रीगणेशाय नमः ।

अथ श्रीसूक्तन्यासो लिख्यते ओम् हिरण्यवर्णमिति पञ्चदश × × सूक्तस्य श्रीर्देवता कर्दमानन्दचिक्लीतेन्दिरासुता ऋषयः आद्यास्तिस्रोऽनुष्टुभः, ततः एकाप्रस्तारपंक्तिः ।

**End.** आनन्दकर्दमश्चैव चिक्लीत × × व विश्रुताः ऋषयः ते त्रयः पुत्राः त्वं श्रीर्देवी × × × देवता । श्रीवर्चस्वं इति श्रीसूक्तन्यासः समाप्तः ।

**Colophon.** × × × × ×

विषयः । लक्ष्मीसूक्तमन्त्रन्यासः ।

---

**No. 313.** **श्रौतोपयोगिकारिका.** Substance, country-made paper, 10 × 4 inches. Folia, 14. Lines, 9 on a page. Extent, 252 ślokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭī, Benares City, Paṇḍit Vāmanācāryya. Appearance, old. Verse. Correct.

**Beginning.** श्रीगणेशाय नमः ॥

अग्निहोत्रं मुनिश्रेष्ठ यस्मिन् देशे प्रवर्त्तते ।
दशयोजनविस्तीर्णं काशीक्षेत्रं तदुच्यते ॥

**End.** कुलालचक्रघटितं आसुरं मृण्मयं स्मृतं ।
तदेव चक्रघटितं स्थाल्यादि खलु दैवतं ॥

**Colophon.** इति श्रौतोपयोगिकारिका समाप्ता ।

विषयः । श्रौतकर्मण्युपयोगिपदार्थकथनम् ।

---

**No. 314.** **षट्कर्म्मलक्षणं.** Substance, country-made paper, 11 × 3 inches. Folia, 3. Lines, 7 on a page. Extent, 50 ślokas. Character, Bengali. Date ? Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavagīśa. Appearance, fresh. Verse. Generally correct.

Beginning. अथ षट्कर्म्मलक्षणं । शारदायां ।

अथाभिधास्ये तन्त्रेऽस्मिन् सम्यक् षट्कर्म्मलक्षणं ।
सर्व्वतन्त्रानुसारेण प्रयोगफलसिद्धिदं ॥
शान्तिवश्यस्तम्भनानि विद्वेषोच्चाटनस्तथा ।
मारणं तानि शंसन्ति षट्कर्म्माणि मनीषिणः ॥
स्वदेवतादिक्पालादीन् ज्ञात्वा कर्म्माणि साधयेत् ।
रती-वाणी-रमा-ज्येष्ठा-दुर्गा-काली यथाक्रमात् ॥
षट्कर्म्मदेवताः प्रोक्ताः कर्म्मादौ कर्म्मसिद्धये ॥ इत्यादि ।

End. सर्व्वकार्य्येषु सौवर्णं क्रूरे स्यात् प्रेतकर्पटं ।
त्रिगन्धं शान्तिके प्रोक्तं पञ्चगव्यन्तु वश्यके ॥
सर्व्वकार्य्येऽष्टगन्धः स्यात् क्रूरे चाष्टविषानि च ।
शान्तिके लेखनी दूर्व्वा वश्यादौ शिखिपुच्छिका ॥
गृहेषु शान्तिकर्म स्यात् वश्यञ्च चण्डिकागृहे ।
देवालयेषु सर्व्वाणि श्मशाने क्रुरकर्म्म च ॥
सर्व्वेषां प्रथमे यामे शान्तिकर्म्म समारभेत् ।
तदा शान्तिं लभेद्धीमान् सत्यं हि सुरवन्दिते ॥

Colophon. इति षट्कर्म्मलक्षणं समाप्तं ।

विषयः । तान्त्रिकप्रसिद्धशान्तिवश्यादिषट्कर्म्मणाम् लक्षणनिरूपणं तेषां देवतादिनिर्देशः तेषां प्रयोगक्रमश्च ।

---

**No. 315. षष्ठवतिश्राद्धनिर्णयः.** Substance, country-made paper, 8×3 inches. Folia, 2. Lines, 7 on a page. Extent, 30 ślokas. Character, Nagari. Date ? Place of deposit, Bibihāṭī, Benares City, Paṇḍit Vāmanācāryya. Appearance, new. Prose. Correct.

Beginning. अथषण्णवतिश्राद्धनिर्णयः ।

तानि च अमामनुयुगक्रान्तिव्यतिपातमहालयाः ।
अन्वष्ट्यं च पूर्व्वेद्युः षण्णवत्यः प्रकीर्त्तिताः ।

End. अथ तर्पणं, अष्टकान्वष्टिका पूर्व्वेद्युः श्राद्धेषु षोड़शदिनव्यापिमहालयेषु श्राद्धान्ते इतरवादौसंपाते तु श्राद्धेनैव तर्पणनिर्णयः अन्यत् सर्व्वमन्यतोऽवगन्तव्यमिति संक्षेपः ।

Colophon. × × × × ×

विषयः । षण्णवतिश्राद्धविधिः ।

---

**No. 316.** **संहितासूत्रं.** Substance, country-made paper, 10×5 inches. Folia, 13. Lines, 10 on a page. Extent, 150 slokas. Character, Nāgari. Date, Samvat 1855. Place of deposit, Benares, Govinda Bhaṭṭa. Appearance, old. Prose. Correct.

**Beginning.** वृथनूनं वाद्दो अर्थं गन्तानूनं असामिभिमरतः गन्तानो यज्ञं आगन्तामारिप्यन्यता आनो अद्य स मनस इति षट्पद्काले गन्तृस्वरेण । नान्यायुवत् । एतं ते स्तोमं तु विजातविप्रः वस्त्रेव भद्रा विरश्विने वज्रिणे चत्वारि अतचं मकारेण चतुर्थं अकारवर्जं ।

**End.** विश्वां क्षितिरसि मानुषीणां अन्यत्र मानुषाणां . सेनाजुवां न्यूहतुः ।

**Colophon.** इति संहितासूत्रं समाप्तं संवत् १८५५ ।

विषयः । संहितालक्षणानि विस्तारेण उक्तानि ।

---

**No. 317.** **संहितोपनिषद्विवरणं.** Substance, country-made paper, 16×5 inches. Folia, 61. Lines, 11 on a page. Extent, 2100 slokas. Character, Nāgari. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, old. Prose. Correct.

**Beginning.** एषपन्या इत्याद्या बह्वृचब्राह्मणोपनिषत् तस्या इदं विवरणं अल्पग्रन्थं सुखावबोधार्थमारभ्यते । उपनिषदित्युपनिपूर्व्वस्य सदेः क्विबन्तस्य विशरणगत्यवसादनार्थस्य रूपमाचक्षते । विशेषेण चोपनिषच्छब्दवाच्यान्तविद्या, तादर्थ्यात् ग्रन्थोऽप्युपनिषत् ।

**End.** अथानन्तेवासित्वविशेषणात् संवत्सरवासिनोऽर्थप्राप्तं शिष्यत्वं इति, तथापि प्रवक्तुरशिष्यस्यैव नित्यप्राप्तिस्तथाच । यो बालं विज्ञातुं स्यान्मेधाविने तपस्विने वेतौत्येवं आचार्य्याः विद्याप्रवक्तारो मन्यन्ते द्विर्वचनं त्वशेषोपनिषत्समाप्तिदर्शनार्थं ।

**Colophon.** इति श्रीमच्छंकरभगवत्कृतौ संहितोपनिषद्विवरणं समाप्तं ।

विषयः । संहितोपनिषद्व्याख्या ।

---

**No. 318.** संक्षिप्तसारे कृदन्तटिप्पनी. Substance, country-made paper, 15 × 3 inches. Folia, 25. Lines, 8 on a page. Extent, 800 ślokas. Character, Bengali. Date S.K. 1742. Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā, Paṇḍit Hārāncandra Tarkavāgīśa. Appearance, fresh. Prose. Generally correct.

**Beginning.** ॐ नमः शिवाय ।

शतुःशकारकरणमायच्छदिति सिद्धये ।
कृधातुकादिरस्य स्यादच्छादेशः परे × × ॥
तत्रातीति न कर्त्तव्यं गोष्ठ इत्यत्र दूषणात् ।
तिष्ठन्तीति तदा न स्याद् यदि च स्यात्तकारवान् ॥
शाला × × × × च्छानः शौले विज्ञेय एव दिक् ॥

दिशिति यश्च शानः कृतः स्यात् तदा श्वेः शानः स्यादीदित्यत्र लिङ्गदतिदिष्टस्यापि ग्रहणस्यादित्यर्थः । इत्यादि ।

**End.** मध्या । मध्यञ्च तत् दिनञ्चेति कर्म्मधारय इति ननु वर्णस्य वर्णेनेत्यत्र अवयववृत्तिसमुदायवृत्त्योः समासावयमेव निराकरिष्यति । तत् कथमेतदिति तत्रैव व्याख्यास्यामः । × × तेन पूर्व्वात् पातात् अस्मिन्नेव प्रत्यय इति न प्रत्यय इत्यर्थः । शाने । एकाजि जन्तादित्यतोऽम् कथं नानुवर्त्तते सन्निहितत्वात् । इत्यादि ।

**Colophon.** समाप्तेयं कृदन्तटिप्पनी । श्रीश्रीरामः शरणं । श्रीदुर्गा ॥ शकाब्दा १७४२ तारिक २८ भाद्र ।

विषयः । संक्षिप्तसारीयकृदन्तप्रकरणव्याख्याया व्याख्यानं ।

---

**No. 319.** संक्षिप्तसारे व्याकरणादर्शे सुवन्तपादविवरणं By वंशीवदन. Substance, country-made paper, 16 × 4 inches. Folia, 32. Lines, 6 on a page. Extent, 850 ślokas. Character, Bengali. Date S.K. 1243. Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā, Late Paṇḍit Śrīpati Bhaṭṭāchāryya. Appearance, fresh. Prose. Correct.

**Beginning.** श्रीश्रीराधाकृष्णाय नमो जयति ।

श्रीरामं जलदश्यामं जितकामं तनूश्रिया ।
रत्नसिंहासनासीनं ज्ञानमुद्राकरं भजे ॥

लम ॥ मतुः मकारकरणमित्यृच्छदिति सिद्धये
ऋधातुर्ऋादिरस्य स्यादच्छादेशः परे शिति ।
तत्रातीति न कर्त्तव्यं गोष्ठ इत्यत्र दूषणात्
तिष्ठतीति तदा न स्याद् यदि च स्यात्तुकारवान् ॥ इत्यादि ।

**End.** स्यादौ । आदित्यऽक्लाऽदितिकृते प्रथमं सन्धिकार्य्याभावे अष्टाभिरित्यत्र भिस् ऐसादेशः स्यात् प्रसिद्धास्तु अच अङ्य परत्वात्तु × × × × स्थाने आद्विधानाभावे अष्टाभिरिति न स्यादित्यपि दोषमाहुः । तन्न यद्यत्र × × स्थानी स्यात्तदा × × पौत्येके इत्यनेन षाष्टेतिपदं न स्यात् किन्तु षाष्टनीति । अथ । प्रियाष्टामिति टीकायां नाम्नीप्रकृतिदीर्घा-दिति तु निषेधः ।

**Colophon.** इति वंशीवदनकविचन्द्रविरचिते व्याकारणादर्शे सुबन्तपादविवरणो नाम षष्ठः किरणः ।

चिन्त्यं प्रमादमुद्धृत्य पुस्तिकेयं सुसङ्गता ।
कृता श्रीकविचन्द्रेण वंशीवदनशर्म्मणा ॥
शकाब्देऽनलवेदमितविमिते मासे तथाषाढ़के ।
पक्षे चापितु कृष्णके शुभतिथौ वारे तथा भूमिजे ॥
नत्वा राघवपादपद्मयुगलं श्रीजानकीसेवितं ।
ग्रन्थं संलिखति क्रमेण सुकृती श्रीरामचन्द्रः सुधीः ॥

विषयः । संक्षिप्तसारीयसुबन्तपादव्याख्याया व्याख्यानं ।

---

**No. 320.** संक्षिप्तसारीयकारकपादटिप्पनी By वंशीवदन. Substance, country-made paper, 13×3 inches. Folia, 25. Lines, 8 on a page. Extent, 800 ślokas. Character, Bengali. Date S.K. 1748. Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā, Late Paṇḍit Sripati Bhaṭṭāchāryya. Appearance, fresh. Prose. Correct.

**Beginning.** ॐ नमः शिवाय ।

× × × × × कल्पद्रुकल्पजल्पनं ।
× × दूर्व्वादलश्यामं श्रीरामं प्रणमाम्यहं ॥
क्रिया सर्व्वकारकाणां निरूपिका ।
प्रवृत्तौ च निवृत्तौ च कारकाणां य ईश्वरः ।

अप्रयुक्तः प्रयुक्तोवा स कर्त्ता नाम कारकं ॥
इतीश्वरत्वेन च प्रधानत्वात् कर्त्तुः प्रथमं लक्षणमाह विभक्तिविभजनोपाय-
तया कर्त्रादिलक्षणानां व्याकरणाङ्गत्वमित्यादि ।

End. अतएव यत् × × × × × भावकर्म्मणोरात्मने इति क्वचिद्दृश्यते
तल्लिपिकरप्रमादादेव । अनुदा × × आत्मनेपदमित्यतस्तत्रानुवृत्तिरिति ॥

श्रीवंशीवदनं विशिष्टविनयं विद्वज्जनप्रीणनं ।
सूते रायमती सती मतिमती श्रीमान् वशिष्ठः स्वयं ॥
व्याकारे क्रमदीश्वरेण रचिते श्रीनन्दिना शोधिते ।
गोयीचन्द्रकृते च तद्विरचिते पादो गतः पञ्चमः ॥
शकाब्दाः १७४८ ।

विषयः । गोयीचन्द्रकृतकारकटीकाया व्याख्यानम् ॥

---

No. 321. संक्षिप्तसारकारकपाददटिप्पनी ( सारार्थदीपिका ) By गोपाल-चक्रवर्त्ती. Substance, country-made paper, 16×3 inches. Folia, 34. Lines, 8 on a page. Extent, 1,500 slokas. Character, Bengali. Date S.K. 1747. Place of deposit, Zilla Midnapur, Post Garvetā, Grāma Khunverā, Late Paṇḍit Sripati Bhaṭṭācāryya. Appearance fresh. Prose. Correct.

Beginning. ॐ नमो रामाय ।
क्रिया ॥ ननु प्रकृतिप्रत्ययादिविभागपरिकल्पनया शब्दशासनं व्याकरणं ।
तद्भिन्नत्वात् कथं क्रियासुख्यप्रयोजकादेर्व्याकरणत्वं अत्रोच्यते सुप्रत्यय-
त्तद्विधायकं लक्षणं विधास्यमानं कर्त्तादिसंज्ञां विना न सम्भवतीति
तद्धितत्वात् कर्त्तादिलक्षणानामपि व्याकरणत्वं एवं सत्यधिकारप्राप्तस्य
नाम्न एव कर्त्तादिसंज्ञां विदधत् कर्त्रधीनव्यापारत्वात् कारकाणां कर्त्तुः
प्राधान्यमतस्तल्लक्षणमेव प्रथममभिदधाति । क्रियानिमित्तं कारकमिति ।
इत्यादि ॥

End. षष्ठी । क्वचित्पदोपादानात् अर्थान्तरे च परे इत्याद्यर्थं सप्तम्यादिविषये
लक्षणाभावाद् व्यवस्थापको विधिरयं वाच्यः ॥
गोयीचन्द्रकथासुधामतितरामास्वाद्य यत्नाच्चिरा
दालोक्याखिलटिप्पनीं गुरुमतं सम्यग्विभा × × × ॥

श्रीलश्रीकविचन्द्रपादकमलध्यानैकतानो × × ।
कारकटिप्पनीं कृतिमुदे गोपालचन्द्रः सुधीः ॥

Colophon. इति श्रीकविचन्द्रचरणारविन्दानन्दित × × × × श्रीगोपाल-चक्रवर्त्तिरिवचितायां सारार्थदीपिकायां कारकटिप्पनी समाप्ता ।

श्रीश्रीजाने दयाधाने चरणाब्जयुगे तव ।
श्रीहलधरकृतिना लिपिरेषा समर्पिता ॥
शकाब्दाः १७४७ ॥

विषयः । कारकटीकायाः व्याख्यानं ॥

---

No. 322. संक्षिप्तसारटिप्पनी (सारार्थदीपिका) (तिङन्तपादस्य). Substance, country-made paper, 14×4 inches. Folia, 99. Lines, 8 on a page. Extent, 2150 ślokas. Character, Bengali. Date S.K. 1743. Place of deposit, Zilla Midnapur, Post Garvetā, Grāma Khunverā, Paṇḍit Harāṇa Candra Tarkavāgīśa. Appearance, fresh. Prose. Correct.

Beginning. ॐ नमः शिवाय ।

यस्मिन्नसज्जगदिदं सदिवावभाति ।
भोगीव × सकलोपहितोपि × ॥
यस्तद्गुणैः खमिव चिन्मय एक एतत् ।
तस्मै नमोऽद्भुतमयाय महेश्वराय ॥

सकलविषयव्यापकत्वात् सन्धिपादमभिधाय पदशासनं व्याकरणमिति श्रवणात् सकलपादानां धातुमूलकत्वात् धातुप्रत्ययमारभमाणस्तिङो वाक्य समापकत्वेन प्राधान्यात् तिङन्तमेवाभिदधत् वर्त्तमानकालस्य पुरोवर्त्तितया सान्निध्यात् तिङ्शब्देनाख्यातत्वप्रसिद्धा लडादयो व्यपदिश्यन्ते इति मत्वा-नस्येति वर्त्तमानकालीन-लट्-लक्षणमाह । धातोरित्यादि । इत्यादि ॥

End. ग्रन्थ × × × × × कर्त्तरि विहितौ ×× कर्म्म कर्त्तरि भवत्येवेति पूर्व्वं × × × × × कर्म्मकर्त्तरि कर्त्तृत्वस्य विद्यमानत्वादिति भावः ।

विशेषविज्ञानपरा मत्सरा (?)
व्याख्यानमेतत् कलयन्तु सन्ततं ।
मया पुनस्तेषु कृतोऽयमञ्जलि
दूंष्यं वचोनोह्यविभाव्य मामकं ॥ (?)

श्रीमद्भिः कविचन्द्रपादकमलैराचार्य्यपञ्चाननै-
रन्यैर्वा यदवाचि कुत्रचिदथो विद्याविनोदेन च ॥
तत् सर्व्वं कलयन्तु निर्म्मलधियः सन्तोऽत्र संक्षेपतो
यच्चान्यद्विहितं मयेदमखिलं गृह्णन्तु सारार्थिनः ॥
युक्तं नोक्तमिदं पूर्व्वैरितीर्षाकलुषं वचः ।
को हि शब्दाम्बुधेः पारमगादेकं विनेश्वरं ॥

**Colophon.** इति श्रीकविचन्द्रचरणारविन्दनिःस्यन्दमानमकरन्दमधुव्रतगयघट्टवन्द्यघटीय-कुलप्रसूत श्रीगोपालचक्रवर्त्तिविरचितायां सारार्थदीपिकायां द्वितीय-स्तिङन्तपादः समाप्तः × × × × × × ×
शकाब्दा १७४१ ।

विषयः । संक्षिप्तसारीयतिङन्तप्रकरणव्याख्याया व्याख्यानं ।

---

**No. 323.** संक्षिप्तसारसुबन्तटीकादीधितिः By रामेश्वरतर्कालङ्कार. Substance, country-made paper, 15×3 inches. Folio, 24. Lines, 11 on a page. Extent, 1000 ślokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grāma Khunverā, Late Paṇḍit Srīpati Bhaṭṭācāryya. Appearance, old. Prose. Correct.

**Beginning.** ॐ नमो गणेशाय ।

लुक् ॥ अथास्य सकलविषयव्यापकत्वात् ग्रन्थादौ करणं युक्तमितिचेन्न स्वतन्त्रेक्कोर्नियन्तुमशक्यत्वादिति केचित्, वयन्तु कारकपादे नाम्नः कर्त्रादि संज्ञाविधानपूर्व्वकं प्रथमादिसप्तविभक्तीनां प्रथमपुरुषादेश्च विधानमुक्त मित्यादि ।

**End.** सद्वाद्याभिर्वर्त्तते इति नन्वत्र संख्यानवृत्तित्वात् कथं बहुवचनं अतएव समासे पूजार्थस्तिवर्जमित्यस्य प्रत्युदाहरणमेव दर्शयिष्यति । उ । एक-शेषात् बहुवचनमिति गुरवः तथाच चतुर्विंशत्यधिकशतमित्यर्थं अपरं आचार्य्यटिप्पन्यादौ बोध्यं ।

**Colophon.** इति श्रीरामेश्वरतर्कालङ्कारकृता सुबन्तटीकाटीधितिः समाप्ता ॥

विषयः । संक्षिप्तसारीयसुबन्तप्रकरणव्याख्याया व्याख्यानं ॥

---

**No. 324.** सङ्गीतरघुनन्दनः By विश्वनाथसिंह (स्वकृतटीकासहितः). Substance, country-made paper, 10 × 5 inches. Folia, 52. Lines, 13 on a page. Extent, 1900 ślokas. Character, Nāgarī. Date ? Place of deposit, Ṭikāri Rāṇiganja, District Gayā, Paṇḍit Raghunātha Tripāṭhī. Appearance, tolerable. Prose and verse. Incorrect.

**Beginning.** श्रीजानकीवल्लभाय नमः ॥

मूलस्य । रामप्रेमपयोधिवर्द्धनविधुः शृङ्गारसारास्पदं
संसारार्णवपारतारणतरिः र्मोयानमोदोपिका ।
विद्युद्भा सुखवृन्दवर्षणकरी कादम्बिनी कापसौ
मद्धृत् कुञ्जनिवासिनीविजयतां श्रीजानकी सर्व्वदा ॥
श्रीसीतेविन्ध रिपुगजसिंहो जयसिंहो राजसिंहोस्ति ।
तनुते तस्य तनुजो ग्रन्थं सङ्गीतरघुनन्दनाख्यं ॥ इत्यादि ॥

टीकायाः । श्रीगणपतये नमः ॥
वन्दे तत् पदकमलं यस्य मकरन्दं पुनाति जगदखिलं ।
× × × × × × × ॥
नत्वा गौरीशपादाब्जं टीका व्यङ्गार्थचन्द्रिका ।
श्रीरामरासरसिकविनोदाय विधीयते ॥

**End.**

मूलस्य । ससखी सीता सङ्गीतेचणसुखितशिरः × × त्ती ।
विश्वनाथ × × निन्द्यते समदमदन × × ॥ * ॥
इति श्रीमन्महाराजकुमार-श्रीविश्वनाथसिंहविरचिते सङ्गीतरघुनन्दने श्री-
जानकीरघुनन्दनयोगानन्दनृत्यवर्णनं नामैकादशः सर्गः ॥
अतः परं खण्डितं ।

टीकायाः । श्रीजानकीरघुनन्दनस्य परमदिव्यरासवर्णनरसासवं निपीय कथनानन्दमपि-
विरहवर्णनं करोमीति ॥ * ।

**Colophon.** इति सिद्धि-श्रीमन्महाराजाधिराजविश्वनाथसिंहकृतायां व्यङ्गार्थचन्द्रिका-
ख्यटीकायामेकादशः सर्गः ॥ अतः परं खण्डितं ।

विषयः । १ सर्गे मङ्गलाचरणं ॥ २ रामचन्द्रस्य शरद्रासवर्णनं ॥ ३ रामचन्द्रस्य वसन्त-
रासवर्णनं ॥ ४ जानक्यन्तर्धानवर्णनं ॥ ५ कामवसन्तिकागमनवर्णनं ॥ ६ चारुशीलाकृत-
मानानुनयवर्णनं ॥ ७ जानकीसमागमवर्णनं ॥ ८ जानकीभूषणविधानवर्णनं ॥ ९ दोलावर्णनं ॥
१० सर्व्वाङ्गशोभावर्णनं ॥ ११ सर्गे जानकीरघुनन्दनसम्मीलनानन्दजनितनृत्यादिवर्णनं ॥

**No. 325.** सन्देहदोलावलीप्रकरणम् [मागधी]. Substance, country-made paper, 12 × 5 inches. Folia, 9. Lines, 11 on a page. Extent, 225 çlokas. Character, Nāgari. Date, Samvat 1594. Place of deposit, Benares City, Dikmaṇḍalācārya, Mahārāja Balacandra Sūri. Appearance, old. Verse. Correct.

**Beginning.** पड़िविम्बियपणय जयं जसुसं, छिरद्धोरमडरमाल्लामी,
सयनागयं वनजइतं नमो जिनेसरं वीरं ।

**End.** इयकयं वयसंसयपयपवूत्तरमयरणं समासेन लिखियं,
जगपवरागमजिनवल्लहस्तरिसिसेण ।

**Colophon.** इति सन्देहदोलावल्ली प्रकरणं । संवत् १९९४. आश्विन सुदि दशमी ॥

विषयः । आत्मोपदेशच्छलेन स्वात्मसन्देहकथनम् ।

---

**No. 326.** संन्यासिव्यासपूजा. Substance, country-made paper, 9 × 5 inches. Folia, 6. Lines, 12 on a page. Extent, 120 ślokas. Character, Nāgari. Date ? Place of deposit, Bibihāṭī, Benares City, Paṇḍit Vāmanācārya. Appearance old. Verse. Correct.

**Beginning.** श्रीगणेशाय नमः ।
आषाढ्यां पौर्णमास्यां प्रातःस्नानं कृत्वा चौरं विधाय स्नानं कृत्वा मध्याह्ने
स्नानं कुर्यात्, सन्ध्यां विधाय व्यासपूजास्थानं गच्छेत् ।

**End.** निवसन्तु सुखेनात्र गमिष्यामः कृतार्थतां,
यथा शक्तिश्च शुश्रूषां गमिष्यामो वयं मुदा ॥
यज्ञेन यज्ञमयजमिति परेद्युर्विसर्जनं ॐ तत्सत् ब्रह्मार्पणमस्तु ।

**Colophon.** इति व्यासपूजा समाप्ता ।

विषयः । संन्यासिनां गुरुपादुकापूजनम् ।

---

**No. 327.** सप्तशतीप्रयोगः By नागोजीभट्ट. Substance, country-made paper, 14 × 5 inches. Folia, 22. Lines, 11 on a page. Extent, 500 ślokas. Character, Nāgar. Date Saṃvat 1810. Placc of deposit, Benares, Paṇḍit Govinda Bhaṭṭa. Appearance, old. Prose. Incorrect.

**Beginning.** सा सविधि ब्राह्मणे उप यः कामयेत पुन र्न प्रत्याजायेयमिती × ×
पुनर्भुवमधिकृत्य तदानुसन्धेयोऽस्या मन्त्र उक्तः रात्रिं प्रपद्ये पुनर्भूमयो

भूकन्यां × × × दृष्टां युवतिं कुमारिणीमादित्यचक्षुषे वातः प्राणाय सोमो × × × पृथिव्यै शरीरमिति । अस्य रात्रौ जपमात्रात् सिद्धिः अस्यफलं × × × ज्ञानं परं सकलं तु मोक्ष इति तत्रैवोक्तं अयञ्च देवीविषयो मन्त्रः ।

End. अथ रहस्यत्रयस्य त्रयोऽध्यायाः × × × । तत्तत्कात्यायनीतन्त्रविरोधादिति ध्येयं । अत्र निष्कदक्षिणा दरिद्राणां चतुःसुवर्णदक्षिणा समर्थानां ॥

Colophon. इति श्रीशिवभट्टसुतो नागोजीभट्टकृते मार्कण्डेयपुराणान्तर्गत-सप्तशतीव्याख्याने चण्डीस्तोत्रप्रयोगविधिः । संवत् १८१० ।

विषयः । चण्डीपाठक्रमकथनं देवीसूक्तादिव्याख्यानञ्च ॥

---

No. 328. सप्तसंस्थाप्रयोगः By अनन्तदीक्षितः. Substance, country-made paper, 10×4 inches. Folia, 42. Lines, 10 on a page. Extent, 840 ślokas. Character, Nāgar. Date ? Place of deposit, Benares City, Bibihāṭi, Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

नमामि पार्व्वत सूनु भक्तानां सिद्धिदायकं ।
क्रियते उपकाराया वशिष्टा सप्तसंज्ञका ॥

श्रवणाकर्माद्या इत्यर्थः । इदानीं श्रवणाकर्माद्याः सप्तावशिष्टा उच्यन्ते ।

End. कृत्तिकादिषु काम्यश्राद्धं हत्तिकारमतेनाष्टमीश्राद्धवत् सर्व्वं कार्य्यं । यद्वाशौनकोक्तरीत्या वृद्धिश्राद्धवत् इत्यष्टकाविकृतिश्राद्धप्रयोगः ।

Colophon. इति श्रीमद्यज्ञोपवीताभिधान-श्रीविश्वनाथसूनुना दीक्षितानन्तेन सर्वोपकारायावशिष्टसमन्त्रकश्रवणाकर्माद्यपाकसंस्थाप्रयोगः समाप्तः ।

विषयः । श्रवणाकर्मादिसप्तपाकयज्ञसंस्थाकथनम् ।

---

No. 329. सप्तपाकसंस्थाप्रयोगः (प्रयोगसारीयः) By विश्वनाथ. Substance, country-made paper, 10×5 inches. Folia, 23. Lines, 9 on a page. Extent, 460 ślokas. Character, Nāgari. Date Samvat. 1908. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, new. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

इदानीमवशिष्टाः सप्तपाकसंस्था उच्यन्ते । श्रासां × × × × × × × एताः काय्यी नवेत्युक्तं प्राक् प्रायश्चित्तप्रकरणे × × × स्थालीपाके प्रमाणमप्युदाहृतं तत्र ।

End. श्राद्धं समाप्य पवित्रं ग्रन्थिं विसृस्य शुचिदेशे क्षिपेदाचम्य तदहरेव वर्गत्रयस्य तिलतर्पणं कुर्य्यात् । अनुमन्त्रणादिपिण्डप्राशनान्तसर्व्वमन्त्रेषु अनूहः ज्ञेयः ।

Colophon. इति अतिसंक्षिप्तश्रवणाकर्मादिसप्तपाकयज्ञसंस्थाप्रयोगाः ।
इति श्रीमत् स्मार्त्तवंशोत्पन्नाल्पज्ञानश्रीविश्वनाथकृते प्रयोगसाराख्ये सप्तपाकसंस्थाप्रयोगः समाप्तः । संवत् १९०८ वैशाखकृष्णाष्टम्याम् ।

विषयः । संक्षेपेण श्रवणादिसप्तपाकयज्ञसंस्थाकथनम् ।

---

No. 330. सप्तसंस्थाप्रयोगः (प्रयोगरत्नीयः) By नारायणभट्ट. Substance, country-made paper, 8 × 3 inches. Folia, 22. Lines, 9 on a page. Extent, 400 ślokas. Character, Nāgari. Date Saṃvat 1777. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

आश्वलायनमाचार्य्यं प्रणम्य पितरं गुरुं,
भट्टरामेश्वरसुतो भट्टनारायणः सुधीः,
पञ्चविंशतिसंस्कारेषूत्कृष्टा दशसंस्कृतीः
पाकयज्ञान् सप्त शिष्टान् वक्ति शिष्टेष्टतुष्टये ।

End. कृत्तिकादिषु काम्यश्राद्धं वृत्तिकारमतेन अष्टमीश्राद्धवत्सर्व्वं कार्य्यं, यद्वा-शौनकोक्तरीत्या वृद्धिश्राद्धवत् ।

Colophon. इति रामेश्वरभट्टसुतनारायणभट्टकृते प्रयोगरत्ने अष्टकाविकृतिश्राद्धप्रयोगः ।
इति सप्तसंस्थाप्रयोगः समाप्तः । संवत् १७७७, कार्त्तिककृष्णैकादशी ।

विषयः । द्विजातीनां सप्तविधसंस्कारकथनम् ।

---

**No. 331.** समन्तकयजुर्वेदिग्रहयज्ञाग्निस्थापनविधिः ( कपिलपञ्चरात्रोक्तः ) By वृहद्वशिष्ठ. Substance, country-made paper, 15 × 3 inches. Folio, 20. Lines, 8 on a page. Extent, 500 ślokas. Character, Bengali. Date S.K. 1725. Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khuuverā, Late Paṇḍit Rāmtāraṇa S'iromaṇi. Appearance, old. Prose and verse. Correct.

**Beginning.** ॐ नमः श्रीसूर्य्याय ।

अथ बृहद्वशिष्ठप्रणीतकपिलपञ्चरात्रोक्तसमन्ताग्निस्थापनसहितग्रहयज्ञपद्धति लिख्यते । तत्र ग्रहदोष-नराधिप-प्रबलशत्रु-दुःस्वप्नरोगादिनिमित्तं निरवकाशशान्तिकं मलमासादिसमयाशुद्धावपि कार्य्यं । स्त्रीपुत्रादिरूपकाम्यसावकाशकर्म्मणि मलमासादीतरशुद्धकालोऽपेक्षितः । तत्र रविसोमबुधबृहस्पतिशुक्रवासरेषु चित्रानुराधामृगशिरोरेवतीपुष्याश्विनीहस्तारोहिणूत्तरात्रयेषु चन्द्रतारानुकूले शुभलग्ने वैधृति-व्यतीपात-विष्टि-रिक्तातिथि-निरंशादिरूपप्रतिकूलसमयेतरस्मिन् काले यज्ञमारभेत । इत्यादि ।

**End.** एवं ग्रहविप्रानपि भोजनादिना परितोष्य स्वयमपि
बान्धवैः सह सानन्दं भुक्त्वा स्वच्छन्दं विहरेदिति ॥

**Colophon.** इति कपिलपञ्चरात्रोक्तबृहद्वशिष्ठप्रणीतसमन्तकयजुर्वेदिग्रहयज्ञाग्निस्थापनविधिः समाप्तः । लिखितं श्रीरामलोचनदेवशर्म्मणा आत्मनः पाठार्थं । शकाब्दाः । १७२५ । १० । ५ ।

विषयः । यजुर्वेदिनां अग्निस्थापनग्रहयज्ञविधिकथनं ॥

---

**No. 332.** सरस्वतीसूत्रटीका ( लघुभाष्यं ). Substance, country-made paper, 15 × 6 inches. Folia, 127. Lines, 15 on a page. Extent, 5715 ślokas. Character, Nāgara. Date, S.M. 1858. Place of deposit, Benares City, Dikmaṇḍalācāryya Mahārāja Bālacandra Sūri. Appearance, new. Prose. Correct.

**Beginning.** उभये स्वराः, अकारादय एकारादयश्च स्वरसंज्ञाः स्युः । संज्ञाप्रदेशा इयं × × × × इत्यादयः । अथ उभयग्रहणं किमर्थं, अकारादीनां एकारादीनाञ्चानुवृत्त्यैव लब्धत्वात् । उच्यते ।

**End.** अन्योक्तेः कर्मणीत्यादिशब्देन विधानात् प्रथमा कारकविभक्तिर्भवतीदं च

षार्त्तिककृदाशयं विवरितुं प्रकरणान्ते श्रीसरस्वत्या × × प्रथमेति सूत्रं कृतमिति दिक् ।

Colophon. हाटकेशपुरस्थायी विनायकसुतोऽकरोत् ।
रघुनाथाभिधोव्याख्यां × × यथामति ॥
इति कारकप्रकरणं । संवत् १८५९ कार्त्तिककृष्णपक्षे ।

विषयः । सारस्वतसूत्रव्याख्या ।

---

**No. 333.** सरस्वतीसूत्रटीका (लघुभाष्यम्). Substance, country-made paper, 15 × 6 inches. Folia, 25. Lines, 15 on a page. Extent, 875 ślokas. Character, Nāgara. Date, S.M. 1898. Place of deposit, Benares City, Dikmaṇḍalācāryya Mahārāja Bālacandra Sūri. Appearance, new. Prose. Correct.

Beginning. श्रीगणेशाय नमः । श्रीरघुनाथाय नमः ।
समासश्चान्वये नाम्नां, अत्र योगत्रयं, समास इत्याद्यो योगः । संज्ञाधिकारश्चायं, अन्वर्थाचेयं संज्ञा, समानि एकीभूतानि पदानि अर्था आसते यस्मिन् आधारे × × × । अथवा । इत्यादि ।

End. इत्यच्च वेदान्तव्याकरणयोरेक एव सिद्धान्त इति दिक् ॥
हाटकेशपुरस्थायी विनायकसुतोऽकरोत्,
रघुनाथाभिधोव्याख्यां सम्रानाश्चैव नागरः ॥

Colophon. इति सरस्वतीसूत्रविवरणे लघुभाष्याख्ये रघुनाथकृतौ पूर्व्वार्द्धं समाप्तं । संवत् १८९८ चैत्र कृष्णपक्षे ।

विषयः । सारस्वतसूत्रव्याख्या ।

---

**No. 334.** सर्व्वदेवप्रतिष्ठाप्रयोगः By वासुदेव. Substance, country-made paper, 10 × 3 inches. Folia, 160. Lines, 4 on a page. Extent, 1280 ślokas. Character, Nāgara. Date, Samvat 1908. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, new. Prose and verse. Correct.

Beginning. श्रीगणेशाय नमः ।
अथ स्थावरविष्णुशिवादिप्रतिष्ठोच्यते ।
तत्रादौ मूर्त्तिनिर्माणप्रकारः । कृत्यरत्नाकरे । इत्यादि ।

End. अन्यतरकुण्डाग्निनाशे आचार्य्यकुण्डादग्निरग्रयः ।
आचार्य्यकुण्डाग्निर्यावत् समाप्तिं विशेषतो रक्षणीय इति ॥

Colophon. इति वासुदेवकृतायां प्रयोगमालायां विष्णुप्रतिष्ठादिसर्व्वदेवप्रतिष्ठाप्रयोगः ।
संवत् १९०८ ।

विषयः । सर्व्वदेवानां प्रतिष्ठाकथनम् ।

---

No. 335. सर्व्वदेवप्रतिष्ठाप्रयोगः By माधवाचार्य्य. Substance, country-made paper, 10×3 inches. Folia, 127. Lines, 9 on a page. Extent, 2032 slokas. Character, Nāgara. Date, Samvat 1911. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, new. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।
उदगयने माघादिपञ्चसु मासेषु शुक्लपक्षे चतुर्थी-षष्ठी-नवमी-चतुर्दशी-व्यतिरिक्तासुबुधगुरु मङ्गलान्यतमस्मिन् वारे भौमभिन्नसर्व्ववारेषु वा अश्विनीरोहिणीमृगपुनर्वसुपुष्योत्तराहस्तास्वात्यनुराधाश्रवणाज्येष्ठामूलधनिष्ठा रेवत्याद्यन्यतमस्मिन् नक्षत्रे सुलग्ने प्रतिष्ठा कार्य्या ।

End. स्थिरलक्ष्मी-कीर्त्तिलाभ-शत्रुपराजय-सर्व्वपापनिरसन-विष्णादिलोकप्राप्त्यर्थं विष्णुमूर्त्तिप्रतिष्ठां करिष्ये ।

Colophon. सर्व्वदेवप्रतिष्ठाप्रयोगः समाप्तः । संवत् १९११ ।

विषयः । सर्व्वदेवप्रतिष्ठाकथनम् ।

---

No. 336. सर्व्वानन्दतरङ्गिणी By शिवनाथभट्टाचार्य्य. Substance, country-made paper, 15×3 inches. Folia, 16. Lines, 6 on a page. Extent, 500 slokas. Character, Bengali. Date, Sam. 1256. Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgīs. Appearance, fresh. Verse. Generally correct.

Beginning. नत्वा श्रीगुरुपादाब्जं तनोति गुरुकिङ्करः
श्रीसर्व्वानन्दनाथस्य सर्व्वानन्दतरङ्गिणीं ॥
सूक्ष्मं तेजस्तथास्थूलं विविधं शिवभाषितं ।
ब्रह्मरन्ध्रे गुरुः सूक्ष्मं सर्व्वकारणकारणं ॥ (?)

शिवशक्त्यात्मकं ब्रह्म हंस इत्यक्षरद्वयं ।
तद्रूपं योगिभिर्ध्येयं चन्द्रे पक्षद्वयं यथा ॥
ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्त्तिं ।
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यं ॥
एकं नि × × × मचलं सर्व्वदा साक्षिभूतं ।
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥ इत्यादि ।

**End.** अत एव हि शान्तानां सुरापानं प्रशस्तकं ।
कथं निन्दसि नो दक्षिन् विचार्य्य शरणं व्रज ॥

**Colophon.** इति श्रीसर्व्वानन्दात्मज-श्रीशिवनाथभट्टाचार्य्यविरचिता सर्व्वानन्दतरङ्गिनी-समाप्ता ॥ सन १२५६ ।

विषयः । सर्व्वानन्दनाथस्य मेहारवास्तव्यस्य साक्षात्कृतभवानीचरणयुगस्येतिवृत्तवर्णनं । कदासौ प्रादुरासीदिति नास्ति निश्चयः परन्तु मेहारे राज्यं कुर्व्वति दासाभिधे राजनि सर्व्वानन्द आसीदित्येवात्र श्रूयते ।

---

**No. 337.** साग्निकापस्तम्बदाहविधिः. By बालकृष्णः Son of आपदेवः. Substance, country-made paper, 12×3 inches. Folia, 21. Lines, 7 on a page. Extent, 315 ślokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

**Beginning.** श्रीगणेशाय नमः ।
श्रीरामं मोहिनी राजपितरं मातरं तथा ।
आपदेवं गुरुं चापि प्रणिपत्य यथाक्रमम् ॥
आपस्तम्बमुनिं नत्वा दृष्ट्वा तत्सूत्रवार्त्तिकं ।
निबन्धांश्च तथाचारं शिष्टानां चैवपद्धतीः ॥

**End.** सुतेन ह्यापदेवस्य बालकृष्णेण सूरिणा ।
ग्रन्थाननेकानालोक्य कृताह्यन्त्येष्टिपद्धतिः ॥

**Colophon.** इति श्रीमदापदेवसुतबालकृष्णरचितः-साग्निकापस्तम्बसूत्रदाहविधिः समाप्तः ॥

विषयः । साग्निकापस्तम्बीयसूत्रदाहनविधानम् ।

---

**No. 338.** सामवेदीयसंस्कारपद्धतिः By वीरेश्वर. Substance, country-made paper, 9 × 5 inches. Folia, 147. Lines, 8 on a page. Extent, 2352 ślokas. Character, Nāgara. Date, Samvat 1879. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

**Beginning.** श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ।

देवादित्यकुले जातः × × त्रैलोक्यसंसदि

पद्धतिं विदधे श्रीमान् श्रीमद्वीरेश्वरः स्वयं ।

**End.** गौरी पद्मा शची मेधा सावित्री विजया जया ।

देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥

धृतिः पुष्टिस्तथा तुष्टिस्तथा मे कुलदेवता ।

इतिगणपतिसहितमातृपूजा ।

**Colophon.** श्रीकृष्णाय नमः । संवत् १८७९ ।

विषयः । सामवेदीयानां संस्कारविधिः ।

---

**No. 339.** सामायकटीकावार्त्तिकं (मागधी-संस्कृत-गुर्ज्जरभाषासु). Substance, country-made paper, 16 × 6 inches. Folia, 21. Lines, 22 on a page. Extent, 1386 ślokas. Character, Nāgara. Date 1827. Place of deposit, Benares City, Dikmaṇḍalācāryya Mahārāja Bālacandra Sūri. Appearance, old. Prose. Correct.

**Beginning.** श्रीवीतरागाय नमः ।

परिक्कमामि भन्ते इयिया वहिया ए विरहणा ए श्रण × × ।

ते श्रद गमणे ठास गमने चक्कमने पाणे गमणे विजुगमने हरिदुगमणे ॥

इत्यादि ।

**End.** समाधिध्यानके वि × × × म्हहारी मरण होय वङरि जिन गुण सम्पविहो उमभ्भं कहिये ।

जिनेश्वर देवका जुगुनकेँ केवलदर्शन श्रव केवलज्ञान तिहि कीन्हारे प्राप्ति होय ।

**Colophon.** इति श्रीशास्त्रानुसारध्यानास्तं भव्यानां मुक्तिदं सामयिकं सर्व्वकर्मचयार्थं शास्त्रमङ्गलं दिस्तु इति । संवत् १८२७ फागुणसुदि ।

विषयः । जैनमते सामायकसमाध्यवस्था नाम व्याख्या ।

---

**No. 340.** सामुद्रिकचिन्तामणिः By माधवः. Substance, country-made paper, 6 × 13 inches. Folia, 102. Lines, 18 on a page. Extent, 2500 slokas. Character, Nāgara. Date ? Place of deposit, Ṭikāri, Baith Bighā, District Gayā, Paṇḍit Mahāvīrā prasād Missra. Appearance tolerable. Verse. Generally correct.

**Beginning.** खाद्यं खण्डितं ।

**End.** भोजनकाले यस्य मध्यदृषवाहनं दन्तिनं वा पश्येत् सोऽपि सद्यो मरिष्यति ।
प्रकीर्णकेशां नग्नां वा स्त्रियं वा पाशधारिणीं ।
पश्येत् भोजनकाले यः सोऽपि सद्यो मरिष्यति ॥
भुज्यमानस्तदात्मीयमन्नरन्ध्रेण पश्यति ।
यः स मृत्युमवाप्नोति सद्य एव न संशयः ॥
इति कालगतिं बुद्धा बाह्याभ्यन्तरलक्षणैः ।
कुर्य्यान्निःश्रेयसे यत्नं यावदेव परिचयं ॥
सर्व्वं शरीरिणां साध्यं शरीरं खलु दुर्लभं ।
तत् कालवचनेनैव ज्ञात्वा देहं प्रतिष्ठितं ॥ * ॥

**Colophon.** इति श्रीश्रीग्रामकरोपनामक-माधवकृते सामुद्रिकचिन्तामणौ तृतीयोऽध्यायः ॥
शुभमस्तु ॥

विषयः । स्त्रीपुंसामाङ्गिकशुभाशुभलक्षणादिकथनं । रिष्टारिष्टफलादिकथनं ॥

---

**No. 341.** सापिण्ड्यकल्पलतिका By अपोदेवापरनामकश्रीसदाशिवदेव. Substance, country-made paper, 9 × 3 inches. Folia, 3. Lines, 7 on a page. Extent, 40 slokas. Character, Nāgara. Date, Samvat 1943. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, new. Verse. Correct.

**Beginning.** श्रीगणेशाय नमः ।
श्रीमद्गजाननषडाननयुक्शिवौ च
श्रीविट्ठलं निजगुरुंगुरुमेव नत्वा,
सापिण्ड्यकल्पलतिकां तनुते विचित्रां
देवः सदाशिव इमां शिशुबोधनाय ॥

**End.** पद्यप्रसूनैः षन्नेत्रसंख्यकैः
अलंकृता कल्पलता मदीया ।

अध्यापकाध्येतृजनाय नित्यं
दद्यादभीष्टानि परःशतानि ॥

Colophon. इति श्रीमद्देवालयपुरवासि-श्रीनीलकण्ठसूरिसूनुश्रीश्रीपतिसूनु × × अपोदेवापरनामधेयेन श्रीसदाशिवदेवेन रचिता सापिण्ड्यकल्पलतिका समाप्ता । संवत् १९४३ ।

विषयः । सापिण्ड्यव्यवस्था ।

---

No. 342. सामविधानब्राह्मणभाष्यम् By माधव. Substance, country-made paper, 16×6 inches. Folia, 41. Lines, 11 on a page. Extent, 1640 ślokas. Character, Nāgara. Date ? Place of deposit, Benares, Govinda Bhaṭṭa. Appearance, new. Verse. Correct.

Beginning. वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्, ।
निर्ममे तमहं वन्दे विद्यातीर्थम् महेश्वरं ॥

End. इदं शिष्येण प्रयोक्तव्यं। य एतानि दातुं न शक्नुयात् स शुश्रूषया अल्पधनप्रदानेन च उपाध्यायं तोषयित्वा तेनानुज्ञातः सन् उक्तविधानेन सामानि प्रयुञ्जानो यं कामं कामयितव्यफलविशेषं कामयते तमाप्नोति । अष्टमखण्डः इति तृतीयाध्याये नवमः खण्डः ।

Colophon. इति श्रीमत् सायनाचार्य्यविरचिते माधवीये वेदार्थप्रकाशे तृतीये सामविधानाख्ये ब्राह्मणे तृतीयोऽध्यायः समाप्तश्चायं ग्रन्थः ।

विषयः । सामवेदान्तर्गतसामविधानब्राह्मणव्याख्या ।

---

